# नन्दनवनकल्पतरुः २१

दक्षिणायनम् - वि.सं. २०६४

सङ्कलनम् कीर्तित्रयी

## शासनसम्राड्-विशेषः-२

शासनसम्राजामिह समुदाये मेरुपर्वतौपम्ये ।
कल्पतरुर्नन्दनवन-सत्कोऽयं नन्दतात् सुचिरम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

મુનિશ્રી અજયસાગરજી મ. 1524



# नन्दनवनकल्पतरुः २१

दक्षिणायनम् - वि.सं. २०६४

सङ्कलनम् कीर्तित्रयी

## शासनसम्राड्-विशेषः-२

शासनसम्राजामिह समुदाये मेरुपर्वतौपम्ये ।
कल्पतरुर्नन्दनवन-सत्कोऽयं नन्दतात् सुचिरम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नन्दनवनकल्पतरु: ॥ एकविंशी शाखा ॥
(संस्कृतभाषामयं अयन-पत्रम् ॥)

सङ्कलनम् : **कीर्तित्रयी** ॥

प्रकाशनम् : **श्रीजैनग्रन्थप्रकाशनसमिति:**, खंभात ॥

वि.सं. २०६३, ई.सं. २००८

मूल्यम् : रू. १००/-

प्राप्तिस्थानम् : **श्रीविजयनेमिसूरीश्वरजी स्वाध्याय मंदिर**
१२, भगतबाग, शेठ आणंदजी कल्याणजीनी पेढी समीप,
पालडी, अमदावाद - 380007 दूरभाष : 26622465

सम्पर्कसूत्रम् : "**विजयशीलचन्द्रसूरि:**"
C/o. Atul H. Kapadia
A-9, Jagruti Flats,
Behind Mahavir Tower,
Paldi, Ahmedabad-380007
दूरभाष : 26574981
M. 9979852135

मुद्रणम् : '**क्रिष्ना ग्राफिक्स**'
नारणपुरा गाम, अमदावाद ॥
दूरभाष : 079 - 27494393



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# प्रास्ताविकम्

**गुरवो बहवः सन्ति शिष्यहितापहारिणः ।**
**गुरवो विरलाः सन्ति शिष्याणां हितकारिणः ॥**

जगत्यद्य बहुत्र गुरूणामेव साम्राज्यं प्रभावश्च दरीदृश्येते। अत्याधुनिके पश्चिमे जगत्यपि धर्मगुरूणामेव प्रभुत्वमद्याऽपि । एते हि सर्वमपि जगत् स्वमतीयं कर्तुं समुत्सुकाः सर्वत्र देशेषु विशेषतश्चाऽविकसितार्धविकसितेषु आफ्रिकीयादिदेशेषु स्वधर्मस्य प्रचार-प्रसारार्थं सेवामिषेण धर्मप्रसारसंस्थाः (Mission) स्थापितवन्तः सन्तः साम-दानादिप्रकारैर्जनान् स्वमतानुयायिनः कुर्वन्तितराम् ।

अन्यत्र तु केचन धर्मगुरवो धर्मरक्षार्थं (जे़हाद) धर्मप्रसारार्थं चाऽबुधान् युवजनान् उन्मादिनः कुर्वाणाः सर्वत्राऽऽतङ्कं प्रसारयन्ति। (सद्य एवाऽस्माभिरस्या-ऽऽतङ्कस्याऽनुभूतिः प्राप्तैवाऽत्र ।)

अस्माकमार्यदेशेऽपि तथाकथिता गुरवः श्रद्धालूनन्धश्रद्धालूँश्च जनान् भ्रान्तान् कुर्वन्तः स्वार्थं च साधयन्तो दृश्यन्त एव ।

यद्यप्येते सर्वेऽपि गुरवो 'वयं जनताहितार्थमेव सर्वं कुर्म' इति ब्रुवाणा मन्यमानाश्च भवन्ति, स्वहितमनवबुध्यमाना जनाश्चाऽपि 'एते एवाऽस्माकं हित-काङ्क्षिणो हितकारिणश्चे'ति मन्वानास्तैरुक्तं सर्वमपि प्रमाणतया स्वीकृत्य तदनुरूप-मेवाऽऽचरणं कुर्वन्ति तथाऽपि वस्तुतस्तु तेषामहितमेव भवति ।

एवं सत्यपि केचनाऽत्यल्पसङ्ख्याकास्तादृशा अपि गुरवो भवन्ति ये स्व-परभेदमजानाना 'वसुधैव कुटुम्बक'मिति च मन्वानाः सदैव स्व-परहितार्थमेव प्रवर्तन्ते, जनानपि च तदर्थमेव प्रेरयन्ति प्रवर्तयन्ति च ।

एतादृशां गुरूणां सत्त्वादेव जनानां धर्मश्रद्धा परहितबुद्धिश्चाऽद्यपर्यन्तमपि तथैवाऽवस्थिताऽस्ति ।

ईदृशामेवाऽस्माकं परमगुरूणां पूज्यशासनसम्राजामाचार्यभगवतां श्रीविजयनेमिसूरीश्वराणामाचार्यपदारोहणशतीवर्षमिदं निमित्तीकृत्यैषा शाखा **शासनसम्राड्विशेषः**-२ इति विशेषाङ्कतया प्रकाशिताऽस्ति ।

सद्गुरूणां गुणगानेन स्वजन्म कृतार्थं कुर्याम इति ।

**कीर्तित्रयी**

श्रावणशुक्ला पञ्चमी, २०६४
अहमदाबादनगरम्



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## वाचकानां प्रतिभाव:

नमो नम: श्रीगुरुनेमिसूरये ॥

सानुवन्दनं निवेद्यते विजयहेमचन्द्रसूरिणा नन्दनवनकल्पतरोर्विषयक: हर्षोद्गार: अनवद्यविद्या-विद्योतितान्त:करणं श्रीविजयशीलचन्द्रसूरिवरं प्रति

नन्दनवनकल्पतरो: विंशतितम: शासनसम्राड्विशेष: सम्प्राप्त:, तं दृष्ट्वा पठित्वा च परमाह्लाद: सञ्जात: । अनेन विशेषाङ्केन

पूज्यतमपादपङ्केरुहेभ्य: न्यायव्याकरणादिसकलशास्त्रपारावारपारङ्गतेभ्य: सूरिचक्रचक्र-वर्तिभ्य: शासनसम्राट्परमगुरुभगवद्भ्य: तेषां सूरिपदारोहणशताब्दीवर्षे सुयोग्या तथा च तेषां विरला-प्रतिमव्यक्तित्वानुरूपाऽञ्जलि: प्रदत्ताऽस्ति ।

विशेषाङ्केऽस्मिन्ननेकानि भक्तिभावसम्भृतानि विशदवैदुष्यपरिचायकानि प्राचीनार्वाचीनानि अत्यद्भुतानि स्तुतिस्तोत्राणि एतादृशानि समाविष्टानि सन्ति यानि भूयो भूयो वाचनाय पठनाय गानाय च चेत: समुल्लसत्येव ।

लेखा अपि सर्वे प्रशस्ततरा एव विद्यन्ते, तथाऽपि तेषु '**चित्रमयविजयनेमिसूरि**'-शीर्षक: मुनिश्रीरत्नकीर्तिविजयलिखित: सचित्र: लेख: भृशं गौरवास्पदं प्रतिभाति, एतद्वाचनेन पूज्यपाद-परमगुरुभगवतां समस्तमपि जीवनं वर्णिकारूपेण ज्ञातं भवति ।

विद्वत्सत्तमाचार्यश्रीविजयशीलचन्द्रसूरिविरचितगुर्जरभाषामय**गुरुगुणसकीर्तन**रूपाष्टप्रकारी-पूजामनुसृत्य काव्यविरचनविशिष्टशक्तिसम्पन्नेन मुनिश्रीकल्याणकीर्तिविजयेन संस्कृतभाषामयं तत्समपद्यमनूदितं **गुरुगुणसङ्कीर्तनं** प्रभूतमाह्लादजनकं विद्यते ।

श्रीअमृतपटेलाभिधविद्वन्महाशयेन लिखित: '**शासनसम्राट.... एकं लघुकवनम्**' नामक: लेखोऽपि सुष्ठुतर: हृदयङ्गमश्चाऽस्ति, एतद्वाचनेन वाचकस्य हृदये पूज्यपादशासनसम्राड्-गुरुभगवतामुपर्यपूर्वआदरभावोऽवश्यमुत्पन्नो भविष्यत्येव ।

तथा च श्रीकीर्तित्रयीमुनिवरै: पृथग्रूपेण विद्वच्चेतश्चमत्कृतिजनका: लिखिता: अपि समीचीना: सन्ति । किन्तु बलात् चित्ताकर्षणं करोति बाल्यात्तसंयमेन शास्त्राभ्यासपरिकर्मितमतिना मुनिश्रीत्रैलोक्यमण्डनविजयेन लिखित: शासनसम्राट्श्रीपरमगुरुभगवच्छिष्यप्रशिष्यसमुदायवर्ति-कतिचिद्विविधशास्त्रनिष्णातानेकविशिष्टग्रन्थरचनाकारकानां तत्तत्सूरीश्वराणां गुणवर्णनात्मक: लेख: । इति विधाय भूयो भूयोऽनुमोदनां विरम्यते ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाचकानां प्रतिभावः

## स्वस्ति

दृष्ट्वा नन्दनकल्पवृक्षमतुलं नन्दामि हृद्यप्रभं
विज्ञं संशयकल्मषापहरणं सन्तोषसन्तानदम् ।
श्रीमत्पार्थिवमौलिरत्नविलसत्पादस्य नेमिप्रभो-
र्माहात्म्येन सुवासितं सितयशोहंसालिकीर्णाम्बरम् ॥
पण्डितैः पूजितं लेखनै राजितं
भ्राजितं चित्रणैर्वीजितं सज्जनैः ।
नन्दनालङ्कृतिं कल्पकं सत्कृतिं
वीक्षमाणो नरो निर्भरं मोदते ॥
कीर्तित्रयी यस्य मूलं स व्याप्नोति जगत्त्रयीम् ।
श्रीनन्दनकल्पतरुः सर्वाभीष्टफलप्रदः ॥

**एच्. वि. नागराजराव्**
90, 9th Cross, Navilu Raste,
Kuvempunagar,
MYSORE

## वाचकानां प्रतिभावः

परमादरणीयाः
श्रीविजयशीलचन्द्रसूरिवर्याः ।
सादरं प्रणतयः ।

ह्यः 'नन्दनवनकल्पतरुः २०' प्राप्तः । शुभ्राणि स्निग्धानि सुन्दराणि च पत्राणि ! दोषरहितं मुद्रणकार्यम् !! सचित्रा च गुरुवरगाथा !!! अहो रमणीयता अस्य विशेषाङ्कस्य ।

मम सद्भाग्यं यत् ईदृग्विधानामुदात्तचरितानां श्रीविजयनेमिसूरीश्वराणां जीवनकथासरितावगाहनम् अनायासमेव सञ्जातम् ।

भवतां सर्वेषां निर्व्याजस्नेहभाजनतां गतोऽस्मि इत्यनुभूय सुतरां प्रसन्नता सञ्जायते मे मनसि ।

**अनिल र. द्विवेदी**
३०३-ऋषि एपार्टमेन्ट्स, २, आनन्द कोलोनी, जामनगरम्-३६१००८



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अनुक्रमः


| कृतिः | कर्ता | पृष्ठम् |
|---|---|---|
| **शासनसम्राड्विशेषः** | | |
| श्रीविजयनेम्यभ्युदयमहाकाव्यम्-भूमिका | विजयशीलचन्द्रसूरिः | २ |
| श्रीविजयनेम्यभ्युदयमहाकाव्यम् | आचार्यश्रीविजयउदयसूरिः | ५ |
| श्रीमदाचार्यवर्यविजयनेमिसूरीश्वरगुर्वष्टकम् | विजयनेमिसूरीश्वरशिष्यः पं.श्रीप्रतापविजयः | ६२ |
| गुरुस्तुत्यष्टकम् | विजयशीलचन्द्रसूरिः | ६५ |
| परमगुर्वष्टकम् | विजयशीलचन्द्रसूरिः | ६७ |
| अज्ञातकर्तृकं श्रीनेमिसूरीश्वरस्तुत्यष्टकम् | | ६८ |
| सद्धर्मदं विजयनेमिमहं प्रणौमि !! | प्रा. अभिराजराजेन्द्र मिश्रः | ७० |
| विजयनन्दनसूरिप्रशस्तिः | स्व. कविभालचन्द्रः | ७२ |
| पूज्यपादशासनसम्राट्श्रीपरमगुरुभगवतां प्रथमं दर्शनम् | आ. विजयहेमचन्द्रसूरिः (देवशिशुः) | ७५ |
| सर्वं सत्त्वे प्रतिष्ठितम् | मुनिरत्नकीर्तिविजयः | ७८ |
| वचनसिद्धिः | मुनिधर्मकीर्तिविजयः | ८० |
| **भज जिनराजम्** | मुनिकल्याणकीर्तिविजयः | ८४ |
| **सरस्वत्या वन्दनम्** | डॉ. आचार्यरामकिशोर मिश्रः | ८५ |
| **गलज्जलिकाः ( ३ )** | प्रा. अभिराजराजेन्द्रमिश्रः | ८६ |
| **पत्रम्** | मुनिधर्मकीर्तिविजयः | ९० |
| **स्मरणम्** | मुनिधर्मकीर्तिविजयः | ९५ |
| **अनुवादः** | | |
| सौन्दर्यस्य नवं द्वारम् | मुनिरत्नकीर्तिविजयः | ९७ |
| **कथा** | | |
| कथात्रयी | मुनिकल्याणकीर्तिविजयः | १०३ |
| स आसीन्मम तातपादः | प्रा. अभिराजराजेन्द्रमिश्रः | १०६ |
| कण्ठाभूषणम् | डॉ. आचार्यरामकिशोरमिश्रः | ११९ |
| **मर्म-नर्म** | कीर्तित्रयी | १२० |
| **प्राकृतविभागः** | | |
| पाअुअपाअुडम् - प्राकृतप्राभृतम् | अरैयर् श्रीरामशर्मा | १२३ |
| **कहा** | | |
| पाइयविन्नाणकहा | आचार्यविजयकस्तूरसूरिः | १३६ |




Jain Education International For Private & Personal Use Only www.jainelibrary.org



शासनसम्राड्-विशेषः – २

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्रीविजयनेम्यभ्युदयमहाकाव्यम्

## भूमिका

विजयशीलचन्द्रसूरिः

जैनधर्मः परिपूर्णः प्रकृतिरक्षापरायणो धर्मः । जिन-दैवता जना जैनाः । जिनश्च राग-द्वेष-मोहजेता यः कश्चिदपि भवति सः । अहिंसा अस्य धर्मस्य मौलः सिद्धान्तः । नैकोऽपि जीवो हन्तव्यः उपद्रोतव्यः; मनसाऽपि न, वाचाऽपि न, कायेनाऽपि न, इत्येतत्तस्य हार्दम् । 'सर्वेऽपि जीवा जीवितुमिच्छन्ति, न मर्तुम्', अतो यत्र चेतना विद्यते, तस्य रक्षा करणीया, हिंसा नैव कर्तव्या- इति जैनानां मतम् ।

जैनसिद्धान्तः पृथिव्यां, जले, अग्नौ, वायौ, वनस्पतिषु चाऽपि चैतन्यस्य सत्तां स्वीकरोति । अतो न तेषां तत्त्वानामकारणमुपयोगः, तदर्थं तेषां वधश्च करणीयत्वेन ते स्वीकुर्वते । प्रकृतिश्च एभिरेव पदार्थैर्व्याप्तेति जगत्प्रसिद्धम् । अत एषां जीवानां यदा रक्षा क्रियते, तदा स्वयमेव पृथ्वी-पर्वत-मृत्तिकादीनां धातूनां च, नदी-समुद्रादिरूपाणां जलाशयानां, वनस्पतिसमूहस्य वृक्षादीनां वनानां चैतदाश्रितानां जलचर-नभश्चर-स्थलचरादिजीवसृष्टेश्च रक्षणं स्यादेव । फलतः प्रकृतेः पर्यावरणस्य च रक्षया जगतः सौस्थ्यं स्वत एव वर्तते सर्वदा ।

जैनवर्गेण यदा जीवदया स्वीकृता उपदिष्टा च, तदा तेन प्रकृतेः सन्तुलनमपि परोक्षरूपेण स्वीकृतमेव । अत एव कथ्यते-जैनधर्मः सम्पूर्णतया प्रकृतिरक्षको धर्मः, अत एव विश्वधर्मत्वपदार्पणयोग्योऽपि सः ।

एतादृशधर्मस्य साम्प्रतीनः प्रवर्तकः श्रमणो भगवान् महावीरः । तेनोपज्ञो मार्गोऽयं तदीयसुशिष्यपरम्परयाऽद्यावधि निराबाधं प्रवर्तितः । 'हिंसा, परपीडनं चाऽधर्मः, अहिंसा, दया, करुणा चैव धर्मः' इत्यात्मकोऽयं जिनमार्गोऽद्यापि विश्वे पोस्फुरीति, इत्यत्र विषये जैनगुरुपरम्पराया एव पुरुषार्थः । यदि संसारत्यागि-वैराग्यरसिक-गुरुपरम्परा न स्यात्, तदा जगति सम्प्रति अहिंसामार्गस्य गन्धोऽपि नैव स्यात् ।

एतस्यां परम्परायां श्रीसुधर्मस्वामिभगवत आरभ्य सङ्ख्यातीता गुरवः-आचार्याः श्रमणाश्च सञ्जाताः, यैर्मार्गनिर्वाहो मार्गाविच्छेदश्च नितरां विहितः । एतस्यामेव धर्मपरम्परायां विंशतितमे शतके समजनि जैनाचार्यः श्रीविजयनेमिसूरीश्वरः । जैनशासन-साम्राज्ये स



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्राडिव व्यराजत, तस्य बिरुदमपि "शासनसम्राट्" इत्यासीत् । जैनश्रमणसङ्घे श्रमणानां नैके गणा आसन्; तेषु विशालकायस्य विपुलमहिम्नश्च तपागच्छेत्याख्यस्य गणस्य स गच्छपतिरभूत् । सर्वदर्शनविशारदः, नव्य-प्राच्यन्यायग्रन्थाभ्यासी, व्याकरण-काव्य-साहित्यशास्त्रवेत्ता, नैकग्रन्थप्रणेता, जैनागमज्ञः, व्याख्यातृवाचस्पतिरासीत् सः । तस्य द्वे लाक्षणिकते अनन्यसामान्ये अवर्तेताम् । एकं नैष्ठिकं ब्रह्मचर्यम् । अपरा परिणामगामिनी दूरदर्शिता । अनेकेषां जैन-पुरातन-तीर्थस्थानानां पुनरुद्धारः पुनःप्रतिष्ठा च तेन सूरिवरेण कृता । तस्मिन् कार्ये तेन प्राणान्तकारिण उपद्रवा अपि नैकशः सोढाः । जीवदयायाः कार्याणि बहुशः कृतवान् सः । विद्वत्प्रकाण्डानि चारित्रगुणसम्पन्नानि शिष्यरत्नान्यपि निर्मितवान् सः । भारतदेशे विद्यमाना अनेके भूपालास्तस्य गुणरागिणो भक्ता आसन् । जैनसङ्घस्य समर्थो महानायकः स आसीत् । महाकाव्यस्य कस्याऽपि नायकत्वं निर्वोढुं स नितान्तं क्षम आसीदिति तस्य समग्रजीवनमवलोक्याऽभ्यस्य च निश्चीयते निर्विवादम् ।

तस्य सूरिवरस्य प्रधानशिष्य आसीत् श्रीविजयोदयसूरिनामा आचार्यः । चारित्रपवित्रगात्रो विद्वन्मतल्लिका सकलशास्त्रपारदृश्वा स सूरिरत्यन्तं गुरुभक्तिपरायणो गुर्वाज्ञानिष्ठश्च सत्पुरुष आसीत् । तेनाऽपि विविधा ग्रन्था विरचिता एव ।

तस्यैका रचनाऽद्यावधि अज्ञाताऽप्रसिद्धा च वर्तते । सा रचना एकं महाकाव्यम् । नामतः "**नेम्यभ्युदयमहाकाव्यम्**" अपूर्णं सप्तसर्गमात्रमवाप्यते तत् । किन्तु यावन्मात्रमुपलभ्यते तत्, तत्राऽपि महाकाव्यस्य सर्वाणि लक्षणानि दृश्यन्ते, कर्तुः प्रतिभोन्मेषोऽपि सुतरां प्रकटीभवति । स्वकीयगुरुवर्यश्रीविजयनेमिसूरीश्वरं विषयीकृत्य रिरचयिषितस्य महाकाव्यस्याऽस्य यावन्मात्रोंऽश उपलब्धस्तावानत्र प्रकाश्यते, यं दृष्ट्वा वैराग्यरसिक-जैनमुनिरपि कीदृशं रसप्रचुरमलङ्कृतिमधुरं प्रासादिकं च काव्यं रचयितुमलम्भवतीति विद्वांसो ज्ञास्यन्ते । सम्पादकीया मर्यादा तूपेक्षार्हा एवेति विज्ञप्तिः ।

किञ्चाऽस्य काव्यस्यैकैव लिखिता प्रतिः प्राप्यते, सा च केनचिद् गृहस्थलेखकेन लिखिताऽस्ति । अतश्च तत्र काश्चिद् लेखनक्षतयोऽपि सम्भवन्ति । अस्माभिस्ता अशोधयित्वैव यथातथमिदं प्रकाशितमस्तीति विद्वद्भिर्मर्षणीयम् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org



श्रेयः श्रियं वितनुतां [illegible] पुनानः ॥
श्रीकण्ठ[illegible] यस्य [illegible] कण्ठ[illegible]
[illegible] विधिप्रणेता वन्दे [illegible] ॥
[illegible] ॥ विजयनेम्यभ्युदयमहाकाव्यम् ॥ (चरितम्)
सर्गः प्रथमः ॥
मङ्गलाचरणम् [illegible] ॥ ([illegible])

[illegible] कण्ठविलुठद् [illegible] भासा यो पातयन् [illegible]
[illegible] वन्दे तमाद्यमह मादिविभुं [illegible] ॥
प्रागल्भ्यमाप्नुमतुलं स्वयमेव शान्तिं यं शान्तनैकरसमाप विशुद्धमूर्तिम् ॥
शान्तिं तनोतु [illegible] जिनो नु [illegible] यस्याभिधानमपि शान्तिकरं प्रसिद्धम् ॥२॥
यो मोहनेमि [illegible] नेमिः ॥
भूताभयप्रद [illegible] मार्गे नेमिं [illegible] ॥३॥
यो नित्यमर्चित [illegible] नाथ पार्श्वः [illegible] विपुलकीर्तिमतीति पार्श्वः ॥
[illegible] पार्श्वः [illegible]
यस्यागमो [illegible] ॥
यः [illegible] ॥५॥
तीर्थेश्वरान् [illegible] गुणविस्तार [illegible] ॥
नाथत्वमापुरहितार्तिनिपीडितानां [illegible] ॥
साक्षात् प्रभोर् [illegible] ॥
[illegible] श्रीगौतमादिगणनायकतो [illegible] ॥७॥
[illegible] श्रीभारती विबुधपू[illegible] ॥
या श्री जिनेन्द्रवचनोत्थ [illegible] ॥
[illegible] ॥
सत्त्वं [illegible] भाति ॥९॥
[illegible] गुणगणः [illegible] समस्तः ॥
सूरीश्वरान् [illegible] ॥
पीत्वा यदीयवचनामृत [illegible] भव्या भावन्ति भवतापहराः [illegible] ॥
शीतांशु [illegible] ॥११॥

विजयनेम्यभ्युदयमहाकाव्यस्य रचयितृभिः श्रीविजयोदयसूरीश्वरैः प्रथमालेख्यतया स्वयं लिखितस्य पत्रस्य प्रतिकृतिरियम्।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

# श्रीविजयनेम्यभ्युदयमहाकाव्यम् ॥

रचयिता : आचार्यश्रीविजयउदयसूरिः

## प्रथमः सर्गः ॥

ॐ नमोऽनन्तबोधाय विलीनाशेषकर्मणे ।
अबाध्यागमबीजाय मङ्गलायाऽर्हतेऽभितः ॥ १ ॥

**(उपजातिश्छन्दः)**

प्रभासमानोऽपि विभासमानो, योऽज्ञैरनाप्योऽपि बुधैरवाप्यः ।
अनाथनाथोऽपि स **आदिनाथो**, जीयाद् विभुः सिद्धमितप्रतिष्ठः ॥ १ ॥
यद्वर्णनेऽनन्वय इत्यलङ्क्रिया, भूतार्थतैवाऽद्भुतशब्दसंस्क्रिया ।
स्वकर्त्रसामर्थ्यप्रकाशनं गुणः, समेऽपि ते सन्तु जिना हितप्रदाः ॥ २ ॥
अनन्वयेनैव यमामनन्ति, स्तुवन्ति गायन्ति यमादिभाजः ।
नामाऽऽकृतिभ्यां स दधद् विभेदं, समो जिनो भिन्दतु विघ्नवल्लीम् ॥ ३ ॥
व्यक्त्या विभिन्नत्वमुपागतं य-ज्ज्ञानादिशक्त्या समभावमाप्तम् ।
तद् द्रव्यभावानुगतं समस्तं, ज्योतिर्जिनाख्यं हरतादघानि ॥ ४ ॥
पायादपायाद् भवसम्भ्रमोत्थात्, तीर्थङ्करः षोडश**शान्तिनाथः** ।
यन्नाममन्त्रस्मरणप्रभावात्, सिध्यन्ति सर्वाणि समीहितानि ॥ ५ ॥
**वीरः** स वोऽव्याद् नियतेर्नियोगाद्, बम्भ्रम्यमाणान् भववारिराशौ ।
योऽशेषभावारिविधूननेन, लब्धप्रतिष्ठोऽमलसिद्धिसौधे ॥ ६ ॥
श्रीमज्जगन्नाथमुखोद्गतां यः, प्राप्याऽनवद्यां त्रिपदीं विशिष्टाम् ।
सूत्राण्यकार्षीदमितार्थभाञ्जि, स **गौतमः** पातु गणाधिनाथः ॥ ७ ॥
सा **वाक्** त्रिपद्या जगतीमशेषां, स्वानन्यया व्याप्नुवती निजां च ।
ज्ञप्तिं तथैवाऽऽदधती नयाढ्या, स्याद्वादभव्या जयताज्जिनानाम् ॥ ८ ॥
भीत्येव येषां गुरुराश्रितो द्यां, नाऽद्यापि भूमौ स्वपदं दधाति ।
ते **सिद्धसेनार्क**मुखा यतीन्द्रा, जयन्ति शास्त्रग्रथनप्रवीणाः ॥ ९ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नव्योक्तिसंसूत्रणसूत्रधारा-श्चिरन्तनोक्त्यादरबद्धचित्ताः ।
श्रीमद्**यशोवाचक**पुङ्गवाद्या, जयन्त्यनेकान्तकृतान्तचान्ताः ॥ १० ॥
अणुत्वसीमानमुपागतेऽपि, गुणे परस्योच्चतरत्वमुच्चैः ।
यैर्वर्ण्यते संसदि सज्जनानां, ते सज्जनाः कस्य न वर्णनीयाः ? ॥ ११ ॥
दोषाकरस्याऽतिजडत्वभाजो-ऽप्यनल्पपक्षक्षयलम्पटस्य ।
परस्य पूर्णोदयतोऽप्यवस्थां, निजां जहत्यर्णववन्न सन्तः ॥ १२ ॥
दोषानणूनप्यचलोच्चतां ये, नयन्ति निःशेषगुणापलापात् ।
परापकारव्यसनादरा वै, ते दुर्जनाः सन्ति न किं कियन्तः ? ॥ १३ ॥
अनाहतस्वान्यविभेदलेश-स्तिरस्कृताशेषफलाभिलाषः ।
एकान्तदोषादृतचित्तवृत्ति-र्योगीव मान्योऽत्र खलो जनानाम् ॥ १४ ॥
परोपकारव्यसनो यथैकः, परापकारैकरतस्तथाऽन्यः ।
आदौ स्वरन्त्याऽऽदिममेव कुर्वन्, खलः स्वकार्ये न कथं विशिष्टः ? ॥१५॥
दोषप्रकाशोन्मुखतो भियेव, यस्मादशिक्षोपनतं जनानाम् ।
समीक्ष्यकारित्वमतीव सूक्ष्मे, कार्येऽपि मान्यः स खलो हितेच्छुः ॥ १६ ॥
तत्कर्मनैपुण्यबलात् तदैक्यं, गतोऽपि यत्काव्यकलानवाप्तेः ।
काव्यो ह्रियाऽधोभुवने प्रविष्टः, स **कालिदासो** न कथं प्रशस्यः ? ॥ १७ ॥
वेदान्तशास्त्रादिरहस्यवित्त्वं, यत्काव्यमावेदयति स्वकर्तुः ।
स काव्यमर्मज्ञगणैरुपास्यः, स्वकर्मसिद्ध्यै **भवभूति**रेकः ॥ १८ ॥
यत्काव्यमाधुर्यरसस्य लेशं, स्वस्मिन्नदृष्ट्वैव सुधाऽऽप्तलज्जा ।
गता सुदूरं कलिकालसर्व-ज्ञो **हेमचन्द्रः** स न कस्य सेव्यः ? ॥ १९ ॥
यस्याऽऽप्तमूर्त्तिर्यश एव साक्षात्, सा **मञ्जरी** स**तिलका** चकास्ति ।
स सुप्रसिद्धो **धनपाल**नामा, **भोजा**प्तमानः स्मरणीय एव ॥ २० ॥
सूरोऽपि गोभिर्भजते प्रवृद्धो, यं यत्र गोभिर्जडताऽपनेया ।
**माघः** कथङ्कारमसौ न वर्ण्यो-ऽनवद्यमार्गाश्रयतत्परेण ॥ २१ ॥
यत्काव्यमर्थावगतिप्रकारैः, सन्नीतिमध्यापयतीव भाति ।
स **भारविः** किं न गुरोरनूनं, वाग्वैभवं स्वीयमुदाजहार ॥ २२ ॥
सरस्वती यत्कविताविताने, सञ्चारिणी सर्वत एव भाति ।
अनल्पकल्पोचितकल्पनायां, **श्रीहर्ष** एकः स पटुर्बभूव ॥ २३ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

निपीय यत्काव्यरसं कवीन्द्रा, मुधा सुधावस्थितिमामनन्ति ।
**बाणः** स वाणीपरिणाम एव, प्राप्तावतारो वल(?बलि?)भिद्गुरुर्वा ।। २४ ।।
**बृहत्कथाम्भोधि**विधानतो यः, कासारतामन्यकथासु चक्रे ।
वैयासकीं गामपि सारशून्यां, यथार्थनामा स **गुणाढ्य** एकः ।। २५ ।।
सत्सन्निधानेन विशिष्टता स्या-देतद् यथार्थं यदि वाऽयथार्थम् ।
एतत्परीक्षा मम चेतसि स्यात्, स्मृत्या यतोऽमी कलिताः प्रसङ्गाः ।। २६ ।।
**श्रीनेमिसूरेः** क्व तता गुणाली ?, क्व मन्थरा मे प्रतिभा वराकी ?
तथाऽपि तद्वर्णनसाहसिक्यं, तनोति चित्रं किमु नो ममेदम् ? ।। २७ ।।
तथाहि **जम्बू**पपदेऽन्तरीपे, द्वीपावतंसत्वमुपागतेऽस्मिन् ।
आर्यप्रचारे **भरते**ऽस्त्यवामे, **सौराष्ट्रदेशो** जनताप्रसिद्धः ।।युग्मम्।। ।। २८ ।।
यद्दर्शनं भव्यजनैकलभ्यं, यस्मिन् गता सिद्धिमनन्तजीवाः ।
यत्र त्रयोविंशतिराप्तमुख्या-स्तीर्थङ्कराः सङ्गतिमाश्रयन्ति ।। २९ ।।
**सिद्धाचलः** सोऽपि यदीय**पाद-लिप्ता**तिसान्निध्यमुपैति नित्यम् ।
स तीर्थराजास्पदतां दधानः, श्लाघास्पदं कस्य न जायतेऽत्र? ।युग्मम्। ।।३०।।
स **सोमनाथः** परतैर्थिकानां, तीर्थाधिराजत्वमवाप यत्र ।
स '**काठियावाड**'पदप्रसिद्धो, लोके सदाचारशुभप्रचारः ।। ३१ ।।
यद्देशविस्तारघटाऽनवाप्तेः, सुराधिराजो विषये स्वकीये ।
देशाभिधानं परिहृत्य बुद्ध्या, पुराभिधानं प्रकटीचकार ।। ३२ ।।
धेनूर्घटोघ्नीरमृतानि कामं, नित्यं क्षरन्तीरवलोक्य यत्र ।
स्वकामधेनुत्वविलोपभीत्या, नूनं श्रिता कामगवी विदेशम् ।। ३३ ।।
सुतां जितां कामदुघा(घां) विषण्णां, क्षीराम्बुधिर्यत्र विलोक्य गोभिः ।
गास्ता विजेतुं बहुधा विचक्रे, स्वमेव मन्ये महिषीस्वरूपैः ।। ३४ ।।
स्वादिष्टतापात्रतयाऽतिशेते, गोधूमकान्नं किमु बर्ज्जरी नो ? ।
यत्राऽतिशेते विषयान्तरोत्थं, गोधूमकाद्यन्नमनन्यजाति ।। ३५ ।।
साधर्म्यवात्सल्यपरास्तु यत्र, मिष्टान्नपानाद्युपभोगदक्षाः ।
अन्योऽन्यमैक्यादुपभुञ्जतेऽर्थान्, जनाः स्वधर्माचरणप्रवीणाः ।। ३६ ।।
यत्राऽऽततक्षेत्रगतारघट्टाः, पान्थान् तृषार्त्ताननितितापतप्तान् ।
आहूय शब्दैः श्रुतिमोददक्षै-र्द्राक् पाययन्ते स्वमृतानि कामम् ।। ३७ ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुर्भिक्षनामाऽपि न जानते वै, यत्राऽरघट्टैः कृषिकर्मदक्षाः ।
विशिष्टविज्ञानकलासु दक्षा, धर्मैकलीनाः कृतिनोऽपि यत्र ।। ३८ ।।
तस्मिन् पुराणां तिलकायमाना, पुरी प्रसिद्धा **मधुपुर्य**भिख्या ।
ख्यातिं गता या **महुवे**ति लोके, कश्मीरदेशभ्रमकारिणी च ।। ३९ ।।
ममोपमित्या परिखाप्रशंसां, समाद्रियन्तेऽन्यपुरीषु विज्ञाः ।
तत्किं स्वयं तां न लभे समुद्र, इतीव यस्याः परिखा बभूव ।। ४० ।।
अन्योऽन्यसंसक्तसुधावदात-प्रासादपङ्क्त्याऽपथदुष्प्रवेशा ।
प्राकारतः कुण्डलनां न सेहे, याऽनर्थताभ्रान्तिकरीं निजस्य ।। ४१ ।।
श्रीमन्**महावीर**विभोः स्वकाल-निर्मापिता मूर्तिरतीव भव्या ।
यस्यां विभाति स्फटिकावदाता, तीर्थोत्तमत्वं प्रतिपादयन्ती ।। ४२ ।।
यां धर्मभूमिं सुकृतैकलभ्या-मनल्पसद्भोगविधानदक्षाम् ।
स्वतोऽधिकां वीक्ष्य पुरी बलारे-रात्मन्यवज्ञां किमु नो विधत्ते ? ।। ४३ ।।
सौभाग्यलक्ष्मीमवलोक्य यस्याः, किं नाऽलका स्वां विजितामवैति ? ।
भोगावती सा तत एव नूनं, पातालवासं वरमभ्युपैति ।। ४४ ।।
लङ्काऽप्यलङ्कामपि वीक्ष्य लक्ष्मीं, यस्याः समुद्रान्तरिता निजस्य ।
अगम्यतां कामयते सदैव, विभूतिविख्यात्यवनप्रगल्भाम् ।। ४५ ।।
आलम्बशून्ये व्रजतः सदैव, रवेः क्षणावस्थितिशर्महेतोः ।
अत्युन्नता यत्र धृतावचूला, प्रासादमाला धवला विभाति ।। ४६ ।।
नाऽस्यां प्रवेशोऽभिशिवः सुखाय, पाटच्चराद्यास्तदितोऽतिदूरम् ।
यातेति सञ्ज्ञां पटकम्पनेन, कुर्वन्ति यस्यां ननु वैजयन्त्यः ।। ४७ ।।
यन्नालिकेरद्रुवनं विशालं, शक्यं परिच्छेत्तुमियत्तया नो ।
तन्नालिकेरप्रथितान्तरीप-शङ्कां विधत्ते पथिकस्य यस्याम् ।। ४८ ।।
नूनं तदीयानि फलानि लक्ष्मी-र्माधुर्यलुब्धा स्पृहयोपभुङ्क्ते ।
लोके ततः श्रीफलताप्रसिद्धि-र्निर्णीतिरित्थं पथिकस्य यस्याम् ।। ४९ ।।
स्वाभिन्नपङ्क्तौ विनिवेशितानि, मूलानि यस्यां पनसादिकानाम् ।
मानोन्नतान्यप्युपमेयभावं, किं नारिकेलद्रुफलैर्न यान्ति ? ।। ५० ।।
अनल्पमूल्येष्वपि तेषु यस्यां, पणाणकादि द्वितयादि मूल्यम् ।
अतिप्रभूतत्वमुपैति तत्र, निमित्तभावं न जनाविवेकः ।। ५१ ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रम्भाफलादेरपि मूल्यचर्चा, प्रभूतसम्भूतिकृता तथैव ।
यत्राऽऽढकादिप्रमितः सुशाकः, पपौकलभ्यो भवति स्वकाले ॥ ५२ ॥
कम्रामृतस्वादुरसानि यत्र, फलानि चूतस्य मनोहराणि ।
आस्वाद्यमानानि न कस्य भोक्तुः, फलान्तरप्रेम विनाशयन्ति ? ॥ ५३ ॥
समानवृत्तिः पुरुषोत्तमानां, लक्ष्म्यां च वाण्यां च सदैव यस्याम् ।
विशेषवृत्तिप्रतिपत्तिभाजां, वैकुण्ठवृत्त्याऽपि नदीनयोगः ॥ ५४ ॥
अनादिकालान्मयि सम्प्रवृद्धा, गम्भीरता याऽपहृता भवद्भिः ।
सा मे प्रदेयेति नरानजस्रं, याच्त्रापरो यत्र विभाति सिन्धुः ॥ ५५ ॥
चापल्यदोषो मम पुत्रिकाया-आजन्मतो योऽभवदिन्दिरायाः ।
तद्धानिरत्रेत्युपजातमोदो, यामम्बुराशिर्निकषा चकास्ति ॥ ५६ ॥
या मे सपत्नी मुखरा प्रगल्भा, साऽप्यत्र वाणी विनयप्रधाना ।
तच्चञ्चलाऽहं न भवामि पूज्ये-तीवेन्दिरा यत्र न चञ्चलाऽभूत् ॥ ५७ ॥
विपक्षपक्षोन्नतिदीक्षितेऽस्मिन्, कलौ न कार्यो मयका प्रसङ्गः ।
इतीव यस्यां न कलेः प्रवेशं, धर्मोऽनुमेनेऽस्खलितप्रभावः ॥ ५८ ॥
सर्वात्मना वृद्धिमुपागतोऽपि, नैकः समर्थोऽभिमतार्थसिद्धौ ।
इत्याकलय्येव दयादिधर्मो-ऽप्यन्योन्यमैत्रीं प्रकरोति यस्याम् ॥ ५९ ॥
गृहे गृहे यत्र नयप्रचारः, समानचर्चोऽमितभङ्गनद्धः ।
सापेक्षभावेन गलद्विरोधः, स्याद्वादसाम्राज्यमुरीकरोति ॥ ६० ॥
गुणाश्रिताद् द्रव्यत एव कर्म, सामान्यतोऽभ्येति विशेषसङ्गम् ।
यस्यां सुधीरित्थमुदीक्ष्य तन्त्रे, वैशेषिके किं न करोत्युपेक्षाम् ? ॥ ६१ ॥
यां कम्ररत्नप्रकरामवाप्य, सर्वंसहात्वव्रतपुण्यजाताम् ।
वसुन्धरा स्वां वसुमत्यभिख्यां, जानाति नोऽन्वर्थवती किमेषा ? ॥ ६२ ॥
एकोऽपि यस्या **'झगडू'** प्रथायाः, **प्राग्वाटवंश**प्रथितोऽलमृद्धः ।
यः पञ्च रत्नानि बभार येषा-मेकैकशः कोट्यधिकं च मूल्यम् ॥ ६३ ॥
**कुमारपाल**स्य नृपस्य तीर्थ-यात्राप्रसङ्गेन समागतस्य ।
**सिद्धाचले** यश्च चकार चित्रं, माला गृहे रत्नसमर्पणेन ॥ ६४ ॥
एकं तु तत्रैव वितीर्य चैकं, **तत्पत्तने**ऽन्यत् **गिरिनारतीर्थे** ।
रत्नद्वयं चाऽथ नृपाय प्रादात्, **कुमारपाला**य य आर्हताग्र्यः ॥ ६५ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवंविधा यत्र सहस्रशोऽन्ये, पुरा बभूवुर्जिनधर्मनिष्ठाः ।
येषां कुले तद्धनलिप्सया किं, जन्माभिवाञ्छा धनदस्य नाऽभूत् ? ॥ ६६ ॥

रथ्यासु यस्याः पतितानि कामं, रत्नानि वर्षाजलसम्प्रयोगात् ।
आदाय भूयो जलधिर्जनानां, चिरेण रत्नाकरतामगच्छत् ॥ ६७ ॥

षण्णामृतूनामपि सर्वदैव, यस्यां स्वकोशोपचयप्रवृत्तेः ।
सर्वर्त्तुपुष्पोत्थमधुप्रवृत्त्या, नूनं प्रपन्ना **मधुपुर्य**भिख्या ॥ ६८ ॥

सर्वर्तुसाम्राज्यमवाप्य यस्यां, मधुः सदा सन्निधिमातनोति ।
तेनैव वा किं **मधुपुर्य**भिख्या, तद्राजधानीत्वप्रसिद्धिहेतोः ? ॥ ६९ ॥

यस्यां जनानां व्यसनं स्वधर्म-शास्त्रावमर्शे मिथ एव भाति ।
रागः स्वधर्माचरणेऽत्यमर्षो, निर्वाणमार्गप्रतिबन्धकेषु ॥ ७० ॥

सराजकत्वं नगरस्य भूषे-त्यवेत्य या स्वत्वमुरीकरोति ।
सन्नीतिमार्गैकरतस्य नैवं(च), रक्षाकृते **भावपुरा**धिपस्य ॥ ७१ ॥

नृपोऽपि धीमान् **यशवन्तसिंहो**-ऽरक्षत् पुरीं यामनु **तख्तसिंहः** ।
न्यायैकनिष्ठोऽनु च **भावसिंहो**, वर्णाश्रमाचारविवेकदक्षः ॥ ७२ ॥

तापर्त्तुकाले निजराजधानीं, त्यक्त्वा नृपोऽमात्यनिवेशितार्थः ।
यामेत्य यां निर्वृतिमाततान, **कश्मीरदेशे**ऽपि न सा सुलभ्या ॥ ७३ ॥

नृलोकपालस्य विलोक्य सौख्यं, यस्यामसामान्यवनीविलासे ।
शक्रोऽपि किं नन्दनकानने नो, वैरस्यमुद्रां प्रकटीचकार ? ॥ ७४ ॥

तस्यां पुरौ(?) कीर्तिप्रतापभाजां, वणिग्वराणां प्रथितोऽस्ति वंशः ।
**श्रीमालवंशो** जिनधर्मभक्ति-विश्रान्तिभूमिः परधर्ममुक्तः ॥ ७५ ॥

श्रीनाममाना(ला?)मलनामतोऽस्ति, त्रिधाऽपि वाच्या कमला तु यस्मिन् ।
धनप्रभूतिर्वरकीर्तिभूतिः, सद्धर्मशोभेति-भिदा चकास्ति ॥ ७६ ॥

न जैनधर्मेतरधर्मचर्चा, कदाऽपि केनाऽपि निभालिताऽस्ति ।
यस्मिन्नितीमां बिरुदस्य लक्ष्मीं, **'वीशे'** त्युपाह्वो ननु सन्दधाति ॥ ७७ ॥

तस्मिन्नपि प्रौढिमधाम **पद्मा-तारा**कुटुम्बो जनताप्रतीतः ।
यदर्धनामान्वयतोऽपि लक्ष्मी-र्लोके न किं गौरवमादधाति ? ॥ ७८ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्राऽभूद्**देवचन्द्रो**ऽनुपमगुणनिधिः श्राद्धधर्मानुरक्तो-
ऽर्हत्पूजाबद्धवृत्तिः सुकृतपरिणतेर्यो द्वितीयो विलासः ।
**लक्ष्मीचन्द्र**स्तनूजोऽमलमतिनिलयस्तस्य जज्ञे गुणानां
विश्रान्तिस्थानमात्मप्रतिकृतिरपरो जैनधर्मैकनिष्ठः ॥ ७९ ॥

गाम्भीर्ये योऽम्बुराशिः कुलयुगकमलोल्लासने पद्मबन्धु-
र्दोषादिव्रातपक्षप्रवरविघटने ख्यातकीर्तिः सुरेशः ।
नीतिग्रामावमर्शे सुरगुरुरपरो धर्मचर्चाप्रवीणः
श्राद्धाचारेषु दक्षः पुरजनमहितोऽन्वर्थनामा स एकः ॥ ८० ॥

साधुभ्यः शास्त्रवार्ताश्रवणमनुदिनं योऽकरोद्धर्मवृद्ध्यै
सन्देहोच्छित्तये यो विबुधमुनिवरान् तत्तदर्थानपृच्छत् ।
सन्तोषानन्दमग्नो न च परविषयं यो जगामाऽर्थवृद्ध्यै
श्लाघापात्रं जनानामभवदनुपमं श्राद्धवर्यः स विज्ञः ॥ ८१ ॥

सत्सङ्गे यस्य रागोऽभिरुचिरनुदिनं धर्मकृत्यप्रसङ्गे
व्यासङ्गोऽन्योपकारे व्यसनमतितरां संश्रुतार्थावमर्शे ।
श्रद्धा वीरोक्तमार्गे नमनविरचना सद्गुरोः पादपद्मे
दानं पात्रेषु भोगो नियमितविषये सोऽभवत् कृत्यदक्षः ॥ ८२ ॥

यन्नामार्थोत्थशङ्काकचलितहृदयः सागरः किं नु साक्षाद्
दृष्टं(द्रष्टुं?) लक्ष्मीं च चन्द्रं निजसुतयुगलं तत्पुरस्योपकण्ठम् ।
आगत्यैवाऽत्यगाधं परिमितिविमुखं सत्तलावाप्तिशून्यं
गाम्भीर्यं यस्य दृष्ट्वा गलितनिजमदोऽवस्थितोऽभूत् सदैव ॥ ८३ ॥

**दीपाली** तस्य भार्या महितकुलभवा श्राविकाचारनिष्ठा
शीलालङ्काररम्या रमणचरणगाऽपांशुलानां वरिष्ठा ।
दक्षा गेहक्रियायामकपटहृदया मान्यसम्माननोत्का
साध्वीनां सत्प्रसङ्गे विनयपरवशाऽभूददीनस्वभावा ॥ ८४ ॥

***इति प्रथमः सर्गः ॥***

□



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथ द्वितीयः सर्गः ॥

### (वंशस्थविलं छन्दः)

करोतु कल्याणततिं जिनेश्वरः, समस्तभावारिबलप्रमर्दनः ।
अपश्चिमो **'वीर'** इति प्रथां गतो, निरर्गलज्ञानमयोऽनघागमः ॥ १ ॥
तयोः स्वधर्माचरणैकलीनयोः, कुलीनयोः प्रीतिजुषोर्मिथोऽभितः ।
अनल्पपुण्योदयसुप्रभावतो, बभूव पुत्रोऽथ सुलक्षणाश्चितः ॥ २ ॥
नवा-ऽक्षि-निध्ये-कमितस्तु (१९२९) वत्सरो, यदीयजन्मादिदिनादजायत ।
तिथिर्द्वितीया प्रतिपत्पुरस्कृता-ऽपराह्णयज्जन्मसुमङ्गला बभौ ॥ ३ ॥
किमूर्ज्जमाक्षो(?सो?)ऽपि दधन्नवीनतां, न शुक्लपक्षाश्रयतामगाहत ।
वरा विशाखाऽप्यतुलाङ्गसंश्रषा(?या?), सुयोगमासाद्य भृशं व्यराजत ॥४॥
शुभग्रहः स्वं गृहमास्थितो बभौ, निरीक्षमाणो निजसद्वुचा भृशम् ।
उपेत्य केन्द्रग्रहमप्यसूचयत्, परप्रकर्षं ननु यस्य जन्मगः ॥ ५ ॥
अमाऽपि दीपालिप्रभाविराजिता, सुपर्वतां पूर्वगता दधौ समा ।
अकृष्णपक्षोन्नतिमात्रवत् परे, यदुद्भवेऽनंष्ट भियेव कृष्णता ॥ ६ ॥
गृहे गृहे पञ्च दिनानि भूतले-ऽखिलेषु देशेषु बभूव मङ्गलम् ।
सुवस्त्रनेपथ्यविभूषणोज्ज्वला, नराश्च नार्यश्च चकाशिरे भृशम् ॥ ७ ॥
प्रमोदसम्पूरितमानसा जना, महोत्सवावाप्तिलसत्प्रभाश्चिताः ।
कुटुम्बसान्निध्यमवाप्य सादरं, स्वतन्त्रतां यज्जनुषा प्रपेदिरे ॥ ८ ॥
विशेषतस्तद्दिन एव सर्वतो, जनाः स्वधर्माभिनिबद्धमानसाः ।
स्वपूज्यदेवान् स्वगुरूंश्च सादरा, अपूपुजन् स्वस्वलसत्समृद्धिभिः ॥ ९ ॥
परस्परप्रीत्यनुरञ्जिता जना, मिथोऽमिलन्नन्वभवन्नथो मुदम् ।
तथाविधस्य प्रभवो विभूतये, भवत्यशेषस्य जनस्य हि ध्रुवम् ॥ १० ॥
स्वदानशौण्ड(ण्डी)र्यविवेकप्रेरिताः, स्वभूतिसामर्थ्यविलोपभीरवः ।
समागतानर्थिजनान् स्वकिङ्करान्, तदेष्टदानैः समप्रीणयन्न के ? ॥ ११ ॥
शुभाशुभोच्चावचसंस्थितग्रहा-वबोध्यप्राक्कर्मप्रपञ्चचित्रताम् ।
प्रकाशयत्यत्र जनस्य नाम तत्, स**'नेमचन्द्रे'**त्यभिधामधारयत् ॥ १२ ॥
अयं प्रकर्षावधिमत्र सर्वतो, जिनागमोक्ताखिलतत्त्वबोधतः ।
ध्रुवं सदाचारगणं न पिष्यती-त्यतोऽस्य नेमेत्यवधौ जगुर्जनाः ॥ १३ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनन्तधर्मात्मकवस्तुसत्प्रथा, प्रकार्यनेकान्तलसन्महापुरे ।
अयं नु प्राकारगतिं श्रयिष्यती-त्यतोऽस्य नेमेत्यथवा विदुर्बुधाः ॥ १४ ॥
कलानिधेरस्य कलानवाप्तितो, ध्रुवं स चन्द्रो विकलो दिने दिने ।
समेषु मासेषु प्रयात्यथार्थता-मवाचि नेमेति तदर्धतो बुधैः ॥ १५ ॥
जगत्सु प्रह्लादनमस्य जन्मना, समन्ततोऽजायत तन्निबन्धना ।
अकारि चन्द्रेत्यभिधार्थयोगिनी, निरुक्त्यभिज्ञैरिव वप्तृभिर्मुदा ॥ १६ ॥
अयं हि नेता भविता क्रियावतां, महत्त्वमुच्चैः सुधियां श्रयिष्यति ।
जगत्सु चन्द्रोज्ज्वलकीर्तिभाजनं, स **नेमचन्द्रे**त्यत ईरितो जनैः ॥ १७ ॥
स बालकोऽबालप्रभाकरप्रभो, विशालभालप्रभया विराजितः ।
विशिष्टसामुद्रिकलक्षणाञ्चितः, प्रकाशयन् स्वस्य विशिष्टतां जने ॥ १८ ॥
भवालिसेवासु वशा सरस्वती, यदात्मतादात्म्यमशिश्रियत् पुरा ।
प्रकाशनं तस्य प्रकर्तुमुद्यता, सुदन्तपङ्क्तिच्छलतो विनिर्ययौ ॥ १९ ॥
सुबालभावेऽप्यसमानतां दधन्, मुखं क्व बालस्य निरस्तलाञ्छनम् ।
अहं क्व पूर्णोऽपि कलङ्करूषितो, मन्ये विचार्येति शशी क्षयी ह्रिया ॥ २० ॥
मुखोपमावाप्तिकथाऽपि मे वृथा, न चाऽस्य पादोपमयाऽपि सङ्गतिः ।
इतीव वैराग्यमवाप्य पङ्कजो, वने निलीय स्थितिमाततान किम्? ॥ २१ ॥
उरःस्थले नाऽस्य समानता नवा, भवेन्ममोरःस्थल इत्यनिश्चये ।
सुदूरदेशाश्रयणं ममोचितं, विचार्य सिंहो गहनं वनं ययौ ॥ २२ ॥
पदोपसेवाप्रवणे मयि ध्रुवं, कदाचिदास्यैक्यमसौ विधास्यति ।
विचिन्त्य चेत्थं नखपङ्क्तिकैतवा-न्निशाकरो नूनमशिश्रियत्पदम् ॥ २३ ॥
अबालचन्द्रप्रतिमो दिने दिने, यथा यथाऽवर्धत बालकोऽन्वयम् ।
तथा तथा वप्तृमनोरथः समं, स्वधर्मवृत्त्याऽमलयाऽप्यवर्धत ॥ २४ ॥
तमद्भुतं तर्कवितर्कधीधनं, विलोक्य वप्ता कुलकीर्तिकेतनम् ।
सरस्वतीसद्मनि तत्पदाप्तये, न्ययोजयत् पाठकसन्निधौ द्रुतम् ॥ २५ ॥
स प्राप्तशिक्षो गणिते विशिष्टतां, वणिक्क्रियोद्योतकरे ययौ भृशम् ।
क्रमेण सप्तस्वपि देशभाषया, चितप्रबन्धेषु बभूव पण्डितः ॥ २६ ॥
स आङ्गलेऽपि प्रतिपत्तिमान्नयं, प्रवेशमापाऽनु विशेषशिक्षया ।
परीक्षितोऽनेकश एव शिक्षकै-र्न पूर्वकक्षामुदलङ्घयत् तथा ॥ २७ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स भूरिशस्तत्समयेऽपि बालको, वणिक्क्रियाद्यूतमुपादये तु तत् ।
यदत्र सट्टेति प्रसिद्धिमागतं, धनाप्तये श्रेष्ठिजनैः समाश्रितम् ॥ २८ ॥
निवार्यमाणो जनकेन तत्र सो-ऽप्रवर्त्तताऽऽत्मीयधनेन धीधनः ।
स्वबुद्धिवैशद्यविधानलालसो, नवस्वप्रेक्षी प्रबभूव तत्र तु ॥ २९ ॥
कुलद्वयोद्योतकरेण तेन यत्, प्रकाशिता प्रीतिरतीव पैतृके ।
न मातृके तेन प्रगल्भतापरा, पुमर्थसिद्धौ प्रविभाविताऽभवत् ॥ ३० ॥
स वप्तृसान्निध्यमुपासदत् सदा, निशासु सद्धर्मकथाश्रवोत्सुकः ।
उपाददे सारमगाधबुद्धितः, पितुर्विचारस्य विवेकलम्पटः ॥ ३१ ॥
स वृद्धसेवी गुणलिप्सुरादराद्, ययौ सदस्स्वात्मविचारशालिनाम् ।
न सा सभा तत्पुरगा तदाऽभवत्, न यत्र सान्निध्यमवाप सोऽदरः ॥ ३२ ॥
अबालचन्द्रप्रतिमे पितुर्यथा, बभूव प्रेमाऽत्र गुणोत्करोदये ।
न बालचन्द्रेऽप्यनुजेऽस्य तत्तथा, गुणो हि प्रेमास्पदमत्र सर्वतः ॥ ३३ ॥
अकुण्ठबुद्धिर्विषयेऽखिलेऽपि सः, प्रशंसितः सच्चरिते निजे जनैः ।
महाजनाचारपरायणो निजं, मनो न दध्रे विषये विगर्हिते ॥ ३४ ॥
बभूव काङ्क्षा पुनरस्य धीमतो, गृहस्थता मे ननु सा न रोचते ।
न यत्र नव्येष्टकलाप्रवीणता, न मानना चाऽऽङ्गलकोविदेषु वा ॥ ३५ ॥
अहं यदि स्यां भवभोगलालस-स्तदाश्रये किं न नवीनपद्धतिम् ।
न तां विना पामरवत् समुन्नतिं, प्रयाति कश्चिद् गृहकर्मठो गृही ॥ ३६ ॥
मृतस्य जन्तोर्जननं ध्रुवं भवे, भवेन्मृतिर्जन्मवतस्तथा ततः ।
यतेत यो नोन्नतये न तेन किं, कुलद्वये पल्लविताऽयशोलता? ॥ ३७ ॥
स एवमादीन् भववैभवोद्धता-नदीनवृत्तिर्विषयानचिन्तयत् ।
पुरः स्फुरन्ती विषयस्पृहा यतो, महान्तमप्यात्मवशाय धावति ॥ ३८ ॥
स जैनसङ्घोन्नतिमूलसन्दृढ-प्रभूतपुण्योदयतोऽथ संसृतौ ।
अनित्यताद्याकलितास्तु भावना, अभावयन्नात्मबलप्रवर्त्तिताः ॥ ३९ ॥
अलं भवोपग्रहकारकेषु मे, पदेषु वाञ्छा विषयाऽनुबन्धिषु ।
स्थिरात्मरूपं प्रविहाय कोऽजडो, जडेष्वनित्येषु प्रवर्तयेत् स्पृहाम् ॥ ४० ॥
सुनिश्चितं स्वानुभवैकसाक्षिकं, करस्थचिन्तामणिरत्नवत् स्थितम् ।
य आत्मरूपं सुखबोधनिर्मलं, न चिन्तयेत् तस्य जनुश्शतं वृथा ॥ ४१ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अगण्यपुण्योदयतस्तु जायते, मनुष्ययोनौ जनिरात्मनोऽमला ।
विशेषतो धार्मिकवंशसम्भवः, परेण भाग्येन समाप्यते जनैः ॥ ४२ ॥
अहं पुनः श्रावकधर्मनिर्मले, कुले प्रपद्याऽपि जनुः सुदुर्लभम् ।
यते न चेदात्मसमुद्धृतौ तदा, कृतघ्नता स्वात्मनि भाविता मया ॥ ४३ ॥
त्रयोदशाऽप्यत्र समा मया वृथा, गृहेषु नीता ननु बालचेष्टया ।
चतुर्दशोऽयं मम वत्सरोऽनया, कदर्थितो माऽस्तु विवेकवीक्षितः ॥ ४४ ॥
शुभावहा कामितपूरणक्षमा, निरर्गलज्ञानधनैः समादृता ।
अनल्पसंसारचितोग्रसत्तपः, समूहपुण्योदयलम्भितोदया ॥ ४५ ॥
अपारसंसारपयोधितारणे, सकर्णधारावरनौरमन्दगा ।
पुमर्थराड्मोक्षपुरप्रवेशने, विशिष्टमार्गाश्रितभूमिरुज्ज्वला ॥ ४६ ॥
गृहीतमात्राऽपि निजास्पदे क्षणं, परत्र सम्राट्पदवीप्रदायिनी ।
नरेन्द्रदेवेन्द्रसमष्टिपूजिता, जिनेन्द्रदीक्षैव तु मेऽद्य रोचते ॥४७॥ विशेषकम् ॥
विरक्तिरित्थं भवतो निसर्गजा, बभूव तस्योपधितो न दूषिता ।
यतोऽस्य वपुः स्वकुटुम्बपोषणे-ऽप्यलं धनं प्रीतिरतीव सन्ततौ ॥ ४८ ॥
कुलीनता-सुन्दरता-सुबुद्धिता-ह्यनल्पसाद्गुण्यपदे वरे न के ।
स्वकन्यकादानत एव पूज्यतां, निजस्य काङ्क्षन्ति गुणस्पृहालवः? ॥ ४९ ॥
इतश्च तीर्थे गुणगौरवाञ्चिते, प्रवर्तमाने महनीयपद्धतौ ।
प्रभोर्महावीरजिनस्य तायिनो-ऽखिलार्थविज्ञानघनस्य देशितुः ॥ ५० ॥
तपःप्रकर्षेण प्रसिद्धिमागते, **तपेतिगच्छे** मुनिराजिराजिते ।
न यत्र सिद्धान्तपथातिगा क्रिया, न चाऽपि प्राचीनपरम्पराच्युतिः ॥ ५१ ॥
अभून्मुनीनां प्रवरो गुणाकरः, स तत्र लोके **बुटरायजी** श्रुतः ।
अनल्पमायामयमीक्ष्य ढुण्ढकं, मतं स्वशिष्यैस्त्रिभिरत्यजत् तु यः ॥ ५२ ॥
स **बुद्धि**पूर्वां **विजया**भिधां दधद्-यथार्थतां नाम्नि गुणैरयोजयत् ।
**मणी**तिपूर्वाद् **विजया**भिधाद्गुरो-र्य आद्य-दीक्षां सममग्रहीत् त्रिभिः ॥ ५३ ॥
स **मूलचन्द्रो**ऽस्य तु शिष्य आदिमो, दधौ स **मुक्तिं विजया**भिधां मुनिः ।
य आर्हतं धर्ममदीपयद् गुरोः, प्रतापधामा वरकीर्तिभूषितः ॥ ५४ ॥
स **वृद्धिचन्द्रो** गुणवृद्धिभाग् मुनि-र्द्वितीयशिष्योऽस्य तु धर्मकेतनः ।
उपाददे यो विजयं यथार्थतः, स्वनाम्नि चन्द्रेतिपदेन भिन्नताम् ॥ ५५ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स **राम आत्मा**दिरुपाददेऽभिधां, तृतीय **आनन्द**पदादिमां वराम् ।
य आत्मशब्दं गुणवाचिशब्दतो, विकार्य रामे विजयं समादधत् ॥ ५६ ॥
उदाहृतेष्वेषु विनेयशिक्षणे, स **वृद्धिचन्द्रो**ऽभवदग्रणीर्मुनिः ।
समेऽप्युपाये विनयादिरञ्जिता, विनेयशिक्षाऽस्य फलेग्रहिर्यतः ॥ ५७ ॥
स**नेमचन्द्रः** शुभभाग्यवैभवाद्, गुरुं तमाप्तं हृदयेऽकरोत् स्वयम् ।
न कल्पवृक्षो वरदातृतास्पदं, स्वयं हि सेव्योऽर्थिभिरेव किं गुणैः ॥ ५८ ॥
सुनिश्चिते तत्र हृदा गुरौ यतो, गुणाधिके **भावपुर**स्थिते पुनः ।
तदन्तिकं गन्तुमना ह्यभावयत्, भवस्थितिं सूक्ष्मधियेत्थमिद्धधीः ॥ ५९ ॥
न मे परप्रीतिपदाय मत्पिता, कुटुम्बसम्पोषणप्रत्यलं सुतम् ।
झटित्यनुज्ञां कथमप्यदुःस्थितो, जिनेन्द्रदीक्षार्थमसौ प्रदास्यति ॥ ६० ॥
कथं नु माता सुतवत्सला तथा, भवप्रवृत्त्येकनिबद्धमानसा ।
सहिष्यति त्यागमकाल एव मे, गृहस्य गेहोचितकर्मपण्डिता ॥ ६१ ॥
कुटुम्बवर्गस्तु निजार्थमप्यलं, मम प्रवृत्तिं प्रतिरोत्स्यति ध्रुवम् ।
न दृश्यते सम्प्रति हेतुरीदृशो, भवेदनुज्ञा ननु सर्वतो यतः ॥ ६२ ॥
इमे यथा स्वस्वहितार्थमुद्यता, मदिष्टसिद्धिं गणयन्ति नो वराम् ।
तथैव चाऽहं स्वहितार्थमुद्यतो-ऽप्युपैमि चैषां कथमीहितं स्वयम् ॥ ६३ ॥
सहस्रशः सन्ति च पुत्रिणो जना, वसुन्धराभारतयैव विश्रुताः ।
स एव पुत्री विरलस्तु गीयते, सुतो यदीयः स्वपरोपकृन् भवेत् ॥ ६४ ॥
जनो गृहस्थः स्वहितेऽपि कातरः, परापकार्येव विलोक्यतेऽभितः ।
सुदीक्षितस्त्वत्र मुनिर्जनान् बहून्, नयन् सुमार्गे स्वकुलं पुनाति हि ॥ ६५ ॥
कुलद्वयस्याऽपि च कीर्तिरुज्ज्वला, जिनेन्द्रदीक्षाग्रहणेन मे ध्रुवम् ।
अतो ह्यनुज्ञामनवाप्य पितृतो, गुरोः सकाशे गमनं वरं मम ॥ ६६ ॥
इत्थं श्री**नेमचन्द्रो** विदितनिजहितो निर्ममो बन्धुवर्गे
वैराग्याकृष्टचित्तो भवविभवततौ निःस्पृहो धर्मरक्तः ।
कार्ये स्वस्याऽप्रमत्तः पितरमनुसरन् प्राप्य कालं सुयोग्यं
गुप्तोऽगाद् **वृद्धिचन्द्रं** प्रति गुरुप्रवरं निर्भयीभूय विज्ञः ॥ ६७ ॥

***इति द्वितीयः सर्गः ॥***



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अथ तृतीयः सर्गः

## (वसन्ततिलका छन्दः)

श्रेयः समादिशतु नो जिनराज आप्तो
**वीरो** निसर्गकरुणापरिपूर्णचित्तः ।
सङ्ख्यावताममितबोधविधानदक्षां
यो देशनां व्यधित तत्त्वमयीं त्रिपद्या ॥ १ ॥
श्री**वृद्धिचन्द्र**मसमां समतां दधानं
प्राप्यैव **भावनगरे** स तु **नेमचन्द्रः** ।
आत्मानमिष्टततिपद्धतिजागरूको-
ऽज्ञासीद् भवाब्धिपरपारगतं कृतार्थम् ॥ २ ॥
लब्ध्वा विनीतमुपनीतगुणालिसात्म्यं
दीक्षोन्मुखं व्यपगताखिलदोषबन्धम् ।
सम्भाव्य **वृद्धिविजयो**ऽपरतोऽप्रधृष्य-
मानन्दकन्दमपसीममविन्दताऽलम् ॥ ३ ॥
भालं विशालमथ तस्य विलोक्य दध्रे
चित्ते सुलक्ष्मललितं स मुनीन्द्र एवम् ।
नूनं भविष्यति सुपण्डित एष वाग्मी
भव्योपकारनिरतोऽभिमतो बुधानाम् ॥ ४ ॥
प्रागल्भ्यमस्य पुनरप्रतिमं यथाऽस्ति
बाल्येऽपि मध्यवयसामपि यद्दुरापम् ।
तेनाऽनुमा भवति मे नियताऽत्र बाले
श्रीजैनसङ्घमहिमोन्नतिकारितायाः ॥ ५ ॥
इत्थं विचारयति तत्र गुरावनिद्रः
स्वाभीष्टकर्मणि कुमारसमः कुमारः ।
भक्त्या प्रणम्य गुरुवर्यमपेतदोषं
दीक्षामयाचत तमाशु स कृत्यविज्ञः ॥ ६ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

बालोऽसि तेऽत्र जनको जननी च नूनं
श्रुत्वाऽऽगमिष्यत इमां भविता तदानीम् ।
सङ्घे तयोस्तु परिदेवनतो नितान्तम्
कोलाहलो मम ततो भविता न शान्तिः ॥ ७ ॥
कालेन सेत्स्यति तवाऽभिमतं त्ववश्यं
तिष्ठाऽत्र सम्प्रति समाचर साधुसेवाम् ।
सामायिकादिकरणीयमनन्यचित्तः
काले विधाय पठ नित्यविधिं यथावत् ॥ ८ ॥
सुश्रावकोऽस्त्य**मरचन्द्र** इहाऽग्रगण्यः
सङ्घेषु कृत्यनिपुणो **यशराज**पुत्रः ।
यस्याऽमला रुचिरतीव जिनोक्तधर्मे
स्याद्वादतत्त्वमननप्रवणा च बुद्धिः ॥ ९ ॥
तस्यैव मन्त्रमुपजीव्य कुशाग्रबुद्धे !
स्वाभीष्टसाधनपरो भव वृद्धसेविन् ! ।
नित्यक्रियामनुदिनं कुरु साधुपार्श्वे
पञ्चप्रतिक्रमणसूत्रमधिष्व सार्थम् ॥ १० ॥
एतादृशान्यनुपमानि वचांसि विज्ञो
लब्ध्वाऽऽयतौ गुरुवरात् तु सुखावहानि ।
धीमन्तम**प्यमरचन्द्र**मथाऽऽशु **नेम-**
**चन्द्रः** स्वपक्षगमसावकरोत् सुवृत्त्या ॥ ११ ॥
पुर्यां स तत्र शिशुरप्यभिनन्दनीयो
वृद्धैरुदारचरितैः क्रियया बभूव ।
निस्सीमप्रीतिरत एव शुभप्रवृत्तौ
तस्मिन् मुनेरपि विनीततरे बभूव ॥ १२ ॥
सान्ध्यं विधिं प्रतिदिनं स गुरोः सकाशे
कृत्वा विशुद्धमनसा गुरुपादसेवी ।
आवृत्तिमभ्यसितसूत्रततेर्विधाय
मन्त्रं गुरोरकलयन्निशि सावधानः ॥ १३ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं बालमप्यमितबुद्धिनिधानमारा-
च्छ्राद्धं स **वृद्धिविजयो** गुरुरीक्ष्य बुद्ध्या ।
सन्दिग्धमन्त्रपदनिश्चयनाय प्रायो-
ऽपृच्छद् रहस्यमनुरञ्जितसभ्यवर्गम् ॥ १४ ॥
बुद्धिं विवेकनियतां परिणामरम्या-
माधाय सोऽपि परजुष्टमतानपेक्षः ।
मन्त्रं तथैव विदधौ गुरुरप्यमन्दा-
नन्दो यथाऽभवदगाधविचारकक्षः ॥ १५ ॥
इत्थं गुरोः परमप्रीतिमवाप्य **नेम-**
**चन्द्रो** विचारनिपुणो विनयप्रधानः ।
संवत्सरं त्वगमयत् पठनादिकर्म-
व्यासङ्गतां गुरुसमीपगतो विबुद्धः ॥ १६ ॥
वप्रा प्रवृत्तिमुपलभ्य सुतस्य चाऽस्य
शुद्धां कुमार्गविमुखां विनयादिरम्याम् ।
लोकप्रवृत्तिमनुरुध्य पुरीं स्वमातुः
पश्चात्वदुःखमुपजीव्य *तमानयत् स्वाम् ॥ १७ ॥
प्रौढः स कार्यवशतः पितुरेव बुद्धिं
मध्यस्थवृत्तिमवलम्ब्य धियाऽनुगच्छत् ।
नानाविधानि परिणामकटूनि तत्र
भोग्यान्यभुङ्क्त स विरक्ततरोऽपि यस्मात् ॥ १८ ॥
तस्मिंस्तथाऽऽगतवति स्वगुरोः सकाशाद्,
दीक्षैकबद्धहृदये नररत्नवर्ये ।
भूयः पलायनमथाऽस्य विशङ्कमानो
वप्रा प्रमादरहितस्त्वभितो बभूव ॥ १९ ॥
आसक्तिमाँश्च बहिरेव कुटुम्बवर्गे
नाऽन्तस्तथाऽपि विनयी स तु **नेमचन्द्रः** ।
वप्रारमात्मनि सरागमवेक्ष्य **लक्ष्मी-**
**चन्द्रं** तथैव विदधे न यथाऽस्य खेदः ॥ २० ॥

* तमाशु निन्ये-इत्यपि पाठः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

माता स्वभावसरलाऽस्य विलोक्य चाऽमुं
स्वाभाविकं परमप्रेम प्रदर्शयन्ती ।
सुस्वादुमिष्टमुपभोज्य सुभक्ष्यजातं
स्नेहादुपाचरदतीव वरं सुतं तम् ॥ २१ ॥
मोहाभिभूतमथ सोऽकलयत् समस्तं
सम्बन्धिवर्गमपनिद्रमतिः कुमारः ।
प्रच्छन्न एव पुनरप्यपहाय गेहं
सोऽगाच्च **भावनगरे** गुरुपादमूलम् ॥ २२ ॥
आगत्य तत्र गुरुवर्यमसेवताऽलं
भूयोऽप्ययाचत गुरुं प्रणतः स दीक्षाम् ।
एकान्ततो ग्रहमसौ प्रविलोक्य तस्य
तस्यां गुरुः श्रितदयोऽमितधीरुवाच ॥ २३ ॥
त्वं बालकोऽसि तत एव मया न दीक्षा
तुभ्यं प्रदीयत इतो न निमित्तमन्यत् ।
धर्माधिकारिनिकटं तव बन्धुवर्गो
दीक्षाग्रहे सति गमिष्यति नूनमेव ॥ २४ ॥
योग्योऽसि कृत्यनिपुणोऽसि विनेयधुर्यो
हे **नेमचन्द्र** ! वद किं करणीयमत्र ? ।
पूर्वं समीक्ष्य करणं विदुषो हि शस्त-
मप्रेक्ष्यकारिणमतीव हसन्ति सन्तः ॥ २५ ॥
सुश्रावका **अमरचन्द्र**मुखास्तु सर्वे
मन्त्रन्तमिष्टमनुजग्मुरनल्पविज्ञाः ।
प्रौढः स एव पुनराह दृढप्रतिज्ञो
नम्रो गुरुं विगतभीरपनीतमोहः ॥ २६ ॥
धर्माधिकारिभवने गमनं ममेष्टं
दीक्षाकृते मतिमतां वर ! निर्भयोऽहम् ।
दास्यामि तत्र पितरं प्रति वीतमोहः
प्रत्युत्तरं ननु यथा भविता जयश्रीः ॥ २७ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाऽहं भवन्तमिह कर्मणि लेशतोऽपि
स्वार्थं करोमि शमभङ्गभयातिथेयम् ।
माध्यस्थ्यमात्रमवलम्ब्य भवान् ससङ्घो
यत्नं विलोकयतु मे स्वसमीहिताय ।। २८ ।।

दीक्षार्थमित्थमपभीतममुं विलोक्य
सुश्रावकस्त्व**मरचन्द्र** उवाच विज्ञः ।
साहाय्यमत्र तव कर्मणि सर्व एव
कुर्मो वयं गुरुकृपा भविताऽत्र सिद्ध्यै ।। २९ ।।

सङ्घस्य तस्य च तथाऽऽग्रहतो विचारो
दीक्षां प्रदातुमचिरेण समुल्ललास ।
तत्रैव **वृद्धिविजय**स्य भवाब्धिपारो-
त्तारार्थमुद्यमजुषो भवभीतिभाजाम् ।। ३० ।।

ज्ञात्वा कुटुम्बसहितः पुनरस्य **लक्ष्मी-**
**चन्द्रो** विचारमतिदार्ढ्यपदप्रतिष्ठम् ।
आगत्य तत्र बहुधा समबोधयत् तं
गेहे व्यवस्थितिकृते सुतप्रीतिबद्धः ।। ३१ ।।

बालोऽप्यमन्दधिषणानिलयो निरीहो
निर्व्याजमाह जनकं सकुटुम्बमेतत् ।
पुत्रं कुलद्वययशस्करमत्र विद्धि
दीक्षार्पितो दृढप्रतिज्ञममुं त्ववश्यम् ।। ३२ ।।

यूयं यथा त्वहितमेव हितं विबोध्य
मां बन्धनाय सममिच्छथ बन्धुवर्गैः ।
युष्मांस्तथैव हितमेव हितं विबोध्य
मुक्त्यै निनीषुरहमस्मि भवाब्धिमग्नान् ।। ३३ ।।

मोहप्रवृत्तिरथ चेद् भवतां विशाला
सा स्नेहलेशविमुखे मयि युज्यते नो ।
अन्योन्यरागनियता न तु वृद्धिमेति
यस्मादियं विहतरागपदे कथञ्चित् ।। ३४ ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यो **बालचन्द्र** इति ते प्रथितस्तनूजो
मत्तोऽवरः स भविता कुलवृद्धिहेतुः ।
तिस्रः सुताः गृहविभूषणतां दधन्त्यो
मोदं पितस्तव न किं परिपूरयन्ति ? ॥ ३५ ॥

इत्यादि प्रीतिवियुतं वचनं तदीयं
तथ्यं हितं च न पितू रुचितं बभूव ।
तं दण्डनीत्यधिकृतातुलभीतिभङ्ग्या
नेतुं हठादथ स ऐच्छदगाधधैर्यम् ॥ ३६ ॥

नीतिप्रपञ्चनिपुणः स तु **नेमचन्द्रो**
नैवाऽत्रसत् समुचितोत्तरदानदक्षः ।
तस्मादबुद्धिजनभीतिविधानदक्षाद्
धर्म्माधिकारिनिकटानयनाद्युपायात् ॥ ३७ ॥

माता तु तस्य पुरतोऽतिरुरोद सोर-
स्ताडं विषण्णवदना करुणार्द्रचित्ता ।
मोहाभिभूतमनसस्तु जनास्तदानीं
तद्रोदनेन समदुःखमवापुरज्ञाः ॥ ३८ ॥

तां तादृशीं स जननीं सुतरागनद्धां
वैराग्यबद्धहृदयो दृढसत्त्व एवम् ।
प्रोवाच येन जनताऽतिचमत्कृताऽभूत्
वीतस्पृहत्वमतुलं भवतो विभाव्य ॥ ३९ ॥

मातः ! स्वमृत्युसमनन्तरमत्र सर्वे
यद् रोदयन्ति जननीं न च तत्र चित्रम् ।
चित्रं त्विदं यदहमग्रत एव जीवन्
संरोदयामि भवतीं स्वसमीहितार्थी ॥ ४० ॥

नो रोदनेन न च तर्जनया न भीत्या
त्यक्ष्यामि चो निजसमीहितदां प्रतिज्ञाम् ।
चिन्तामणिं निजकरे समवाप्य को ज्ञो
वार्धावगाधसलिले क्षिपति प्रसह्य ॥ ४१ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेजोनिधेः समुदयो यदि पश्चिमायां
वारांनिधेरपि च वृद्धिरतीत्य वेलाम् ।
स्थानं विहाय चलनं च भवेत् सुमेरो-
र्नो मे तदाऽपि चलनं शुभसङ्करस्य ॥ ४२ ॥
इत्थं सुनिश्चितविचारमपेतरागं
तं **नेमचन्द्र**मवधार्य मुमोद सङ्घः ।
माता रुरोद सुतरत्नवियोगखिन्ना
वप्ता कथञ्चिदपि धैर्यमुरीचकार ॥ ४३ ॥
बाणाब्धिनिध्युडुपसम्प्रमितेऽथ वर्षे (१९४५)
ज्येष्ठे सिते दिवसनाथतिथौ सुयोगे ।
लग्ने परीक्षितवहे समुहूर्त्तयुक्ते
दोषप्रमोषललिते गणकालिगीते ॥ ४४ ॥
श्री**तख्तसिंह**नृपतेरवदातकीर्तेः
राज्ये समुल्लसति **भावपुरे** वरिष्ठे ।
लोके प्रमोदभरतुन्दिलतां दधाने
धर्मप्रवृत्तिनियतोत्सवसावधाने ॥ ४५ ॥
सङ्ख्ये गुणौघनिलये कलितप्रमोदे
दीक्षां स **वृद्धिविजयो** मुनिराप्तमुख्यः ।
तस्मै ददौ प्रथितपञ्चमहाव्रताढ्यां
नामाऽपि **नेमिविजये**त्यकरोच्च तस्य ॥ ४६ ॥
सङ्घः सुधर्मरथगो भविता विमुक्ति-
गामी त्ववश्यमवनौ सुदृढादमुष्मात् ।
चक्राभिधां च तत एव विचार्य **नेमिं**
यस्मिन् गुरुः प्रथितकीर्तिरुपाददे नु ॥ ४७ ॥
अध्यैष्ट **नेमिविजयो** मतिमत्प्रधानः
काव्यानि पञ्च **रघुवंश**मुखानि शीघ्रम् ।
श्री**भानुशङ्कर**प्रदर्शितकाव्यमार्ग-
वैदग्ध्यतोऽतिपटुताऽस्य बभूव तत्र ॥ ४८ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रूपावली**प्रभृतिकानि बभूवुरेवा-
ऽभ्यासात् सुसंस्कृतप्रवेशफलानि पूर्वम् ।
पश्चात्क्रमेण कविकर्मकलापमध्ये
तात्पर्यबोधप्रवणा प्रबभूव शक्तिः ॥ ४९ ॥
शक्त्या स्वयं स बुधवर्यविनिर्मितानि
गूढार्थकानि चरितान्यधिजग्मिवाँश्च ।
दुर्बोधमप्यतिसुबोधवचःप्रणाल्या
व्याख्यानवल्लघुविबोधकृते जनानाम् ॥ ५० ॥
व्याख्यानकौशलकला तत एव तस्य
प्रादुर्बभूव तुलनारहिता नवीना ।
अभ्यासविघ्नभयतो न तदोपयोगं
तस्याश्चकार परमायतिसावधानः ॥ ५१ ॥
संस्कारपाटवमसौ परमाप्य शब्द-
साधुत्वबोधनफलामथ शब्दविद्याम् ।
अध्यैष्ट **भावनगरा**धिपपाठशाला-
शिक्षानियुक्तबुधतो गुरुसन्निधाने ॥ ५२ ॥
मर्मावबोधनकृते स तु **फक्किका**सु
तत्राऽपि शिक्षकवरान्निपुणत्वमाप ।
स्वल्पेऽप्यनेहसि परामधिगम्य प्रौढिं
विद्वत्सदस्सु प्रतिवादकलां व्यधत्त ॥ ५३ ॥
अभ्यासपद्धतिमिता तनुविस्तृताऽपि
किं चन्द्रिका हसति तामपि कौमुदीं नो ।
**भानु**र्निदर्शनमभूदिह शिक्षकोऽद्य
सोऽप्येतदीयमतितोऽतितुतोष विद्वान् ॥ ५४ ॥
रात्रिन्दिवं पठनतो गुरुसेवयाऽपि
काले समाचरणतो विधितः क्रियायाः ।
प्राग्जन्मसंस्कृतिसमष्टिप्रबोधतोऽथ
विद्योल्ललास विमलाऽस्य विपक्वबुद्धेः ॥ ५५ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्क्षेपतः श्रुतगताभिमतार्थतत्त्व-
बोधोऽपि तस्य रुचिसंवलितो बभासे ।
स्वाध्यायतोऽस्य गुरुरप्यतिमोदभावं
नम्रस्य कृत्यनिपुणस्य सुतीक्ष्णबुद्धेः ॥ ५६ ॥

तस्यैवं गुरुसन्निधौ विनयतो विद्यां समभ्यस्यत-
श्चत्वारो विगता अतीतपदवीं संवत्सराः सौख्यदाः ।
अन्योन्यं प्रबभूव यत्र समयार्थालोचनं वाग्मिनां
शिष्याणां मतिताण्डवास्पदमसद्वादप्रमुक्तं शुभम् ॥ ५७ ॥

निध्यब्ध्यङ्कनिशाधिनाथप्रमिते(१९४९) संवत्सरे वैक्रमे
वैशाखे सितपक्षके रवितिथौ **श्रीवृद्धिचन्द्रो** मुनिः ।
शिष्याणां प्रकरे समुन्नतिघटां प्राप्ते कृतार्थः स्वयं
स्वर्लोकं द्विगुरुं चकार परमं योगं प्रपद्याऽर्हतः ॥ ५८ ॥

श्रीले **भावपुरे** तदा समभवत् सुश्रावकाणां गणे
मोदोल्लाससमन्वितो निरुपमस्तद्देहकृत्योत्सवः ।
पञ्चत्वं गमितेऽथ तत्र वणिजस्त्वष्टाह्निकाद्युत्सवं
चक्रुस्तेन बभौ पुरं बलरिपोरेवाऽऽगतं तत्पुरम् ॥ ५९ ॥

**इति तृतीयः सर्गः**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अथ चतुर्थः सर्गः

## (पृथ्वी च्छन्दः)

तनोतु शुभसन्ततिं भविकसन्ततौ सर्वदा
सुरासुरनतक्रमोऽतिदृढमूलमोहारिहा ।
निसर्गकरुणामयोऽप्रतिहताखिलज्ञानभू-
रबाध्यवचनो जिनोऽतुलविमुक्तिलक्ष्म्याश्रितः ॥ १ ॥
गुरांवुपरते वरे विधिनियोगसंयोगतो
विचारनिलयोत्तमे मुनिसमष्टिचूडामणौ ।
स **नेमिविजयो** मुनिर्गुरुवियोगसम्पीडितो
जनोपकृतये द्रुतं विहरणं समैच्छत् सुधीः ॥ २ ॥
ययौ विहरणक्रमात् प्रथममेष सिद्धाचलं
मुनीन्द्रगणसेवितं सततमेव तीर्थोत्तमम् ।
अनल्पजिनमन्दिराकलितशृङ्गशोभं वरं
नदी परमपावनी यमधिभाति शत्रुञ्जया ॥ ३ ॥
गिरिप्रवरसन्निधेर्जगति विश्रुतं यात्रिणां
सदैव गमनागमैर्विविधदेशसञ्चारिणाम् ।
पुरप्रवरमर्थितो नगरवासिसच्छ्रावकै-
रशोभयदसौ मुनिः प्रथित**पादलिप्ता**भिधम् ॥ ४ ॥
नृपोऽपि गिरिसन्निधौ वसतिमाप्य तस्मिन् पुरे
सुयात्रिगणरक्षणाद् धनमहर्निशं विन्दते ।
गिरिप्रवरसेवया सुखिन एव तद्वासिनो
नराः सुकृतलम्पटा अनुभवन्ति धर्मक्रियाम् ॥ ५ ॥
न यस्य मतिकुण्ठता समभवन्नये गौतमे
गदाधरवचस्ततिर्हृदयगा नवीनाऽभवत् ।
अखण्डमतिताण्डवं व्यधित खण्डने योऽभितः
स **दानविजय**स्तदा मुनिरधिश्रितस्तत्पुरम् ॥ ६ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स **नेमिविजयं** कृती विविधवाचनापण्डितं
ग्रहेण निजसन्निधौ समकरोत् सुमैत्रीपदम् ।
उभौ नयविशारदौ श्रुतविचारणातत्परौ
परस्परमतानुगावलभतां प्रमोदं परम् ॥ ७ ॥
द्विजाद् **दिनकरा**भिधादमलशब्दविद्याम्बुधे-
रपीपठदमन्दधीः स किल पाणिनीयं तदा ।
स्वबुद्ध्यमितवैभवादनलसप्रवृत्तेरथो
सुसंस्कृतपदावलीं निजवशे समस्थापयत् ॥ ८ ॥
नवाब्धिनवयामिनीपतिमितं (१९४९) तु संवत्सरं
सुखेन समपूरयत् स किल **पादलिप्ते** पुरे ।
पुनर्विहरणक्रियामनुभवन् जनाभीष्टदां
स **जामनगरं** ययौ भविकप्रार्थनाकर्षितः ॥ ९ ॥
समीहितविवेचनाकलितमर्थतत्त्वोज्ज्वलं
निदर्शनसमन्वितं विधिनिषेधवादाश्रितम् ।
श्रुतोदधिसुसङ्गतं सदुपदेशमिष्टं ददौ
स तत्र प्रतिवासरं प्रणतभव्यसङ्घाय वै ॥ १० ॥
अनल्पभववासनामपनयन् जनानां रुचिं
जिनप्रवचनाश्रितां विमलयन् भवोत्तारिणीम् ।
स्वकीयवचनामृतैर्जिनमते जनान् स्थापयन्
बहून् परमताश्रितान् समभवत् स पूज्यो जनैः ॥ ११ ॥
तदुक्तिमननोन्मुखा नगरवासिनः श्रावका-
स्तदन्तिकमशिश्रियन् सततमेव बद्धादराः ।
परेऽपि निजसंशयप्रलयतोऽस्य सद्युक्तितो
विनेयपदवीं ययुर्विबुधमाननीया जनाः ॥ १२ ॥
न यौक्तिकजनादृते वचनमस्य सम्यक्तया
सुबोधमभवत् पुनर्निजविचारसञ्चारणे ।
अतो वचनचातुरीप्रथनलम्पटानामसा-
वुपास्यचरणोऽभवद् विमलतत्त्ववाङ्निर्मितौ ॥ १४ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

न सत्यवचनादृते वचनमस्य तत्त्वेऽभव-
न्न चाऽपि पिशुनावली समभवत् तथाऽस्याऽन्तिके ।
न पामरजनैः समं विततमन्त्रणाऽस्याऽभव-
न्न दुर्व्यसनसम्मुखा मतिरभूत् तदीया जने ॥ १५ ॥
सुधर्मपथविच्युतौ कुलवतामपि श्रीमतां
पदे प्रणमतामसौ न च मुखं समैक्षन्मुनिः ।
न बालगणमेलनं समभवत् तथाऽस्य क्वचित्
प्रतापभवनस्य तत्परित एव कीर्तिर्बभौ ॥ १६ ॥
समाद्यवसूतिं कृती विमलपुण्यबिम्बाऽपि तां
तदा नु **कचरा**भिधो विभवतो व्यधादुज्ज्वलाम् ।
तदुत्सवविराजिते पुरवरे तदानीं नु किं
सुरा अपि समागताः समभवन् प्रमोदाञ्चिताः ॥ १७ ॥
श्रिया लसितभालकेऽथ प्रवरे विशां वंशके
समृद्धिमहितो युवा पर**गलाल-डाह्या**भिधः ।
अनल्पविजयाशन-व्यसनलम्पटो निर्भय-
स्तदन्तिकमुपाययौ प्रतिदिनं प्रसन्नाशयः ॥ १८ ॥
स **नेमिविजयो** मुनिः सदुपदेशतस्तं मुहुः
क्रमाब्जभसलायितं समकरोद् विरक्त्यास्पदम् ।
वणिक्प्रवर एकदा स तु प्रसङ्गतो वाक्तते-
रयाचत विदाम्वरं मुनिममुं सुदीक्षां क्रमात् ॥ १९ ॥
निरक्षरतयाऽऽश्रितं व्यसनलम्पटं मां भवान्
विभाव्य निजशक्तितः प्रगुणयत्वभीष्टे क्षमम् ।
भवत्पदसुसेवयाऽस्खलितजैनधर्मोत्तमा-
श्रयेण भववारिधेरहमुपैमि पारं यतः ॥ २० ॥
तमुद्यतमभीपदं विमलजैनदीक्षाप्तये
भवाब्धितरणक्षमं विहतमोहदुश्चेष्टितम् ।
विलोक्य किल बान्धवा विदधिरेऽस्य नीत्यालया-
धिकारिजनसंश्रयाद् गृहप्रसक्त्युपायान् बहून् ॥ २१ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स **लाल**पदविश्रुतो निजजनान् विभाव्योद्यतान्
समीहितपथच्युतौ दृढप्रतिज्ञ एषोऽवदत् ।
न मेऽधिकरणालये गमनतो भयं बान्धवा
मुधा कुरुत मोघमं विगतमोहलेशे मयि ॥ २२ ॥
नयालयगतो ह्यहं तदधिकारिणां सम्मुखे
प्रकाश्य निजनग्नतां समुचितोत्तरं वो ददे ।
न मे विषयकामना न च मनः कुटुम्बाश्रितं
स्पृहा हृदयसङ्गता मम तु जैनदीक्षाश्रिता ॥ २३ ॥
विवेकविकला दशा सपदि याति दूरं यथा
दृढा विषयवासना विलयमेति सर्वात्मना ।
विमुक्तिपदवी वरा भवति चाऽत्र नेदीयसी
शुभप्रचयराजिता मम तु जैनदीक्षाऽस्तु सा ॥ २४ ॥
वदन्तममलान्वयं दृढप्रतिज्ञमेवं जना
विभाव्य तमकल्मषं समभवन् प्रमोदाञ्चिताः ।
तदिष्टमनुमेनिरे जिनमतप्रभावोन्मुखा-
स्तदा प्रणतबान्धवा गुरुपदाब्जभृङ्गायिताः ॥ २५ ॥
खबाणनिधिकौमुदीपतिमिते (१९५०) तु संवत्सरे
शुभग्रहसमुज्ज्वले शुभमतिः स **डाह्या**भिधः ।
सुमेरुरचनाञ्चितं परिवितत्य चाऽष्टाह्निको-
त्सवं मुनिवरात् ततः प्रवरजैनदीक्षां ललौ ॥ २६ ॥
स **नेमिविजयो** मुनिः **सुमति**सञ्ज्ञयाऽन्वर्थया-
तमग्रिममयोजयच्छ्रितपदं विनेयं गुरुः ।
अशिक्षयदनन्तरं विमलबोधसम्प्राप्तये
सदाचरणपद्धतिं मुनिवरौघसंसेविताम् ॥ २७ ॥
गुरुप्रवरशिक्षया **सुमति**नाम्नि तस्मिन् मुनौ
गुणाश्वरणसङ्गता उपगता निकामं वराः ।
गता विलयपद्धतिं व्यसनराजयो मूलतो
भवोन्मथनलम्पटा रुचिरुदित्वराऽभूच्छ्रुतम् ॥ २८ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

गुरोर्वचनमादराद् विनयतः शुभाज्ञाञ्चितं
शिरस्यथ समग्रहीन्मुकुटवत् सदाऽसौ मुनिः ।
न काऽपि समभूत् क्रिया क्वचिदपि स्वतन्त्रान्वया.
गुरोरनुमतिं विना शुभवतोऽस्य प्रज्ञावतः ॥ २९ ॥
विनीततरतां गतः **सुमति**रुग्रतेजा अपि
गुरोः प्रभवतोऽन्तिके प्रशम एव तस्थौ सदा ।
न धर्मविमुखो जनः क्षणमपि प्रियालापभूत्
तदन्तिकमुपाययौ तदतितापभीकुण्ठितः ॥ ३० ॥
विबुद्धबुधविश्रुतं महति **दान**सञ्ज्ञं मुनिं
स सिद्धगिरियात्रिकात् कुनयजेऽथ(?) कष्टे स्थितम् ।
तदुद्धरणकामनाकलितधीरुदाराशयो
व्यवस्यदकुतोभयस्तमुप**पादलिप्तं** गतम् ॥ ३१ ॥
वणिक्कुलविभूषणः परग**चन्दसौभाग्य**क-
स्तदा सुविभवोऽभवत् परग**चन्दकर्पूर**जः ।
स नाम नगरेऽग्रणीः सकलसङ्घसम्मानितो
धनव्ययमजीगणन्न सुकृतेष्वनल्पेष्वपि ॥ ३२ ॥
स **नेमिविजया**द् गुरोः प्रतिदिनं शुभां देशना-
मनल्पनयगुम्फितां समशृणोत् सुभावाञ्चितः ।
प्रसङ्गत उदाहृतं स खलु तीर्थयात्राश्रितं
वचःप्रकरमादराद् हृदि दधाविदं भूतये ॥ ३३ ॥
ययोन्नतिघटापरा भवति धर्मवृद्ध्युन्मुखा
गृहाङ्गणकृतालयोल्लसति चेन्दिरा सुस्थिरा ।
विमुक्तिपदयोग्यताऽव्यवहितार्थदा जायते
बुधाः कुरुत तां मुदा जगति तीर्थयात्रां वराम् ॥ ३४ ॥
अनल्पभवसञ्चितो विलयमेति यस्याः कृतेः
निकाचितदशां गताऽप्यमितकर्मभूतिर्द्रुतम् ।
सुबन्धनपदं श्रयत्यपि च तीर्थकृत्कर्म तत्
बुधाः कुरुत तां मुदा जगति तीर्थयात्रां वराम् ॥ ३५ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इमाममितकामदां विभवतस्तु सङ्घं कृती
सुकारयति यः स्वयं प्रकुरुते च पुण्याशयः ।
न तस्य गुणवर्णने गुरुरपि प्रभुस्तत्त्वतो
न कोऽपि सदृशो भवेदिह परत्र वा तत्फलैः ।। ३६ ।।
स धर्मधन एकदा गुरुवरं ययाचे स्वयं
महाग्रहपुरस्सरं शुभमिदं समात्ताञ्जलिः ।
प्रपूरय गुरो ! स्पृहां मम सुतीर्थयात्राश्रयां
निजागमनतोऽनघाऽप्रतिमसङ्घगत्यञ्चितात् ।। ३७ ।।
तमर्थिनमसौ मुनिर्निखिलतीर्थराजं गिरिं
प्रतिस्वगमनोक्तितः समकरोदभीष्टोद्यतम् ।
निमन्त्रित इयत्तयाऽनवधृताऽथ सङ्घोऽभितो-
ऽप्युपागमदनारतं प्रवरतीर्थयात्रेच्छया ।। ३८ ।।
चचाल पुरतस्ततोऽधिपममुं प्रपद्याऽऽर्हतं
स **सिद्धिगिरि**सम्मुखं जनसमाज आनन्दभाक् ।
श्रुतोक्तविधिमत्यजन् मुनिवरस्य तस्याऽऽज्ञया
पदप्रचरणादिकं विदितधर्मशास्त्राम्बुधेः ।। ३९ ।।
अजीगणदुदारताचरमसीम्नि तिष्ठन्नसौ
वसुव्ययमनल्पशो न च पथि क्वचित् कर्मणि ।
उपाश्रयकृतिं क्वचित् क्वचिदपि प्रभोर्मन्दिरं
मुनीशवचनात् क्वचित् समकरोत् स जीर्णोद्धतिम् ।। ४० ।।
ससङ्घजनतामनोऽभिमतवस्तुसम्पादनै-
रप्रीणयदनारतं पथि गृहस्थितिं दर्शयन् ।
जिनार्चनघटां परां पुरि पुरि प्रकुर्वन् ययौ
सुमिष्टमुपभोजयन् प्रतिपुरं स साधर्मिकान् ।। ४१ ।।
स **नेमिविजयो** मुनिः सदुपदेशतोऽहर्निशं
समागतजनान् बहूनकृत तत्र धर्मोद्यतान् ।
पुरं च सुप्रयाणकैः प्रथित**पादलिप्ता**भिधं
समासददनामयं सपतिसङ्घयुक्तः कृती ।। ४२ ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

जयध्वनिपरायणैः पुरनिवासिभिः श्रावकैः
समर्चितपदो मुनिः सपतिसङ्घविभ्राजितः ।
सुतोरणविभूषिते पुरि प्रसर्पदच्छध्वना-
ववीविशदुपाश्रये प्रभुमुपास्य चैत्ये जिनम् ।। ४३ ।।
जिनानमितकामदान् सगुरुरेव सिद्धाचलो-
परि प्रथितचैत्यगान् प्रणमितुं ससङ्घो ययौ ।
प्रणम्य नृभवं तदा सफलयन् ससङ्घाधिपो
कृतार्थपरिपूरितां प्रथितसप्तपात्रीं ननु ।। ४४ ।।
अनल्पदिवसागतं सविधवर्त्तिनं वाग्मिनं
समस्तनयकोविदं विनयतत्परं निर्भयम् ।
विलोक्य तमकल्मषं जिनमताब्जभानुं मुनिं
स **दानविजयो**ऽभवत् प्रमदमेदुरो निर्भरम् ।। ४५ ।।
तदीयवचनादथो विदितवेद्यकर्तव्यकः
स **नेमिविजयो** मुनिर्निभृतमेव सर्व व्यधात् ।
क्रिया फलति सत्त्वतो विविधमन्त्रगुप्तान्वया
सतां परिकरादृते न तु वचःप्रथाडम्बरैः ।। ४६ ।।
न यद् बहुविधैः श्रमैरपि बभूव लेशादपि
प्रसिद्धिपदमर्थिनामपि सहायकृत्याऽऽत्मनः(?) ।
तदाशु मुनिना कृतं समवलोक्य **दाना**भिधः
स **नेमिविजये**न यन्मुदमियाय दुःखक्षयम् ।। ४७ ।।
एवं सङ्घोपकारी गुणगणनिलयो विश्वविख्यातकीर्त्तिः
श्रीमान् **नेमि**र्विहर्तुं पुरि पुरि जनताबोधिहेतोरियेष ।
तीर्थेनैतादृशानां स्थितिरतिसमया युज्यते धर्मवृद्ध्यै
कल्पैदम्पर्यभाजां यत इह यमिनां तत्त्वदृष्ट्यैकधाम्नाम् ।। ४८ ।।

***इति चतुर्थः सर्गः ।।***



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथ पञ्चमः सर्गः

### (शिखरिणी च्छन्दः)

परिच्छेदोऽतीतो जगति महिमा यस्य विबुधैः
यदीया तत्त्वोक्तिर्नयपरिचितानल्पसरणिः ।
त्रिलोकीं यज्ज्ञानं कलयति करस्थामलकवत्
स वोऽर्च्यो लोकानामवतु सततं कर्मवियुतः ॥ १ ॥
गुणानामावासं **सुमति**सहितं **नेमिविजयं**
जनानां सद्भाग्यादथ च विहरन्तं पुरि पुरि ।
समानेतुं श्राद्धाः सुरपुरसदृक्षे **मधुपुरे**
कृतायासाभ्यासाः फलमुपगताः पुण्यदिवसैः ॥ २ ॥
पुरे तस्मिँस्तस्याऽतुलगुणनिधेः स्वागतिविधिं
विधातारः श्राद्धा अहमहमिकातः समुदिताः ।
अकार्षुर्या शोभां निजनिजकहट्टेषु युगपत्
तया भक्तिव्यक्तिः स्ववदपरस्मिन्नपि जने ॥ ३ ॥
निजग्रामे मानो भवति महतां नैव निजकैः
प्रवादोऽयं व्याप्त्या वियुत इह जातो मुनिवरे ।
उपाधिर्मोहादिः कलयति कृती तत्र सुधिया
समुत्खातोपाधौ समुचिततरोऽयं किमु नहि? ॥ ४ ॥
स पूर्वं सद्भत्या विधिमनुसरन् शास्त्रविदितं
प्रभोर्बिम्बं साक्षाद् विहरत उपात्तं द्युतिचितम् ।
**महावीर**स्योक्तं प्रणमितुमगाच्चैत्यभवनं
जिनं नत्वा सङ्घैर्वसतिमविशत् प्राप्य विधितः ॥ ५ ॥
निषण्णान् श्राद्धौघान् जिनवचनशुश्रूषणपरान्
समीहापोहाक्तान् श्रुतमननसञ्जातधिषणान् ।
विदित्वाऽर्हानुक्तानथ समुचिते विष्टपवरे
निषिद्धारव्यत्तत्वं मुनिगणमणि**र्नेमिविजयः** ॥ ६ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनल्पैर्दृष्टान्तैरनुगतमबाध्यैरविकलैः
प्रभूतार्थोपेतं श्रुतपरिचितं युक्तिनिचितम् ।
नयैस्तैस्तैः स्थाने कृतपरिचयं दोषविमुखं
तदीयं व्याख्यानं समभवदुपादेयमखिलैः ॥ ७ ॥
न कोऽप्यासीच्छ्रोता **मधुपुर**पुरे योऽस्य वचनै-
र्विदित्वा तत्त्वौघं न च समभवन्मोदकलितः ।
श्रुतेऽस्य व्याख्याने विषयपरतन्त्रोऽपि च जनो
बभूवोत्को मुक्तौ क्षणमनुभवन् धर्मसरणिम् ॥ ८ ॥
पिता **लक्ष्मीचन्द्रो**ऽभवदिह पुरा योऽस्य विमुखः ।
सुदीक्षोपादाने सुतविरहदुःखाकलितधीः ।
स एव व्याख्यानं नयविषयमाकर्ण्य निजकं
कुलं तेनाऽमंस्त प्रथमगणनीयं क्षितितले ॥ ९ ॥
सपुत्रां स्वां मेने जिनमतविदा तेन मुनिना
गुणाढ्या **दीपाली** जगति जननीषु प्रमुदिता ।
स **पञ्चाताराख्यः** प्रथित इह कुटुम्बोऽतिप्रथितः
कुटुम्बेष्वेतेनाऽभवदतिप्रसिद्धेन विदुषाम् ॥ १० ॥
विरक्तः **श्रीनेमिः** पितरमपि तं सन्निधिगतं
समं श्राद्धैरन्यैरकलयदुदारेण मनसा ।
कदाचित् कस्मिंश्चिद् विमतिपरतन्त्रं पुनरमुं
शशास स्पष्टोक्त्या परजनमिवाऽतीव समदृक् ॥ ११ ॥
सूते व्याख्यानं नो विषयविरतं **नेमिविजयं**
स्त्रियो द्रष्टुं शक्ता अपि सुकुलजाताः समभवन् ।
अतोऽम्बा **दीपाली** क्षणमपि कथञ्चित् सुविनया
समुत्का तं दृष्ट्वा सफलमिह मेने स्वजननम् ॥ १२ ॥
स दत्त्वा व्याख्यानं प्रतिदिवसमावश्यकविधिं
विधायाऽस्तालस्योऽपठदविरतं शास्त्रमनघम् ।
समायातानन्यानपि विनयनम्रान् समकरोत्
वचोभिः स्पष्टार्थैरपि कठिनशास्त्रेषु निपुणः ॥ १३ ॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

स पूर्वाभ्यस्तानामतिपरिचितानामपि कृती
सदावृत्त्याऽनैषीन्मतिमपरतन्त्रां श्रुतचये ।
तदूहापोहाभ्यामपठितमपि ग्रन्थनिकरं
तथा व्यास्थद् विज्ञानपि निजवशेऽस्थापयदसौ ॥ १४ ॥
न तस्याऽभ्यासेऽभूत् कुमतकलहानां निवसनं
ह्यनुच्छिन्नाशङ्को न च समभवत् कोऽपि मतिमान् ।
प्रभावात् तस्याऽभूत् **सुमतिविजयो**ऽप्यल्पधिषणः
पदार्थज्ञो नित्यं तदनुमतिमिष्टामभिलषन् ॥ १५ ॥
अनुच्छिन्नं यद्यत् प्रथममपरैः संशयपदं
सुधी**र्लक्ष्मीचन्द्रो** मुनिवरमपृच्छत् तदखिलम् ।
असौ सम्यग्युक्तोत्तरमवितरत् तद्यदभव-
न्मनो निष्ठं तस्याऽनघगुणसमापत्तिप्रवणम् ॥ १६ ॥
स इत्थं सङ्घस्याऽतुलगुणगणोल्लासवशतो
निकामं सद्भक्त्या हृदि समवसद् गौरवपदम् ।
अवात्सीदन्येषामपि परिचितानां हृदि गुणै-
रहार्यैः सुश्लाघास्पदमतनु सोऽभूच्चरणतः ॥ १७ ॥
अथाऽन्येद्युः सङ्घानुपदिशनमर्त्यानिव वरान्
हितं तत्तद्योग्यं मितमनघमर्थ्यं सुविहितम् ।
प्रसङ्गात् सद्विद्याममितफलदां व्यास्थदुपमा-
विहीनामेकान्तादमितमतिरित्थं धृतदयः ॥ १८ ॥
यया स्वेष्टज्ञानं भवति मनुजानां हितकरं
ययाऽनिष्टोद्बोधाद् विरमति जनोऽकृत्यकरणात् ।
सृते यां ना नूनं भवति च पशुः पुच्छविकलो
जनास्तां सेवध्वं वरविनयदां धर्मजननीम् ॥ १९ ॥
ययैकाकी वाग्मी विहरति जनोऽनर्थवियुतो
निकामं निर्भीको निखिलपृथिवीमेव ससुखम् ।
प्रवेशो निर्द्वन्द्वो नृपसदसि सम्मानसहितो
यया कस्तां नेच्छेज्जन इह शुभार्थप्रजननीम् ॥ २० ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यया हीनो नाऽऽत्मा निजकमपि रूपं सुप्रथितं
त्वयैत्य ज्ञानान्धो ब्रुडति च भवापारजलधौ ।
रुचिर्यस्या बोधो भवति महितस्तच्च चरणं
जनास्तां सेवध्वं सुगुरुनिकटे मुक्तिजननीम् ॥ २१ ॥
अभाज्यं दायादैरपि सुमतये दत्तमधिकं
त्वचौर्यं लुण्टाकैर्नृपकरविहीनं च सुदृढम् ।
धनं विद्यासञ्ज्ञं निजहृदयकोशस्थमजरं
जनाः सेवध्वं भो ! परभवगमेकं कृतधियः ॥ २२ ॥
तदीयव्याख्यानैः परहितसमुद्बोधनिपुणैः
समुद्बुद्धः सङ्घो मितवसुरपि प्राज्यगुणभृत् ।
वरां विद्याशालां **मधुपुर**पुरेऽस्थापयदरं
शिशूनां बोधाप्त्यै वरनियमदीप्तां स्ववसुभिः ॥ २३ ॥
सरस्वत्यावासं विमलमकरोत् पुस्तकगृहं
सुनिर्वृत्तेः स्थानं परसुकृतकार्यं परमपि ।
धनं तेषां तत्र व्ययितमनपाय्यापरभवं
बभूव श्राद्धानां गुरुवचननिष्ठामलधियाम् ॥ २४ ॥
चतुर्मास्यां तस्यामनवरतधर्मश्रवणतो
दिनानि श्राद्धानां क्षणमिव ययुस्तस्य निकटे ।
अभून्निर्विघ्नं तद् धृतमहिमपर्यूषणमपि
वरिष्ठं पर्वाणां दिवसवरसांवत्सरिकयुक् ॥ २५ ॥
चतुर्मासीपूर्त्युत्तरदिवसभक्त्या विमलया
न कः स्वस्वावासे मुनिमथ निनीषुस्तमभवत् ।
कथङ्कारं कुर्यादमितगमशक्तोऽपि युगप-
न्निवासं तेष्वेकः समदृगपि सोऽकुण्ठधिषणः ॥ २६ ॥
नवे वर्षे प्राप्ते नयनशरनिध्येकप्रमिते (१९५२)
विहर्तुं तस्याऽभून्मतिरमितभक्तादपि पुरात् ।
न कल्पस्योत्क्रान्तौ मतिरनघकल्पागमदृशो-
ऽभवत् स्वप्नेऽप्यस्याऽऽर्हतमतवितानैककृतिनः ॥ २७ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

समं तद्ग्रामीणा जिगमिषव एतेन मुनिना
बभूवुस्तं **सिद्धाचल**प्रवरतीर्थं प्रति तदा ।
अयं जानन् धर्मोन्नतिमित उपात्तागममतिः
समं यात्रां चक्रेऽमितजनसमाजेन मुनिराट् ॥ २८ ॥
स सङ्घस्तेनोक्तं विधिमनुसरन् शास्त्रविहितं
प्रकुर्वन् वात्सल्यं पुरि पुरि ययौ तीर्थप्रवरम् ।
वपन् सप्तक्षेत्र्यां वसुसुकृतबीजं जिनपतीन्
प्रपूज्याऽऽगान्नत्वा गुरुवरममुं स्वं **मधुपुरम्** ॥ २९ ॥
विहारं सङ्कुर्वन् पुरि पुरि मुनि**र्नेमिविजयः**
प्रबोधं श्राद्धानां हितमितवचोभिर्विमलयन् ।
प्रकुर्वन्नन्येषामपि हृदि मुदं तत्त्ववचनै-
र्मुनीनां सन्मार्गे निरुपधिप्रसिद्धिं स गतवान् ॥ ३० ॥
पुरे यस्मिन् व्यस्थाच्छ्रुतवचनमेकं त्वपि दिनं
सदृष्टान्तन्यायागमप्रभृतिनद्धैस्तु वचनैः ।
पुरे तस्मिन् श्राद्धा नियतगुरुसेवैकधिषणा
अपि प्रह्वा जाताश्चरणयुगले तस्य कृतिनः ॥ ३१ ॥
यथा चातुर्मास्यं निकटमभवद् गच्छति दिने
तथा श्राद्धास्तत्तत्पुरनगरतस्तस्य निकटे ।
समाजग्मुर्भक्त्या निजनिजपुरं नेतुमचिरा-
दमुं विद्यावाचस्पतिमनुपमब्रह्मसदनम् ॥ ३२ ॥
स**वर्द्धं मानं** यत्पुरवरमनन्यार्थघटनात्
स्वनाम स्वीचक्रे जगति ननु **सौराष्ट्र**विषये ।
पुरं तत्तद्वास्यप्रमितवणिजामाग्रहवशा-
ज्जगामाऽसौ धर्मोन्नतिकृतिपरो **नेमिविजयः** ॥ ३३ ॥
तदीयप्रौढोक्त्या विविधनयसाम्राज्यभृतया
सरस्वत्या साक्षादिव कलितमूर्त्याऽभिनवया ।
मुदं प्रापुः श्राद्धाः किमपि मनुजा लभ्यमसमं
त्वमान्तो व्याख्यानालयविततमध्ये समुदिताः ॥ ३४ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स चाऽऽगात् तत्पार्श्वे **दिनकरकृती** व्याकृतिचणो-
ऽपठत् तस्मान्नेमिः मुनिरथ च शाब्दीं सुविमलाम् ।
सकाले व्याख्यानं ददपि निजाधीतमखिलं
नवीकुर्वन्नव्यं त्वपठदपि सङ्घार्थप्रवणः ॥ ३५ ॥
य एकस्मिन् कस्मिन्नपि सुकृतयोगाच्च दिवसे
तदीयं व्याख्यानं श्रुतियुगपुटेऽधात् कथमपि ।
स किं श्रुत्वाऽन्येषां कलितवचनाडम्बरमहो
गतार्थं व्याख्यानं तदनु मुदमापाऽर्थरसिकः ॥ ३६ ॥
स तस्मिन्नेवाऽब्दे गुरुचरणपूजैकधिषणं
नियोज्याऽर्हद्दीक्षां भवजलधिपाराप्तितरणिम् ।
मुनिश्चक्रे शिष्यं विमलकुलजातं च वणिजं
यमाचख्यौ नाम्ना विनतमिह **सौभाग्यविजयम्** ॥ ३७ ॥
अथैकः कस्मैचिन्मुनिरनिपुणो यौक्तिकगतौ
ददौ दीक्षां जैनीं सममतिभिरन्यैः समुदितः ।
तदीयास्तं नव्यं नृपपुरुषसङ्घस्य बलतो
गृहे नेतुं चक्रुर्मुनिनिकटमागत्य कलहम् ॥ ३८ ॥
भयात् तेभ्योऽशक्तानवितुमवगत्याऽथ च मुनीन्
नवं तान्नीतिज्ञो मुनिरयमवस्थाप्य निकटे ।
प्रतापस्याऽऽवासो विदितनृपनीत्याशयतति-
र्हतोत्साहान् श्राद्धान् द्रुतमुपगताँस्ताँश्च विदधे ॥ ३९ ॥
समीपे सम्प्राप्तं नृपपुरुषमुद्दामधिषणं
कुटुम्बेभ्यो दातुं कृतदृढप्रतिज्ञं नवमुनिम् ।
तथाऽपृच्छद् वाग्मी ह्यधिकृतविधायी मुनिरसौ
यथा मूकीभावास्पदमतनुमानं तमकरोत् ॥ ४० ॥
अधृष्यं तं मत्वा मुनिवरमभीतं नयपटुं
स तुष्टावाऽत्यर्थं नृपपुरुष आतङ्ककलितः ।
कुटुम्बानां तस्य त्वपनयनचर्चाऽपि विगता ।
सुजाता तं नन्तुं मतिरमितापं श्रितदयम् ॥ ४१ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स इत्थं साधूनां निजशरणगानां मुनिवरः
प्रकुर्वन् संरक्षां जिनमतमखण्डं विशदयन् ।
रुचिं तत्रत्यानां प्रतिदिनमनूनां श्रुतचये
दृढीकुर्वंस्तस्थौ मुनिगणवृतस्तत्र नगरे ॥ ४२ ॥
बभौ चातुर्मास्यं सुकृतनिचयैस्तेन मुनिना
प्रबोधं प्राप्तानां श्रुतचितवचोभिः पुरवरे ।
न चाऽभूदन्योन्यं कलहघटनासङ्गनिचये
परा प्रीतिर्जाता परमपरवर्षानधिगता ॥ ४३ ॥
स विद्योन्नत्यै तानथ वसुमतः श्राद्धतिलकान्
सुविद्याप्रेमात्तान् हितमितवचोभिः समकरोत् ।
कृता विद्याशाला शिशुजनविबोधाय प्रथिता
समक्षं तस्यैवाऽनुपथि गुणभक्तैः प्रमुदितैः ॥ ४४ ॥
स कोऽप्यासीन्नाऽस्यां पुरि तदुपदेशात्तमतिको
जनो यस्तद्भक्त्या विफलहृदयः स्यात् कथमपि ।
चतुर्मासीपूर्तौ परपुरजनोद्धारधिषणं
मुनिं तं ते द्रष्टुं निजपुरि सदैच्छन् कृतधियः ॥ ४५ ॥
स **नेमि**स्तान् श्राद्धान् स्वविहरणविघ्नानिव पुरो
विदित्वोपादिक्षज्जिनमतरहस्यं तु किमपि ।
स्वयं जैनीमाज्ञां मनसि निदधानो विहरणं
चकाराऽऽप्तग्रामानुसरणविधिज्ञो मुनिवरः ॥ ४६ ॥
जगामाऽसौ यस्मिन् प्रथितमहिमो **नेमिविजयः**
पुरे तस्मिन् श्राद्धा विविधजिनपूजां विदधिरे ।
समन्ताद् वात्सल्यं तदहरजनिष्ट प्रमुदितैः
बभासे स ग्रामोऽभिनवजनताव्याप्तसरणिः ॥ ४७ ॥
गृहं व्याख्यानस्याऽतिविततमपि श्रोतृनिकरैः
समाच्छन्नाभोगं तदुपगमनेऽजायत भृशम् ।
परं चित्रं तत्राऽप्यखिलजनसुश्राव्यमभवद्
यदुच्चैर्व्याख्यानं सकलमभितस्तस्य कृतिनः ॥ ४८ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदा प्रश्नं व्यास्थत् स्वपरमुनिगर्वप्रकटनात्
तदा सभ्यास्तथ्यं परमतमसम्बाधमविदन् ।
यदा दौस्थ्यं तस्योत्तरदलपरः सोऽप्रकटयत्
तदाऽसत्यं पूर्वं सकलमविदन् किं न कृतिनः ? ॥ ४९ ॥
न तस्य व्याख्याने किमपि वचनीयं समभवत्
न किञ्चित् प्रष्टव्यं त्वप्रकटितसमाधानमभवत् ।
अतो नो श्रोतॄणामविहतमतीनामपि तदा-
ऽवकाशः प्रश्नानां कथमपि बभूवाऽनुपधितः ॥ ५० ॥
यदा प्रष्टाऽज्ञानादथ च विमतेर्वाऽधिकतर-
प्रबोधायाऽप्राक्षीद् गहनविषयं तं मुनिवरम् ।
तदा पृष्टो **नेमिः** श्रुतनयसमुल्लासवचनै-
स्तथा व्यास्थत् प्रष्टा चरणविनतोऽजायत यथा ॥ ५१ ॥
इत्थं जनानां मुदमाततान
व्याख्यानतो **नेमि**रपेतदोषः ।
कीर्त्तिस्तदीयाऽप्रतिघा जगत्सु
जहास चन्द्रं प्रथिताङ्कदोषम् ॥ ५२ ॥

**इति पञ्चमः सर्गः ॥**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# अथ षष्ठः सर्गः

## (शार्दूलविक्रीडितं छन्दः)

येन त्यक्तमकण्टकं नृपपदं साम्राज्यधामास्पदं
मोहाद्याः क्षपिता निसर्गविषमोल्लासाः समूलं द्विषः ।
सोढाऽसह्यप्रभूतदुःखघटना प्राक्कर्मबीजोद्भवा
**वीरः**सोऽक्षयधामगोऽवतु सदा विघ्नौघतो वो विभुः ॥ १ ॥
**श्रीनेमि**र्विहरन् कुकर्मनिचयोच्छेदाय तत्तत्पुरे
श्राद्धानां जिनमन्दिरादिसुकृतान्येभिस्तथोल्लासयन् ।
कुर्वन् जैनमतप्रचारममलं तैस्तैरुपायैरथो
भव्यानामुदयाय राजनगरस्थानां बभूवोन्मुखः ॥ २ ॥
तं **नेमिं** मुनिराजिराजितमतिप्रोद्दामधामालयं
विश्वासैकपदं सदार्थमननावृत्त्यात्तशास्त्रोच्चयम् ।
आनेतुं पुरवर्य**राजनगरं** तद्वासिनः श्रावका
भूयांसः कृतबुद्धयस्त्वभिययुस्तत्पादपूतं पुरम् ॥ ३ ॥
तेषामाग्रहतोऽतिभक्तिरचितादिष्टार्थभूमान्वया-
देकान्ताप्रतिपत्त्ययोग्यविषयात् सङ्घोदयाधिष्ठितात् ।
स्वीचक्रे स मुनिर्निसर्गकरुणाम्भोधिः परार्थोदय-
स्तत्र स्वागमनं नु **राजनगरे** सद्भावनाप्रेरितः ॥ ४ ॥
**श्रीनेमे**स्तु पुरप्रवेशसमये सर्वे प्रशस्तोदया
भाव्यार्थप्रचयानुसारिगतयः किं नो बभूवुर्ग्रहाः ।
आयत्यां कथमन्यथा तदुदितेष्टार्थप्रसिद्ध्यग्रिमो-
पायेनाऽव्यभिचारिणा शुभततिः सङ्घेऽभविष्यत् परम् ॥ ५ ॥
नाऽऽसंस्तत्र मुनीश्वरा न बहवः स्वभ्यस्तशास्त्रोच्चया
योगाराधनतत्पराः प्रतिदिनं व्याख्यानबद्धादराः ।
किन्त्वस्याऽस्खलितार्थसङ्गतिमितप्रव्यक्तभावोल्लस-
द्व्याख्यानेन तदेकभक्तिमनसो जाताः परेऽप्यार्थिकाः ॥ ६ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्तत्त्वार्थमतिप्रभूतविषयं गूढार्थसूत्रोच्चयं
सद्व्याख्यागमितार्थभाष्यकलितं सैद्धान्तिकैराश्रितम् ।
तद् व्यास्थन्मुनिपुङ्गवोऽतिमहितव्याख्यानशैल्या कृती
व्याख्याने प्रतिवासरं सुनियते काले जनैरर्थितः ॥ ७ ॥
श्रोतारोऽप्यमितार्थशास्त्रनिचयैदम्पर्यधीशालिनो
नित्यं तत्र समाययुर्नवनवोद्बोधाशयाकर्षिताः ।
दुर्भेद्यं निजमानसैकनिलयं संशीतिवृन्दं जहु-
र्व्याख्यानश्रवणेन तस्य कृतिनस्ते च स्वयं यौक्तिकाः ॥ ८ ॥
येषां नाऽर्थगतौ विवेकचतुरा प्रज्ञा श्रुतालम्बिनी
भक्तिश्चाऽर्थनिसर्गतो जिनमतेऽभूदद्वितीयाऽभितः ।
तेषां धर्मकथाभिरेष विबुधो व्याख्यानशैल्याऽनयद्
बुद्धिं धर्मपथप्रवृत्तिचतुरां सत्कर्मणां भूतये ॥ ९ ॥
**प्राग्वाटे**ति प्रथां गतोऽत्र वणिजां वंशो विभूत्युज्ज्वलः
तत्र श्री**भगुभाइ**नामविदितोऽभूद् धर्मरक्तो वणिक् ।
पुत्रस्तस्य प्रतापकीर्तिनिलयः प्रज्ञावतामग्रणीः
श्राद्धानां च शिरोमणि**र्मनसुखे**त्याख्योऽभवद् धार्मिकः ॥ १० ॥
येनाऽकारि निसर्गतो जिनमतश्रद्धाप्सितो भूतले
तत्तत्तीर्थवरेषु यात्रिकसुखाप्त्यै धर्मशालोच्चयः ।
नीतं येन नवीनचैत्यकरणात् प्राचां तथोद्धारतो
बिम्बानां सुप्रतिष्ठितेश्च परमं साफल्यमर्थव्यये ॥ ११ ॥
श्रेष्ठी सोऽप्यतिरागवान् प्रतिदिनं तत्राऽऽजगामोत्सुको
व्याख्याने मुनिराज**नेमिविजयो**क्त्युद्दामधामालये ।
तत्त्वार्थार्थविचारणां सुविमलां श्रुत्वाऽवधानान्मुहु-
स्तत्पाण्डित्यचमत्कृतः स नितरां तस्यैकभक्तोऽभवत् ॥ १२ ॥
प्रेम्णां सद्म बभूव सोऽपि कृतिनस्तस्याऽद्वितीयं मुने-
र्नो दीर्घस्तु व्यपेक्ष्यतेऽत्र समयोऽपेक्ष्यस्तु काम्यो गुणः ।
एकः साधुगुणालिभावितमना अन्यो गुणज्ञस्तरां
योग्या सा गुरुशिष्यभावघटना केषां न मोदास्पदम्? ॥ १३ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

येनाऽनल्पवसुव्ययेन महिते तीर्थेऽभितः कारिता
बह्व्यो भव्यजनौघविश्रमभुवस्ता धर्मशाला वराः ।
येनाऽकारि जिनालयोऽतिविपुलः शोभाद्वितीयालयो
लोकानां नयनद्वयाद्भुतफलं सत्कौशलं शिल्पिनाम् ।। १४ ।।
नीता येनतरां सुपात्रनिचये दानेन वृद्धिं रमा
नाऽर्थी कोऽपि कदाऽपि काङ्क्षितधनादानात् कदर्थीकृतः ।
दुर्भिक्षेषु धनव्ययो न गणितः सर्वेषु वर्णेष्वपि
प्राप्तं येन यशो निशाकरसमं गीतं समस्तैर्जनैः ।। १५ ।।
सङ्घस्तम्भनिभः स धर्मनिलयः श्री**केशरीसिंह**जी
**हट्ठीसिंह**सुपुण्यनामप्रथितोऽभू**दोसवाले**ऽन्वये ।
तत्पुत्रो नृपराजिमित्रमभवत् सङ्गीतरागाम्बुधिः
श्रेष्ठी श्री**जयसिंह**नामविदितः सङ्घेऽग्रणीर्धार्मिकः ।। १६ ।।
सोऽप्यस्याऽनुपमार्थयुक्तिमहिताभीष्टोपदेशास्पदाद्
व्याख्यानादमितप्रमोदकलितो जातः श्रुतान्नित्यशः ।
भक्तिस्तस्य मुनौ तु **नेमिविजये** तस्मिन् प्रशस्तोदया
जाता तत्परिवार एव निखिलो भक्तो बभूवोज्ज्वलः ।। १७ ।।
यो नित्यं जिनपूजया निजजनुस्साफल्यमासादयद्
धर्मे यस्य मतिः सदैव विमला **गङ्गा**म्बयोत्तम्भिता ।
स श्रेष्ठी **दलपत्य**भिख्यतनुजो भूषौ**सवाला**न्वये
श्री**लाला**भिध एतदीयचरणोपास्त्येकलीनो वणिक् ।। १८ ।।
अन्ये धर्मधुरन्धराश्च नगरश्रेष्ठ्यादयो विश्रुताः
श्रुत्वैवाऽस्य मुनेर्निसर्गमधुरां सद्देशनाभारतीम् ।
जाताः किं न तदीयसङ्गतिविधौ नित्यं समुल्लासतः
सन्मन्त्रस्पृहया विभूत्यभिमुखा बद्धोद्यमा धीधनाः ।। १९ ।।
श्रोता तत्त्वकदम्बकस्य नगरे तस्मिन्न सोऽभूत् सुधी-
र्यस्तत्त्वार्थविचारतोऽस्य नितरां नाऽऽनन्दमग्नोऽभवत् ।
एवं सङ्घसमष्टिचित्तगृहगो **नेमिः** प्रसिद्धिं परा-
मेकेनाऽपि च वत्सरेण स मुनिस्तत्राऽवगाहे पुरे ।। २० ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थं धर्मविवृद्धये प्रतिदिनं सद्देशनामत्यजन्
प्रज्ञावान् स मुनिर्न जात्वपि जहौ स्वाभ्यासमंशादपि ।
तत्तद्व्याकरणातिकष्टविषयाभ्यासे प्रदत्तावधौ
यः स्वीयां निरुपध्य पूरयदथो सन्धामवन्ध्यां तदा ।। २१ ।।
साऽपूर्वा रचनाऽप्यभीष्टघटना श्रीपञ्चतीर्थ्यास्तदा
श्राद्धैर्धर्मधनैरकारि महिता तद्देशनानोदितैः ।
यां दृष्ट्वा प्रतिबिम्बितामिव पुरः किं पञ्चतीर्थीं जनाः
साक्षाद् दृष्टिगतां न चक्रुरमितानन्दोल्लसन्मानसाः ।। २२ ।।
चातुर्मास्यमनामयं तदखिलं पुण्यौघविस्फूर्जितं
श्राद्धानां मुनिशेखरस्य चरितैः पूर्त्तिं जगामोज्ज्वलैः ।
यत्राऽनल्पव्रतानुरञ्जिततरा पर्यूषणाष्टाह्निका
व्याख्यानोल्लसिता बभौ सुकृतिनां संवत्सरी राजिता ।। २३ ।।
कञ्चित् कालमगण्यपुण्यविभवैस्तैः श्रावकैर्भक्तितः
चातुर्मास्यप्रपूरणेऽपि स मुनिस्तत्रस्थौ भृशं कर्षितः ।
आचारं परिभावयन् स च पुनः स्वीयं पुरीतस्ततः
**श्रीनेमि**र्विजहार साधुचरणोपास्त्येकचित्तो द्रुतम् ।। २४ ।।
यं यं ग्राममलञ्चकार विहरन्**नेमि**र्गुणाम्भोनिधि-
र्जैनप्राज्यमतप्रचारनिपुणश्चारित्रचूडामणिः ।
तत्तद्ग्रामनिवासिनो निरुपमार्हद्भक्तिनिष्ठां गताः
तद्वाचा विदधुः परस्परमतिप्रेम्णा सुपुण्यावलीम् ।। २५ ।।
तद्वाक्यं न तिरश्चकार जनता यद्भिन्नरुच्या मिथो
यच्च प्राज्यप्रभावमेनमभितस्तुष्टाव तैस्तैर्गुणैः ।
तत् सर्वं ननु तस्य वामनयनावैमुख्यमभ्यस्यतो
जन्मारभ्य निसर्गतस्त्रिकरणैरापुण्यविस्फूर्जितम् ।। २६ ।।
**श्रीचिन्तामणिपार्श्वनाथ**महिमोद्गीतप्रभावं वरं
यत्तीर्थोत्तमतामवाप्य जगति प्रद्योतते पावनम् ।
मन्त्राराधनतश्च यत्र बहवः प्राज्ञो मुनीशा विभो
सिद्धार्थाः किमु नो बभूवुरमिति(त?)ज्ञानर्द्धयो विश्रुताः ।। २७ ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चौलुक्यं** नृपतिं ररक्ष सभयं **श्रीहेमचन्द्रो** मुनिः
**सिद्धार्थान्**नृपतेश्च यत्र नगरे तीर्थोत्तमे युक्तितः ।
श्रीमान् **वाचकराड् यशोविजय**वाक्ख्यातोऽमितज्ञानभृद्
यत्रौन्नत्यमरं द्विलक्षप्रमितापूर्वं कृतेराप्तवान्(?) ॥ २८ ॥
श्राद्धानामतिभक्तिलम्भितसमुल्लासाग्रहादान्तराद्
रागाच्चाऽतुल**पार्श्व**मूर्त्तिविषयादाकर्षितोऽसौ मुनिः ।
अर्हद्धर्मसुसज्जसम्प्रतिनृपादेशोपजातानघा-
नल्पार्हत्प्रतिमालयं पुरवरं तं **स्तम्भतीर्थं** ययौ ॥ २९ ॥
तत्पार्श्वं समलञ्चकार मतिमा**न्नानन्द**नामा मुनि-
र्बुद्ध्या **सागरगच्छ**मच्छमतनोद् यो बालभावेऽप्यरम् ।
उद्वाह्याऽपि सुसुन्दरीं कुलभवां यः कामवामो ललौ
दीक्षामात्मविनोदिनीं मुनिवराच्छ्रीम**ज्झवेरा**भिधात् ॥ ३० ॥
तस्मिन्नागमबोधसद्मनि मुनौ प्रह्वे समुत्केतरां
न्यायस्याऽध्ययने सुतत्त्वमननैकान्तावबद्धस्पृहे ।
योग्यत्वावगतेर्निसर्गकरुणाम्भोधिः स **नेमिः** परं
प्रेमाकल्पितकं ततान मुनिराड् वीतस्पृहाग्र्योऽपि सन् ॥ ३१ ॥
**श्रीमालान्वयप्रेमचन्द्र**तनुजः सङ्घावतंसोऽवधे-
र्धर्मोद्योतकृदग्रणी**रमरचन्द्रा**ख्योऽभवत् तत्पुरे ।
नित्यं योऽतुलभक्तिभावितमनाः कृत्वा प्रभातक्रियां
**श्रीचिन्तामणिपार्श्वनाथ**प्रतिमां दृष्ट्वा ननामाऽर्हतः ॥ ३२ ॥
योऽवन्दिष्ट मुनीन् स्वधर्मनिरतान्नित्यं प्रसन्नाशयो
यः साधून् प्रतिलाभ्य भक्तिभरतोऽभुक्ताऽवशिष्टं सदा ।
व्याख्यानं मुनिराज**नेमिविजय**स्योद्गच्छदच्छान्वयं
श्रुत्वाऽऽनन्दनिमग्न आदरभरैः सोऽपूजयत् तं मुनिम् ॥ ३३ ॥
पश्चाऽप्यस्य वणिग्वरस्य तनयाः धर्मैकलीना बभु-
स्तेष्वप्यग्रतनूद्भवोऽमितगुणः श्री**पोपटा**ख्योऽभवत् ।
भक्तः सोऽतितरां बभूव विदुषो **नेमे**र्गुणाकर्षितः
सङ्घस्तम्भनिभः सुधार्मिकजनप्रोत्साहनैकान्तभूः ॥ ३४ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्पुत्रः **पुरुषोत्तमे**ति प्रथितो वप्तुर्गुणैराश्रितो
बुद्ध्या निर्मलया परोपकरणे नित्यं बभूवोद्यतः ।
वाणिज्येऽप्रतिघा मतिः फलवती धर्म्यार्थबुद्ध्युन्मुखा
यस्याऽभूत् कुशला कुधर्मविमुखा सौजन्यसम्भ्राजिता ॥ ३५ ॥
प्राप्तं येन पुरेऽखिलैरपि जनैरात्मीयताभागतै-
रौदार्यादिगुणप्रकर्षबलतः पूर्णेन्दुतुल्यं यशः ।
नीताऽत्यन्तलयं कुमार्गरचना विद्वेषिणां सर्वतो
याथार्थ्यं निजनाम्नि येन गमितं तैस्तैर्विशेषैः स्वतः ॥ ३६ ॥
सोऽप्येनं मुनिवर्यमर्चितपदं श्राद्धैः सदैवाऽभितः
भक्त्यैकान्तगुरुत्वबुद्धियुतयाऽसेविष्ट नित्यं गुणी ।
तस्मिन् धर्मपरायणे विनयिनामग्रेसरेऽकल्मषे
**श्रीनेमे**रपि प्रेमवृद्धिमभजत् स्वीयत्वबुद्ध्या न किम् ? ॥ ३७ ॥
निस्सङ्गोऽपि मुनिस्तदीयचरितैर्धर्माद्वितीयास्पदै-
रक्षुद्रैश्च तुतोष तं प्रति कृती तद्भक्तिसङ्कर्षितः ।
धर्मे चित्तमतीव युक्तिनिकरैर्दृष्टान्तव्युज्जृम्भितै-
र्लग्नं तस्य दृढं चकार किमु नो सद्देशनापण्डितः ? ॥ ३८ ॥
सङ्घे तत्र पुरेऽतिभक्तिपदवीं नीतो जिनार्च्चादिके
सत्कर्मण्युपदेशतः प्रतिदिनं **श्रीनेमि**नामा मुनिः ।
व्याकृत्यादिविवेचनावगतये **वाराणसी**तः पुराद्
विद्वांसौ ननु तर्कशब्दकुशलावानीतवान् धीधनौ ॥ ३९ ॥
श्रीमान् **चन्द्रधरा**भिधो द्विजवरो विद्यावतामग्रणी-
स्तत्रैकोऽमलशब्दसाधनविधौ सल्लक्षणादेः पटुः ।
यस्याऽऽसीन्ननु भारती सुपठिता कण्ठावतंसोत्तमा
यस्याऽध्यापनचातुरी निरुपमा नैसर्गिकीवाऽभवत् ॥ ४० ॥
श्रीमान् **केशव**सञ्ज्ञकोऽक्षिचरणस्यैवाऽवतारोऽपरो
**झो**पाह्वः कवितावितानघटनानैपुण्यभाग् **मैथिलः** ।
शास्त्रेष्वप्रतिघा विवेकनिपुणा बुद्धिर्यदीयाऽमला
साहित्यावगतिश्च काव्यनिचयैदम्पर्यप्रोद्घाटिनी ॥ ४१ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताभ्यां सार्द्धमनन्ययोजितमनाः शास्त्रेषु लीनोऽभव-
च्छ्री**नेमि**र्मुनिराडकुण्ठधिषणस्त्यक्तप्रमादः सदा ।
पूर्वाध्यापकमादिशद् **दिनकरं** व्याकृत्यनन्योपमं
छात्राध्यापनकर्मणा स्वनिकटे संयोजयन् पण्डितम् ॥ ४२ ॥
**आनन्दाम्बुधि**मप्यमन्दधिषणं **मुक्तावली**मात्मसात्
कर्तुं सोऽध्ययने दिदेश समयस्याऽऽलोचने चाऽन्वहम् ।
शिष्यं **श्रीसुमतिं** त्वपाठदयं चारित्रचूडामणिं
व्याख्यानं प्रतिवासरं सुनियते काले ददौ चोज्ज्वलम् ॥ ४३ ॥
इत्थं सोऽब्धिशराङ्कचन्द्रप्रमितं (१९५४) संवत्सरं तत्पुरे
चातुर्मास्यसुखप्रपूर्त्तिसुभगं निन्ये त्वतीतास्पदम् ।
नव्यं बाणशराङ्कचन्द्रप्रमिते (१९५५) संवत्सरे श्रेष्ठिनं
कृत्वा सङ्घपतिं चचाल मुनिराट् **सिद्धाचलं** सङ्घयुक् ॥ ४४ ॥
सङ्घः सोऽतितरां बभौ च मुनिना प्रज्ञावताऽलङ्कृतः
तेनाऽऽ**नन्द**युजा तथा प्रमुदितेनेशेन विद्योतितः ।
यात्रालालसमानसैरप्रमितैर्वृद्धिं परां गाहितो
मार्गायातपुरेषु मोदकमुखैर्वात्सल्यतोऽभूद् युतः ॥ ४५ ॥
आयातं निकषा पुरं मुनिवरं तं सङ्घविभ्राजितं
श्राद्धास्तत्पुरवासिनः समुदिता आनर्चुरत्यादरात् ।
आमन्त्र्याखिलसङ्घमेव सपतिं स्वस्वप्रभूत्या मुहु-
र्वात्सल्यं विदधुः परस्परसमुत्कर्षस्ततः कोऽप्यभूत् ॥ ४६ ॥
यं यं ग्राममगादखण्डयशसा साकं मुनीशेन तत्
सङ्घोऽनल्पवसुव्ययेन विधिना पत्या समुद्दीपितः ।
सर्वस्मिन् ननु तत्र कीर्तिरनघा धर्मप्रवृत्त्योज्ज्वला
जीर्णोद्धारमुखाग्र्यकृत्यनिचयारम्भाद् दिदीपे तदा ॥ ४७ ॥
साकं सो**ऽमरचन्द्र**सङ्घपतिना तत्पुत्रपौत्रादियुक्
सङ्घः **सिद्धगिरिं** जगाम मुनिना तेनाऽतिभूमिं गतः ।
तत्राऽनल्पवसुव्ययो न गणितः साधर्मिकाद्यर्चने
तेनाऽकृत्रिमभक्तिभूषितहृदा सङ्घाधिपेनाऽभितः ॥ ४८ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्चा तत्र जिनेशितां शुभयुजा सङ्घेन पत्या समं
भक्त्या या रचिता प्रभूतकुसुमाद्यन्यूनभङ्गोज्ज्वला ।
सा शक्या गुरुणाऽपि किं दिविषदां व्यावर्णितुं तत्त्वतो
वर्षैरप्यमितैरमेयवचनैरेकान्ततो वृत्तिभिः ॥ ४९ ॥
सप्तक्षेत्र्यपि तेन योग्यवसुतः सङ्घाधिपेनाऽऽदराद्
नीता पूर्त्तिमितीव तस्य च मुनेः सद्देशनैकार्थिनाम् ।
तत्रोन्नीतमकल्मषं निरुपमं यद्धर्मविभ्राजितं
पत्युः सङ्घसमष्टिभक्तिलसितं तत् कैर्यशो वर्ण्यताम् ? ॥ ५० ॥
यात्रामिष्टततिप्रदानकुशलां **सिद्धाचले** कामितां
कृत्वाऽपुण्यचयापचित्यभिमुखां सद्भाग्यलभ्यां वराम् ।
सङ्घस्तेन जिनागमैकमतिना धर्मावनीभूभृता
साकं तत्पुरमाजगाम मुनिनां पत्या च निर्विघ्नतः ॥ ५१ ॥
तत्राऽसौ मुनिराट् निसर्गगरिमाम्भोधेः प्रतापास्पदं
भ्रातुः **पोपट**सञ्ज्ञकस्य सदयोऽत्यन्ताग्रहात् सादरात् ।
सङ्घस्याऽमितभक्तितोऽप्यतितरामभ्यर्थनातो मुहुः
स्वीचक्रे पुनरप्यवस्थितिमितोऽभ्यासप्रवृत्तिं स्वतः ॥ ५२ ॥
शिक्षावल्लभ एष तत्र विबुधो नित्योद्यतो भूतये
बालानां पठनाय शास्त्रविततेरध्यापकान् वेतनैः ।
विद्यासद्मनि नूतनेऽथ नियतैरस्थापयच्छ्रेष्ठिना
श्राद्धेनाऽ**मरचन्द्र**सङ्घपतिनोदाराशयेनाऽर्थितः ॥ ५३ ॥
छात्रास्तत्र समभ्यसन् गुरुकृपामासाद्य मोदाञ्चिता
हैमव्याकरणादिशास्त्रमनिशं योग्यां स्थितिं लक्षिताः ।
शब्दव्याकृतिपण्डितो **दिनकरो** लब्धप्रतिष्ठो द्विजः
तत्राऽध्यापयति स्म तेन मुनिना संयोजितो वृत्तितः ॥ ५४ ॥
तत्राऽकुण्ठमतिः पपाठ सततं तेनाऽनुनीतो भृशं
**कस्तूरा**त्मजनिर्वरो **दलसुख**श्चन्द्रप्रभां वाक्पटुः ।
यः प्रेम्णां **पुरुषोत्तम**स्य भवनं भ्रातुर्गुणैर्निर्मलैः
यस्मिन् सोऽपि मुनिर्बभूव किमु नो योग्यत्वसम्पादकः ? ॥ ५५ ॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

यः सिद्धान्तरहस्यबोधविकलोऽभूत् **पायचन्द्रा**भिधो
नव्यं मार्गमकल्पयज्जिनमतेऽगीतार्थतालिङ्गितः ।
तत्पुष्टिप्रवणः कदाग्रहपरोऽभूद् **भ्रातृचन्द्रा**भिधः
सङ्घोत्क्रान्तजनानुरञ्जितपदो वामप्रवृत्तिः सताम् ॥ ५६ ॥
शास्त्रार्थाय तमाजुहाव मुनिराट् **नेमिः** स तस्मिन् पुरे
तन्मिथ्यात्वविधूननं सुजनतामध्ये विधातुं कृती ।
विद्यादृष्टिबहिष्कृतः समयतः शास्त्रार्थमार्गातिगो
लेख्यैरेव तु मुद्रितैः प्रलपितान् प्राकट्यमानीतवान् ॥ ५७ ॥
तत्राऽप्येनमसौ मुनिः सुकुशलः तैस्तैस्तु लेख्यैर्वरैः
युक्तिव्रातसमन्वितैः समकरोद्दुःश्लोकभाक्त्वं जने ।
एवं धर्मविवृद्धये मुनिवरो नित्योद्यतोऽप्यन्वहं
व्याख्यानं च ददन् न जात्वपि जहौ स्वाध्यायमभ्यासयुक् ॥ ५८ ॥
तत्र **स्तम्भन**पार्श्वनाथप्रतिमा याऽलौकिकी विश्रुता
तस्याः साङ्गविधेः प्रतिष्ठितिमसौ **नेमिर्**मुहूर्त्ते वरे ।
श्राद्धेना**ऽमरचन्द्र**सङ्घपतिना यां कारयामास तां
साक्षाद् दर्शनतोऽप्यलौकिकविधां व्यावर्णितुं कः क्षमः? ॥ ५९ ॥
तां द्रष्टुं बहवोऽमिलन् पुरवरे श्राद्धास्तदामन्त्रिताः
श्रीम**न्नेमि**मुनीश्वरोक्तिविहितां साङ्गां शुभैकावहाम् ।
शान्तिस्नात्रमभूत् प्रशंसिततरं त्वष्टाह्निकाद्युत्सव-
व्रातभ्राजितमङ्गलैकनिलयं सङ्घामितानन्ददम् ॥ ६० ॥
यो **हर्मनूजयकोब्यु**पाह्वविदितो गीर्वाणभाषाचणः
ख्यातश्चाऽऽङ्गलपण्डितेषु सततं शास्त्रव्रजालोचकः ।
अज्ञानात् प्रकटीचकार किल सोऽप्येवं जिनस्याऽऽगमे
मत्स्यादेरशनं सुसूत्रितमतो निर्दुष्टमेतन्ननु ॥ ६१ ॥
तस्मिन्नाऽऽङ्गलविद्यया परिगते पाश्चात्यदेशोद्भवे
ज्ञानं दर्शनतत्त्वगं कथमपि प्राप्तं स्वतोऽभ्यासतः ।
पाण्डित्यं परमं प्रकारनवकान् कुज्ञानदग्धान् जडा-
नासाद्याऽऽदरणीयवाक्त्वमसमं मा बोधयेदित्यतः ॥ ६२ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

**श्रीनेमि**र्मुनिराट् **सुखाब्धि**मुनिना स्वभ्यासमासेदुषा
सूत्रार्थं सुविचार्य सूत्तरमदाद् ग्रन्थात्मना निर्मितिम् ।
**मीमांसे**त्यभिधानमुत्तरवरे सोऽस्थापयद् धीधनो
ह्यन्वर्थं **परिहार**पूर्वकमतिप्रौढोक्तिसम्भूषिते ॥ ६३ ॥
ग्रन्थे तत्र यदुक्तिगुम्फनमतिस्फीतं सुगद्याश्चितं
युक्तिव्रातविभूषितं परगताज्ञानप्रकाशोल्बणम् ।
तन्मात्रादपि तस्य किं न कृतिनः पाण्डित्यमत्युज्ज्वलं
शैल्या लक्षितमान्तरं कृतिविदाऽभिज्ञेन नूनं स्वतः ॥ ६४ ॥
सर्वप्राणिषु सर्वदा त्रिकरणैर्हिंसानिवृत्तिर्व्रतं
येषां प्राणिदयैकलीनमनसां मुख्यं श्रुते गीयते ।
तेषां श्रीजिनपद्धतौ विचरतां मत्स्यादिमांसाशनं
सम्भाव्येत कथं सुसूत्रितमिति स्पष्टीकृतं तूत्तरे ॥ ६५ ॥
औषध्यन्तरवाचिका ननु पुनर्मत्स्येतिसञ्ज्ञा श्रुता
सूत्रे लिङ्गविपर्ययस्तु बहुधा किं प्राकृते नो मतः ।
टीकायां ननु बाह्यभोगपरता स्पष्टं भुजेर्दर्शिता ।
त**द्धर्मनूजयकोब्यु**दीरितमसत् तत्रेति निष्टङ्कितम् ॥ ६६ ॥
ग्रन्थं मुद्रितमागतं स्वनिकटे सद्गद्यपद्यान्वितं
तं **हर्मनूजयकोब्य**वाचयदतिप्रेम्णा स्वपक्षोत्तरम् ।
बुद्ध्वा जैनरहस्यमिच्छितपदे तस्मादनर्थालयं
स्वाज्ञानं स जहौ तदादि तमपि द्रष्टुं समुत्कोऽभवत् ॥ ६७ ॥
इत्थं धर्मधुरन्धरो मुनिवरः स्वाभ्यासकालेऽपि यत्
धर्मौन्नत्यविधौ बभूव नितरां तत्तत्क्रियादीक्षितः ।
तेनोत्सूत्रनिरूपणैकनिरता अज्ञानदग्धा जनाः
नो सान्निध्यमवापुरस्य भयतो दुष्कर्मसञ्चोदिताः ॥ ६८ ॥
चातुर्मास्यमकण्टकं मुनिवरः सम्पूर्य तस्मिन् पुरे
सोत्साहैः **पुरुषोत्तम**प्रभृतिभिर्भक्त्या भृशं सेवितः ।
साधोर्धर्ममवेक्ष्य चाऽऽग्रहततिं तेषां समाधाय तान्
श्राद्धान् सम्प्रतिबोध्य तैरनुगताध्वो **पेटलादं** ययौ ॥ ६९ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

छात्राः सर्वेऽपि तत्राऽध्ययनकृतिपरा आययुस्तेन साकं
वृन्दं चाऽध्यापकानां तदनुगतिपरं स्तम्भतीर्थाज्जगाम ।
इत्थं तत्राऽपि छात्राध्ययनमनुदिनं तत्समीपे त्वपूर्वं
साहाय्यादन्त्य**चन्द्रामर**तनुजमणेः **पोपट**स्याऽभवच्च ॥ ७० ॥
श्राद्धाः सर्वेऽपि तत्स्था गुणगणनिलये तत्र विद्याम्बुराशा-
वाजन्मब्रह्मनिष्ठे मितहितवचने किं बभूवुर्न नम्राः ।
माहात्म्यं तत्तदीयं निजपरिचयतोऽशेषमेवाऽऽत्मभक्तं
स्तोकेनाऽपीष्टसारोद्ग्रथितसुवचसा यच्चकारेष्टमिष्टम् ॥ ७१ ॥
जीवानां रक्षणार्थं मुनिगणमुकुटः **पिञ्जरापोल**नाम्ना
ख्यातं चाऽस्थापयत् सोऽभितजनहितकृद्भ्रातृभिः **पोपटा**द्यैः ।
एतत्स्वाभाव्यमस्याऽपरकृतमभवत् स्वप्रचारातिपूते
ग्रामे किञ्चित्त्ववश्यं सकलहितकरं कार्यमार्योपदेशैः ॥ ७२ ॥
तस्मादत्यन्तभक्त्या मुनिरमितदयः प्रार्थ्यमानोऽपि कामं
श्राद्धैः स्थातुं स **नेमि**र्ननु पुरवरतो निर्जगामैव विज्ञः ।
यस्मान्नैतादृशानां स्थितिरमितफला धर्मवृद्धिप्रवीणा
दृष्टा केनाऽपि लोके फलप्रभवमृते दीर्घकाला निसर्गात् ॥ ७३ ॥
नव्यां नव्यां स धीमान् पुरि पुरि विहरन् देशनां तत्त्वदृब्धां
भव्यव्राताय दत्त्वा निरुपमघटनाभ्राजितां भावपूर्णाम् ।
**नेमि**स्तं **राजपूर्वं नगर**मनुययौ षट्शराङ्केन्दुवर्षे (१९५६)
भक्त्या श्राद्धैरनल्पैरगणितविभवैः प्रार्थ्यमानस्तदीयैः ॥ ७४ ॥

***इति षष्ठः सर्गः*** ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## अथ सप्तमः सर्गः

### (हरिणी च्छन्दः)

अवतु भवतो भव्यान् **वीरो** निसर्गप्रभाकरो
व्यपगतरिपुव्रातो द्वन्द्वप्रवृत्त्यविलोकितः ।
सुरपतिमुखैरन्यैः पूज्यैः समर्चितविग्रहो
मितिनयमिलद्वाणीक्रोडीकृतार्थततिस्थितिः ॥ १ ॥
मुनिगणपतिं **नेमिं** श्राद्धा गुणौघविराजितं
तमतिशयितं साध्वाचारैरनल्पमुनीश्वरम् ।
अमितसुकृतैः प्राप्तं भक्त्याऽप्रवेशयदादरात्
पुरवरमिति ख्यातं तैस्तैः कलाकुशलैर्नरैः ॥ २ ॥
**मनसुख** इति ख्यातः श्रेष्ठी तदागमहर्षितः
प्रतिदिनमतिश्रद्धाप्रह्वस्तदन्तिकमाययौ ।
विविधविषयां व्याख्यां काले तदास्यविनिर्गतां
श्रुतमनुगतां श्रुत्वाऽत्यर्थं तुतोष तदन्तिके ॥ ३ ॥
प्रगुणितमतस्तस्य श्रद्धा मुनौ गुरुभावतो
हृदि नियमिताऽमान्ती लोके फलेग्रहिराबभौ ।
गुरुरपि **मुनिर्नेमिः** प्रेम्णा दृशा तमनन्यया
सुकृतनिरतं **श्राद्धं** भक्तं ददर्श गुणाकरम् ॥ ४ ॥
अगणितवसुव्रातं धर्मे विलोक्य दिदेश तं
शिशुगणहितां विद्याशालां विधातुमकल्मषाम् ।
व्यवहृतिविधेः शिक्षा धर्मावबोधपुरस्कृता
तत इति विदन् **नेमिः** शिक्षाप्रचारकृतादरः ॥ ५ ॥
स च **मनसुख**भ्राता श्रेष्ठी तदुक्तिप्रणोदितो
नियतनियमे विद्याशाले द्रुतं समकारयत् ।
जिनमतरतान् विद्यादक्षान् सुशिक्षणपण्डितान्
नियतसमयान् तत्स्थांश्चक्रे प्रकल्पितवेतनान् ॥ ६ ॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

बहुविषयगरस्तस्मिन् वर्षे त्ववृष्टिसमुद्भवो-
ऽभवदसुमतां दुर्भिक्षाह्वोऽसुखैकनिकेतनः ।
मरणशरणा भिक्षालाभाद् बभूवुरनल्पशो
विगतविभवा यस्मिन् सम्बन्धिनाऽप्यवधीरिताः ॥ ७ ॥
अपगतजलप्राया बीजप्ररोहविवर्जिता
तृणमपि न वै दातुं शक्ता पशुभ्य इलाऽभवत् ।
पतिरपि दयाहीनो दत्ते पशूनुदरम्भरिः
कुगतिगमनाभीरुर्यस्मिन् ददौ धनलाभतः ॥ ८ ॥
निजनिजकरव्यग्रा भूयात् स्वकोशसुरक्षणे
धनचयपरानर्थान् दातुं क्षमा व्ययभीरवः ।
इति मुनिवरो **नेमि**स्तस्मिन् कृपाम्बुधिरार्हतान्
हितमितसुधादेशोल्लासैश्चकार समुद्यतान् ॥ ९ ॥
उपचितमभूत् सद्यः श्राद्धैर्द्विलक्षमितं तदा
मुनिवरसमादेशाद् रूप्यं वणिक्कुलभूषणैः ।
यवनकरतो गास्ताः क्रीत्वा त्वमोचयदञ्जसा
समुचितधनैस्तासां रक्षापरोऽप्यभवत् पुनः ॥ १० ॥
कृतमनुपमं श्राद्धैः श्रीमन्मुनेरुपदेशतः
पशुगणमहद्दुःखोद्धृत्यै व्यवस्थितिबन्धनम् ।
यत उदभवत् संस्था पङ्ग्वादिदुःखनिवारिणी
जगति प्रथिता लोकैः सा **पिञ्जरा**भिधया वरा ॥ ११ ॥
सुकुलप्रभवान् श्राद्धान् दीनानितस्तत आगतान्
व्यपगतधनान् भिक्षावृत्त्योपजीवितुमक्षमान् ।
अमितमहिमा **नेमिः** श्राद्धैरक्षयदार्त्तितो
वसुवितरणैर्योग्यैः स्वीयोपदेशविबोधितैः ॥ १२ ॥
अवनपरता **नेमे**र्याऽभूत् तदोपधिवर्जिता
परमदयया जन्तौ मृत्योर्मुखादपि पालिनी ।
अभवदनया लोके कीर्तिर्गुणज्ञवितानिता
यदि निरुपमा तत्किं कामस्तयाऽनुमितो मुनिः ॥ १३ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदि मुनिरयं नाऽस्मिन् वर्षे पुरेऽत्र समागतः
कथमपि भवेत् तत् किं जीवेद् दरिद्रगणोऽभितः ।
पशुगणमृतिर्भक्ष्याभावात् तदा किमु किञ्च नो
इति पुरि जनाः सर्वे प्रोचुर्मुनेर्गुणरञ्जिताः ।। १४ ।।
ग्रहगणफलं **नेमे**र्दृष्ट्या पुरे ननु तत्र नो
जनितमिति नो ज्योतिःशास्त्रं बुधा विविदुर्मृषा ।
अवगतमतो **नेमे**र्जन्माक्षरेऽप्यथा सन्निधौ
न च जनिभृतां दुःखं भावीति तथ्यफलं ह्यदः ।। १५ ।।
गुणगणमयं **नेमिं** श्राद्धाः गुणग्रहलालसाः
स्वत उपययुर्भक्त्या तस्मात् सुमन्त्रमभीप्सवः ।
उपकृतिवरस्तेभ्यः शिक्षां ददौ मुनिरर्थितो
नवनवविधां यस्या धर्मोन्नतिः सम्भूत् परा ।। १६ ।।
मुनिममुमतिप्रौढं प्राप्याऽर्थतत्त्वविचक्षणं
नवमतरता **नित्यानन्दा**दयोऽपि जहुर्मदम् ।
सुमितविषया विद्या येषां पराजयभीरवो
न च मुनिममुं तेऽज्ञाः द्रष्टुं सभास्थमपि क्षमाः ।। १७ ।।
विषयविमुखा वृत्तिर्याऽभून्मुनेरनपायिनी
भवविलसितं ज्ञात्वा सैकाऽप्यलौकिकताऽन्वया ।
गुरुचरणगा भक्तिर्याऽन्या धियाऽमितयाऽन्विता
किमु नहि तया लोके सेव्योऽभवद् विबुधैरपि ।। १८ ।।
जिनमतरुचिस्थैर्यात् सूत्रावलम्बिप्ररूपणात्
परमतकथाकन्थादुःस्थार्थवादनिवारणात् ।
मुनिरयमभूत् सर्वैस्तस्मिन् पुरे गुणलालसै-
र्जिनवचनगैः श्राद्धैः पूज्यो विवेकविचक्षणैः ।। १९ ।।
नवजनमनःशङ्कापुञ्जं तदिष्टप्रकारतो
मुनिरमितधी**र्नेमि**श्छिन्दन् चिरन्तनमार्गगः ।
जिनमतरताँश्चक्रे नव्यान् स्वसन्निधिमागतान्
निरुपधिकृपापारावारो निरस्तछलक्रियः ।। २० ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपकृतिपरा जैने सङ्घे समुन्नतिकारिणी
विविधविषयान् मन्त्रान् सम्यग् विधातुमपि क्षमा ।
**समिति**रनघा योग्ये कालेऽथ **तत्त्वविवेचिका**
सुमतिजनतोल्लासा तस्योल्लुलास कृपार्थिनी ॥ २१ ॥
कृपणजनता यस्यां नैवाऽऽससाद निजस्थितिं
सुकृतविषयो यस्याः सर्वात्मनाऽभवदाग्रहः ।
अहमहमिका यस्यां कृत्ये स्वतो जनमात्रगा
परिचयमिता केषां सैषा न मोदविधायिनी? ॥ २२ ॥
तदधिकभयान्नव्याः पत्रप्रवृत्तिपरायणाः
सुकृतविमुखं लेख्यं निन्द्यं जहुर्नवशिक्षिताः ।
मुनिजनवृथानिन्दावाचालताऽपि कुभाग्यजा
प्रतिहतपदा तस्याः प्राज्योदये भयतोऽभवत् ॥ २३ ॥
इति दृढतरा जैनश्रद्धाप्रतिष्ठजनैः सभा
मुनिवरशुभादेशोद्युक्तै रराज प्रवर्त्तिता ।
सुकृतनिचयोद्धृत्या सङ्घोपकृत्यतिलालसैः
सुमतिमहितैर्लभ्या श्राद्धैः प्रवेश्यतया च सा ॥ २४ ॥
अथ सुकृतिनां संस्था या**ऽऽनन्दजी**ति भुवि श्रुता
चरमघटना यस्याः **कल्याणजी**त्युपशब्दिता ।
अमितवसुता यस्याः **सिद्धाचला**दिषु यात्रिभि-
र्वितरणबलात् सप्तक्षेत्र्यां क्रमेण विनिर्मिता ॥ २५ ॥
उपकृतिविधिः सङ्घे यस्याः प्रबन्धबलाद् वरः
कुनयजनिताशातनाद् रक्षा च तीर्थचये वरा ।
उपचितधनैः स्थाने स्थाने सुजीर्णसमुद्धृति-
प्रभृतिरभवद् ग्रामे ग्रामे सुकृत्यचयो यतः ॥ २६ ॥
तदुचितघटास्थित्यै पश्चाऽपि धर्मधुरन्धरा
**नृपनगर**गा ये सन्नीतिप्रपञ्चविशारदाः ।
जिनमतरतानल्पश्राद्धैकमत्यसमादिता
वरकुलभवाः सङ्घस्येष्टाः सदोदयशालिनः ॥ २७ ॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

स च **मनसुख**भ्राता तेष्वग्रणीः शुभमन्त्रणां
मुनिवरममुं कालेऽपृच्छत् तदुन्नतिदीक्षितः ।
**दलपति**सुतो **लालभ्राता** प्रधानपदस्थितो-
ऽप्यनुदिनमगात् कर्त्तुं मन्त्रं तदन्तिकमादरात् ॥ २८ ॥
अवितथवचस्सीमामेवाऽऽश्रयन्मुनिराट् स त-
द्धितमुपदिशन् मन्त्रं ताभ्यां ददौ तमकल्मषम् ।
यदनुसरणादिष्टं सद्योऽभवन्निरुपद्रवं
सुनयकलितं बह्वायासप्रसाध्यमपि श्रिया ॥ २९ ॥
अभिनवतरा संस्था साऽभूत् तदीयविचारतः
सुकृतनिचये दक्षा कक्षीकृताप्तसुमन्त्रणा ।
नृपपुरुषतो यस्याः कृत्योच्चयस्य परीक्षणं
फलपरिणतेरूहापोहात् कथञ्चिदजायत ॥ ३० ॥
इति मुनिवरो **नेमि**स्तां तां फलोच्चयशालिनी-
मुपकृतविधां सङ्घे कुर्वन्ननर्थप्रभञ्जनीम् ।
नवनवमतध्वान्तोच्छेदक्रियापरिनिष्ठितो-
ऽगमयदनघं वर्षं पूर्त्तिं तमिष्टचयाञ्चितम् ॥ ३१ ॥
अथ विहरणाकाङ्क्षं **नेमिं** गुरुं मुनिपुङ्गवं
स तु **मनसुख**भ्राता श्राद्धालिभिः सह सादरात् ।
स्वनगरवरे भूत्यै भूयोऽप्ययाचत साञ्जलिः
स्थितिमसुलभां तत्तद्धर्मप्रवृत्तिचमत्कृतः ॥ ३२ ॥
स्थितिमनुसरन् पूर्वाचार्योक्तपद्धतिमात्रगां
कथमपि मनस्तोषं तेषां विधाय मुनीश्वरः ।
पुरि पुरि जनामोदं कुर्वन् वचोमृतसेचनै-
र्विहरणमुपश्लोक्यं **नेमि**श्चकार सुधर्मवित् ॥ ३३ ॥
अथ पुरवरे **कासिन्द्रा**ख्ये स **गुर्जर**भूषणे
सुमतिनिलयं श्राद्धं रागप्रवृत्तिविवर्जितम् ।
**सुमतिविजय**स्याऽऽद्यं शिष्यं चकार सुदीक्षया
जिनमतरतं जैन्या चैकं शुभार्पितया मुनिः ॥ ३४ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवहृतिपदं नाम्ना नैवाऽन्तरेण यतस्ततो
नवमुनिमसौ **नेमिर्द्धी**ति प्रधानपदं व्यधात् ।
**विजय**चरमं तं तु स्पष्टीकृतार्थविशेषकं
गुणगणसमृद्ध्यादेरन्वर्थतास्पदमाबभौ ॥ ३५ ॥
अपरमुपमातीतं बालं गुणैकनिकेतनं
सुकृतनिचयावासं लास्यं प्रतापनिधेर्वरम् ।
अभिनवपदं वाण्या देव्याः सुभाव्यमखण्डिता-
दतनुतपसो **नेमिः** शिष्यं चकार **यशो**ऽभिधम् ॥ ३६ ॥
द्विज**दिनकरा**देतौ नव्यौ मुनी विमलद्युती
पपठतुरतिप्रौढौ तस्याऽऽज्ञया च मुनीशितुः ।
सुगुरुकृपया तौ द्वौ नित्योद्यतौ पठनेऽचिरात्
समियतुरतिप्रौढिं शब्दप्रयोगप्रतिष्ठितौ ॥ ३७ ॥
पुनरपि मुनि**र्नेमिः** सङ्घाग्रहात् पुरमाययौ
सुकृतनिचयैस्तेषां कृष्टो नुतं कलितप्रथम् ।
अथ **मनसुख**भ्राता **चिन्तामणेः** स प्रतिष्ठितिं
मुनिवरसमादेशाच्चक्रे समुत्सवपूर्वकम् ॥ ३८ ॥
गुरुवरममुं श्रेष्ठी धीमान् विचार्य विचक्षणं
पुरि **मनसुख**भ्राता तस्यां स योगतपस्ततिम् ।
गुणमणिनिधिं **गम्भीरा**ख्यं सुकारयितुं गणिं
समयनिपुणं प्रार्थ्योल्लासात् समानयति स्म तम् ॥ ३९ ॥
स**सुमतिसुखाम्भोधिं नेमिं** सुधर्मप्रवर्त्तकं
विमलधिषणप्रेमप्रोद्यत्तपश्चयसम्भृतम् ।
विदितसमयो योगग्रामैकसेवनकर्मठो
विहितसमये योगारम्भं त्वकारयदेष सः ॥ ४० ॥
उदयति मतिर्नव्या भव्यप्रवृत्तिविधायिनी
कलयति फलां यस्माच्चित्तप्रवृत्तिनिरोधिनीम् ।
अनुभवति शं स्वात्मा भिन्नं यतो मुनिरार्हतः
स विधिलसितो योगस्तेषां सुमन्त्रचितोऽभवत् ॥ ४१ ॥


Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षपयति यतः कर्मक्लिष्टं निरुद्धमपि क्षणात्
करणपटुतां तत्तद्दोषक्षयाल्लभते यतः ।
विहितकरणे वृत्तिं शङ्काकलङ्कविवर्जितां
प्रथयति यतः सोऽयं योगस्तदाऽभवदुज्ज्वलः ॥ ४२ ॥

सविधितपसा कश्चित् कश्चित् सुपारणकर्मणा
दिवसमनघं भिक्षावृत्त्या सुखं गमयन् मुनिः ।
पुरजनमनस्तोषं कुर्वन् स **नेमि**रभीप्सितै-
रथ च समये योगं चक्रे श्रुताध्ययनाञ्चितम् ॥ ४३ ॥

श्रुतसमुदितं योगं कुर्वन् गणीश्वरपार्श्वगो
मुनिरगमयद् वर्यं तं च व्यतीतपदं कृती ।
अथ वसुशराङ्केन्दौ (१९५८) वर्षे स **भावपुरा**लयं
वणिजमकरोच्छिष्यं दीक्षां प्रदाय सुमङ्गलाम् ॥ ४४ ॥

स **नयविजयो** नाम्ना ख्यातो गुणालिविराजितः
व्रतसमुदये दक्षो मासोपवासमुखेऽभवत् ।
अपठदनिशं शाब्दं शास्त्रं मुनीश्वरशिक्षया-
ऽप्यनुमतिमितः पित्रोर्दीक्षाग्रहे य उदारधीः ॥ ४५ ॥

सुविहिततपस्तत्रोल्लासैर्जनेष्वभितः कृती
जिनमतरुचिं तन्वन्नीतिं सुयोगविशारदः ।
हितमुपदिशन् चातुर्मास्यं सुखेन निनाय सः
प्रकृतिगहनं योगं कुर्वन् तु शास्त्रविधानतः ॥ ४६ ॥

अथ मणिवणिक् **छोटा भ्राता** सुधर्मधुरन्धरो
जिनमतरतो **लल्लुभ्रातु**स्तनूद्भव आदरात् ।
सुकृतनिचयैर्यात्रां **सिद्धाचल**स्य विधित्सया
मुनिवरममुं सङ्घे गन्तुं चकार सुप्रार्थनाम् ॥ ४७ ॥

मुनिरपि निजानर्घ्येष्टार्थोपदेशप्रतिश्रुते-
रभिमुखमुपक्रान्ते कार्ये निरीक्ष्य तमर्थिनम् ।
गुणगणभृता साकं **गम्भीर**सञ्ज्ञमुनीशिता-
ऽभ्युपगतिचचोदानाच्चक्रे प्रमोदसुतुन्दिलम् ॥ ४८ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ शुभतरे लग्ने सङ्घश्चचाल गिरीश्वरं
विधिमनुसरन् पूर्वाचार्यप्रवर्तितमादरात् ।
प्रतिपुरमुपश्लोक्यैः सङ्घार्थनापरिपालनै-
रनुपमजनश्लाघाक्रान्तो बभौ पथि सोऽद्भुतम् ॥ ४९ ॥
अमितधिषणं **नेमिं** यान्तं मुनीश्वरमर्थनात्
गिरिवरमुपश्रुत्य श्राद्धाः सहस्रश आययुः ।
पथि सुमिलितैस्तैस्तैः सङ्घोऽमितैरमितप्रभो-
ऽभवदतितरां धर्मोन्नत्यै जनेषु रुचिप्रदः ॥ ५० ॥
पुरि पुरि कृतां पूजां श्राद्धैः सुभक्तिपुरस्सरं
कृतप्रतिकृतौ दक्षो गृह्णन् स सङ्घ उपाययौ ।
अचलप्रवरं **सिद्धिक्षेत्रं** मुनीन्द्रविराजितं
सुकृतवसुना पत्या **छोटा**भिधेन सुपालितः ॥ ५१ ॥
वसुवितरणं **छोटालालः** स सङ्घपतिस्तदा-
ऽगणयदुचिते कार्ये नैवाऽर्हतो विदितान्वयः ।
मुनिवरवचस्त्वाज्ञां काले विदन् यदपालयत्
तदलभदिलाव्याप्तां कीर्तिं तुलाविगतां जने ॥ ५२ ॥
जनसमुदयः सङ्घायातस्तदा **विमलाचलं**
जिनप्रतिकृतीर्भव्या द्रष्टुं रुरोह गतक्लमः ।
ननु सुरपतिर्नैवं मोदं प्रयाति यथाऽन्वभूत्
सुखमनुपमं सङ्घो रूढो गिरिप्रवरं स तु ॥ ५३ ॥
अहमहमिका सङ्घे प्रत्येकशो जिनपूजने-
ऽभवदतितरां पत्या सार्द्धं सुभक्त्युपजीविता ।
सुममलयजाद्यङ्गैः कश्मीरजादिसमन्वितैः
जिनप्रतिकृतीः को नोऽभूदर्चितुं पुर उत्सुकः ? ॥ ५४ ॥
सुकृतनिचयैर्लभ्यां पूजां प्रपद्य ससङ्घयुक्
पतिरुपचितः **छोटा भ्राता** सुभक्तिभिरार्हतः ।
यदलभदनाहार्यं वाचामगोचरमैहिकं
सुखमनुपमं तत् किं लभ्यं पुरे ह्यमरेशितुः? ॥ ५५ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

न स गणितवान् वात्सल्यादौ वसुव्ययमार्हतो
यदिह ननु तत्तीर्थस्यैव प्रभावफलं स्फुटम् ।
किमुत फलितं श्रीमन्नेमेर्वचोमृतवर्षणा-
ज्जिनमतरुचिर्बीजं तत्त्वोपदेशसुशीतलात् ॥ ५६ ॥
सविधिरचिता यात्रा तीर्थाधिपस्य च साऽपरा
निजजनिपटौ सङ्घे सेशे ततान यशोलताम् ।
सुकृतमतुलं लब्ध्वा सङ्घाधिपोऽपि मुनेः कृपां
निजसहचरीं कृत्वा सङ्घात् ततः स्वपुरं ययौ ॥ ५७ ॥
मुनिवरमणि**र्नेमिः** सङ्घाधिपाग्रहतस्तदा
स्वपुरनयनैकान्तान्मुक्तः कथञ्चिदथो पुनः ।
अभवदमितैः श्राद्धैः तत्तत्पुरागतयात्रिकै-
र्निजनिजपुरे नेतुं प्रार्थ्योऽतिभक्तिसमुत्सुकैः ॥ ५८ ॥
समुचितहितादेशैस्ताँस्तान् ननु ग्रहभाजनं
समयनिपुणः कुर्व**न्नेमि**र्जगाम स योगकृत् ।
समयनिपुणैः सार्धं **गम्भीर**सञ्ज्ञमुनीश्वरैः
पुरवरमतिप्रह्वैः श्राद्धैः स **भावपुरं** नुतः ॥ ५९ ॥
सकलममलं द्युत्या नव्यं सिताम्बरराजितं
शुचिदलगतं नेत्रद्वन्द्वप्रवृत्त्यवलोकितम् ।
समुचितकरः पूर्णं शीतांशुबिम्बमिवाऽपरं
प्रविशति मुनौ कान्तं जातं नु **भावपुरं** पुरम् ॥ ६० ॥
कलयति मुनौ तस्मिन् तत्त्वोपदेशतरङ्गिणीं
विमलपथगां सूत्रस्तोमाल्लसत्तनुविस्तृताम् ।
अतनुविभवोऽप्येत्याऽमन्दप्रमोदभरोऽभवत्
निकटममलीभूयाऽत्यन्तं कुमार्गलसत्क्लमः ॥ ६१ ॥
प्रमुदिततरः सङ्घो जातस्तदागमनादपि
प्रथममभितस्तत्तत्प्रश्नोत्तरावगतेस्ततः ।
तदनु चरणाभङ्गोल्लासप्रवृत्त्यवलोकना-
दिति मुनिवरे तस्मिन् योगोयतेऽपि विशिष्टता ॥ ६२ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुनिजनगुणग्रामोत्कर्षानुमोदनतत्परो-
ऽप्रतिहतमतिस्तत्तत्साध्व्यादिकृत्यपरीक्षणे ।
सुकृतकरणे दक्षः सङ्घाग्रणी**रमरो**ऽप्यरं
शमदमनिधे**र्नेमे**र्भक्तस्तरामभवद् गुणैः ॥ ६३ ॥
**मधुपुर**वणिक् बालः **श्रीमाल**वंशसमुद्भवः
त्रिपुरनिधिकौ (१९४३) पौषे जन्मी प्रपूर्णनिशाकरे ।
सुनिकटमगा**न्नेमे**र्दीक्षां ग्रहीतुमकल्मषः
सरलहृदयस्तस्यां पुर्यां च **सुन्दर**सञ्ज्ञकः ॥ ६४ ॥
मुनिमणिरमुं बालं **नेमि**र्विभाव्य सुलक्षणं
शुचिसितयमे दीक्षां दत्त्वा स्वशिष्यमथो व्यधात् ।
यदभिहितवान् तस्मिन्नन्वर्थ**दर्शन**नाम त-
दुचितसमये भाव्यं न्वर्थं प्रतीत्य मुनिर्ध्रुवम् ॥ ६५ ॥
प्रथयति मुनौ चातुर्मास्ये सुयोगतपश्चयं
प्रसरति वरे सङ्घेऽन्योन्यं सुसख्यफलेऽनघे ।
अवधिनियते साधोः पूर्त्युन्मुखे समये स्थिते-
र्नियतिवशतः कश्चिद् ग्रन्थिज्वरः पुरि चोद्गतः ॥ ६६ ॥
समयनिपुणौ तौ द्वौ **गम्भीरनेमि**मुनीश्वरौ
मुनिपरिवृतौ **वर्त्तेजा**ख्यं पुरं किल जग्मतुः ।
अपि कुशलिनः सर्वे सान्निध्यमेत्य तयोर्द्वयोः
चरणनिरतास्तस्थुस्तस्मिन् पुरे विगतामयाः ॥ ६७ ॥
चातुर्मास्ये व्यतीते खरसनिधिविधौ (१९६०) वत्सरे सम्प्रवृत्ते
**अव्याबाधा**ख्ययोगोद्वहनकृतिरतो **नेमि**नामा मुनीन्द्रः ।
**श्रीगम्भीरे**ण साकं **सुमति-सुखनिधि-प्रेम**सम्मिश्रितोऽगा-
ऽच्छ्राद्धैः सम्प्रार्थ्यमानः पुरि पुरि विहरन् **वल्लभी**सञ्ज्ञपुर्याम् ॥ ६८ ॥

*इति सप्तमः सर्गः ॥*



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# ।। श्रीमदाचार्यवर्यविजयनेमिसूरीश्वरगुर्वष्टकम् ।।

विजयनेमिसूरीश्वरशिष्यः
पं.श्रीप्रतापविजयः

शम[1]दोऽकमदः[2] पाता[3]त् पू[4]र्णं रञ्जितसंहतिः ।
यम[5]दोऽक[6]प्रदः पा[7]तात् तूर्णं भ[8]ञ्जितसंसृतिः ।। १ ।। * गोमूत्रिकाबन्धः ।।

सूरीशोऽतनु[9]मातङ्ग[10]पारीन्द्रोऽसमशान्तिदः ।
पूज्यो द्याद[11]न्यसिद्धान्तध्वान्त[12]ध्वान्तहरोऽसुखम् ।। २ ।।

प्रोत्तप्तकाञ्चननिभप्रतिभासमानं
**नेमिं** गुरुं गुणगुरुं प्र[13]तिभाऽसमानम् ।
सद्योगयोगललितं कलिक[14]ल्कनाशं
वन्देऽहमिन्दुवदनं परिपूरिताशम् ।। ३ ।।

नमामि **नेमि**नामानं मा[15]नोनं[16] माननं मुनिम् ।
नु[17]न्नै[18]नोमम[19]मामोनमुमामेनमिनु[20]न्नमम् ।। ४ ।। द्व्यक्षरः ।।

---

१. शमं शान्तिं ददातीति शमदः । २. न विद्यते के आत्मनि मदो यस्य सः । ३. रक्षतात् । ४. पूर्णं यथा स्यात्तथा रञ्जितसंहतिर्मोदितसङ्घः, देशनयेत्यर्थः । ५. यमानि महाव्रतानि ददातीति यमदो मुनिरत्र च प्रकरणवशान्नेमिसूरिर्गुरुः । ६. अकं दुःखं वा पापं प्रकर्षेण द्यति खण्डयतीत्यकप्रदः । ७. पातः पतनं तस्मात् निरयादिगतावित्यर्थः । ८. शीघ्रं त्यक्तसंसार इत्यर्थः । ९. कन्दर्प्पः । १० सिंहः । ११. खण्डयतात् । १२. सूर्यः । १३. प्रतिभया बुद्ध्या असमानं अतुल्य मित्यर्थः । १४. पापम् । १५. मानेनाऽहङ्कारेण ऊनो रहितस्तम् । १६. मश्चन्द्रमास्तद्वदाननं मुखं यस्य तम् । १७. नुन्नौ क्षिप्तौ एनोममौ दुरितममते येन स नुन्नैनोममस्तम् । १८. आमेन रोगेण ऊनो रहितस्तम् । १९. उमा शान्तिः सैव मा लक्ष्मीस्तस्या ईनः स्वामी तम् । २०. एः कामस्य नुन्ना परिक्षिप्ता मा शोभा येन स इनुन्नमस्तम् ।

* **गोमूत्रिकाबन्धः**

| | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| श | म | दो | ऽक | म | दः | पा | तात् | पू | र्णं | र | ञ्जि | त | सं | ह | तिः |
| य | म | दो | ऽक | प्र | दः | पा | तात् | तू | र्णं | भ | ञ्जि | त | सं | सृ | तिः |



Jain Education International For Private & Personal Use Only www.jainelibrary.org

ने[21]तो ! य[22]ते ! सू[23]रत ! पो[24]तरूप ! भवे समुद्रेऽकदे[25] ! का[26]य ता[27]र ! ।
[28]पातो[29]ऽरते [30]सूर [31]तपोऽसरूपेभवेसमुद्रेकद ! [32]कायतार ! ॥ ५ ॥ गोमूत्रिकाबन्धः*
[33]अपारेऽसं[34]सारेहित[35]दे ! वि[36]भयाऽमान ! [37]विदिता-
ऽगमा[38]ऽनीते ! [39]तापाऽवनि[40]पत ! नतो[41]दार ! [42]सुगुरो ! ।
अपारे संसारेऽहि[43]तद ! वि[44]भया[45]ऽमान ! विदि[46]ता-
गमा[47]ऽनीतेतापा[48]ऽव निप[49]तनतो[50]ऽदार ! [51]सुगुरो ! ॥ ६ ॥ यमकम् ॥
कुनयकाननदलनदारुण[52]करटिनामयवर्जिता-
ऽव[53]र्मविदारण ! विभयकारण ! करणकुञ्जरकेसरिन् ! ।
भुवनभूषण ! दलितदूषण ! मदनमारण ! हे मुने !
प्रमितभाषण ! स[54]मव तारक ! चरणसुन्दर ! सं[55]सृतेः ॥ ७ ॥ हरिगीतम् ॥

---

२१. स्वामिन् ! । २२. मुने ! प्रकरणाद्धे गुरो ! । २३. दयालो ! । २४. प्रवहणसमान ! । २५. अकं दुःखं वा पापं द्यतीत्यकदस्तत्सम्बोधने । २६. सुखाय भवेत्यर्थः । २७. तया ज्ञानलक्ष्म्या राजते इति तारस्तत्सम्बोधने । २८. हे रक्षक ! षड्जीवनिकायानामित्यर्थः । २९. न विद्यते रती रागो यस्य तत्सम्बोधने । ३०. हे पण्डित !। ३१. तपोभिरसमान ! । ३२. ईर्लक्ष्मीस्तस्या भवः स ईभवः कामदेवः, तस्य ईः शोभा तस्या यः समुद्रेकोऽतिरेकस्तं द्यति खण्डयतीति ईभवेसमुद्रेकदस्तत्सम्बोधने । ३२. कायेन शरीरेण तार उज्ज्वलस्तत्सम्बोधने कायतार !। ३३. विगतारे ! । ३४. त्यक्तसंसार ! । ३५. वाञ्छितद ! । ३६. कान्त्याऽप्रमाण ! । ३७. विशेषेण दितं खण्डितं अगमं अज्ञानं येन तत्सम्बोधने । ३८. न विद्यते ईतिररिष्टं यस्य तत्सम्बोधने । ३९. ज्ञानादिलक्ष्मीं पातीति तापस्तत्सम्बोधने । ४०. अवनौ पतति गच्छतीत्यवनिपतस्तत्सम्बोधने वाहनरहितेत्यर्थः । ४१. नता उदारा महाशयाः पुरुषा यस्य तत्सम्बोधने । ४२. अतिशयेन जिनोक्ततत्त्वानि गृणातीति सुगुरुस्तत्सम्बोधने । ४३. अशुभनाशिन् ! । ४४. विगतभय ! । ४५. मानरहित ! । ४६. ज्ञातसिद्धान्त ! । ४७. अप्राप्तकामताप ! । ४८. रक्ष । ४९. पतनात् । ५०. स्त्रीरहित !। ५१. शोभनश्चासौ गुरुश्च सुगुरुस्तत्सम्बोधने प्रकरणान्नेमिसूरिगुरो ! अपारे संसारे निपतनतो रक्षेत्यर्थः । ५२. हस्तिन् ! । ५३. कष्टम् । ५४. संरक्ष । ५५. संसारात् ।

* **गोमूत्रिकाबन्धः**

| | | | | | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ने | तो | य | ते | सू | र | त | पो | त | रू | प | भ | वे | स | मु | द्रे | क | द | का | य | ता | र |
| पा | तो | र | ते | सू | र | त | पो | स | रू | चे | भ | वे | स | मु | द्रे | क | द | का | य | ता | र |



Jain Education International For Private & Personal Use Only www.jainelibrary.org

[56]आपत्रे[57]तरतेत[58]मानममताऽमा[59]याऽ[60]नतज्ञावले-
ऽ[61]तान्ते [62]मास्य ! [63]तमोह ! मोहदलनाऽसाराद् भवाद् रक्ष माम् ।
धीराऽकोप ! कुतीर्थिकौशिकगण[64]प्रद्योतन ! श्री[65]जंभित्
सिन्धो ! शान्तरसस्य विस्तृतमते ! **श्रीनेमिसूरे** गुरो ! ॥ ८ ॥



---

५६. आपद्भ्यस्त्रायते इति आपत्त्रस्तत्सम्बोधने । ५७. गतराग ! । ५८. गते मानममते यस्य तत्सम्बोधने । ५९. अमाय ! । ६०. आसमन्तान्नता ज्ञानां पण्डितानामावलिः पङ्क्तिर्यस्य तत्सम्बोधने । ६१. अग्लाने धर्मकार्येष्वित्यर्थः । ६२. चन्द्रमुख ! । ६३. अज्ञानभित् ! । ६४. सूर्य ! । ६५. कन्दर्पभित् ! ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# गुरुस्तुत्यष्टकम्

विजयशीलचन्द्रसूरिः

**दीवाली**कुक्षिरत्नं सकलकुवलयोल्लासिदीपोपमानं
**लक्ष्मीचन्द्रा**न्वयोत्थं तिमिरभरहरं तेजसां नव्यपुञ्जम् ।
आत्तश्री**वृद्धिचन्द्रा**भिधगुरुचरणद्वन्द्वनिर्द्वन्द्वसेवं
वन्दे **श्रीनेमिसूरिं** सकलतपगणे धुर्यमाचार्यवर्यम् ॥ १ ॥

आचार्याः सन्ति नैके निजकसमुदये धुर्यतां प्राप्तवन्तो
गच्छेशत्वं तु गच्छायतिकुशलकरं केवलं **नेमिसूरौ** ।
तिग्मज्वालाः प्रभूता धरणिपरिसरे पावकाः सन्ति किन्तु
भूलोकं पूर्णमेतं निजशुचिकिरणैर्भासयन् भानुरेव ॥ २ ॥

गच्छे श्रीम**त्तपा**ख्ये चरमजिनपतेः शासने मुख्यगच्छे
मुख्या संविग्नशाखा शतकयुगलतः साऽस्ति सूरीशशून्या ।
कृत्वा योगक्रियां यः सुविहितमुनिराड् आद्य आचार्यताभाक्
सञ्जातः सोऽद्य तत्र प्रवरमुनिपतिर्वर्धतां **नेमिसूरिः** ॥ ३ ॥

संवद् वेदा[४]ऽङ्ग[६]लोकान्तिक[९] विधु[१]प्रमितो वत्सरः सोऽस्ति धन्यो
धन्या सा सत्तिथिश्च प्रकटवरफला पञ्चमी ज्येष्ठशुक्ला ।
यत्राऽऽचार्यत्वराज्ये विजयि**तपगणे** प्राप मूर्धाभिषेकं
गीतार्थोः सोऽस्तु सिद्ध्यै सुविहितप्रथमो **नेमिसूरिः** सदा मे ॥ ४ ॥

यः पूज्यः सङ्घमुख्यैर्निखिलमुनिजनो मन्यते यं मुनीशं
येन स्यात् तीर्थशोभा ददति सुकृतिनः स्वस्तिवादं च यस्मै ।
यस्मात् कामः प्रणष्टः प्रतपति नितरां यस्य सद्ब्रह्मतेजो
यस्मिन्नाप्ते शरण्ये शरणमहमितस्तं स्तुवे **नेमिसूरिम्** ॥ ५ ॥





Jain Education International For Private & Personal Use Only www.jainelibrary.org



धन्यं बाणो[५]ऽर्णवो[४]ऽङ्को[९]ऽब्ज[१]मितमिदमहो ! वर्षमुद्दीप्तहर्षं
ज्येष्ठे शुक्ला तथा सत्तिथिरपि जयिनी सप्तमी धन्यधन्या ।
यत्राऽऽत्ता जैनदीक्षा गुरुकरकमलै**र्नेमचन्द्रे**ण यूना
गच्छेशः सैष जातस्तदनु बुधनुतो **नेमिसूरि**र्गुरुर्मे ॥ ६ ॥

येषां दर्शनतः खलु स्मृतिपथं गच्छन्ति पुण्यात्मनां
साधूनां शुचिसंयमोर्जिततनूनां नामधेयान्यहो ! ।
तेषां श्रीमुनि**वृद्धिचन्द्र**सुगुरूणां पावने पद्युगे
दीक्षां यः समुपाददे स जयतु **श्रीनेमिसूरि**र्गुरुः ॥ ७ ॥

सूरिः सोऽवतु मां भवाद् भयहरं तं संश्रये सर्वदा
तेन स्यान्मम मङ्गलं मम नमस्तस्मै तथा स्तान्मुदा ।
मोहो नश्यतु मे ततो गुणगणो मय्यस्य सङ्क्रामतु
तस्मिन् गच्छतु **नेमिसूरि**सुगुरौ सङ्घस्य भावाञ्जलिः ॥ ८ ॥

---

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद् वा तदिदमविपर्यासितरसं
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# परमगुर्वष्टकम् ॥*

विजयशीलचन्द्रसूरिः

जिनेन्द्रतीर्थाम्बरतिग्मरश्मये, प्रणाशिताशेषकुदोषराशये ।
दिगन्तसंस्थापितशुद्धकीर्तये, नमो नमः श्री**गुरुनेमिसूरये** ॥ १ ॥

कदम्बपर्वतादिजैनजीर्णतीर्थसंहतिः, समुद्धृता हि येन शासनप्रभावना कृता ।
अगण्यसद्गुणाञ्चितः सदा प्रशान्तमानसः, स **नेमिसूरि**सद्गुरुः शिवङ्करोऽस्तु नः सना ॥ २ ॥

यत्पवित्रमुखपद्मदर्शनं, सर्वदोदयकरं सुखाकरम् ।
भव्यसत्त्वहृदयैकनन्दनं, नौमि **नेमि**मुनिपं तमादरात् ॥ ३ ॥

नैजक्रमाब्जरजसाऽऽवनभव्यजीवान्,
पोपोति भक्तियुतचित्तवतः समस्तान् ।
यः कृष्टिसृष्टिमुकुटः प्रकटप्रभावः
श्री**नेमिसूरि**वरराट् शिवदः स भूयात् ॥ ४ ॥

रागद्विड्हन्तारं, स्फारप्रज्ञं शान्तम् ।
श्री**नेमिं** सूरीन्द्रं, वन्देऽहं सद्भक्त्या ॥ ५ ॥

विषयजिह्मगविष्णुरथं गुरुं, नृपतिसंहतिसेवितपद्युगम् ।
असुमतां भववार्द्धिनिमज्जतां, प्रवहणोपम**नेमि**मुनिं भजे ॥ ६ ॥

एनोऽनोकहदहनं, विश्वश्रेयं निरस्तकोपरिपुम् ।
दर्पाचलगोत्रभिदं, वन्देऽहं **नेमिसूरि**गुरुम् ॥ ७ ॥

समस्तस्वस्तिपस्त्याय, विश्वविश्वोपकारिणे ।
मोहान्धकारसूर्याय, नमः श्री**नेमिसूरये** ॥ ८ ॥

भावतस्तव नवं भविको य, एकदाऽपि कुरुते लभते सः ।
**नेमिसूरि**वरसद्गुरुराज ! भूरिभाग्ययुतशर्मसमृद्धिम् ॥ ९ ॥

---

* विद्यार्थित्वे विहितेयं रचना ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# *अज्ञातकर्तृकं श्रीनेमिसूरीश्वरस्तुत्यष्टकम्

(शार्दूलविक्रीडितम्)



विन्दन्नास्तिक-नास्तिकोभयविधे तन्त्रे स्वतन्त्रस्थितिं
तत्तन्नूतनकल्पनाकुमुदिनीपूर्णेन्दुरुष्णद्युतिः ।
व्यातेनेऽत्र समुद्रमुद्रितमहीपृष्ठे सुधास्यन्दिनीं
कीर्तिं यः स विराजतामनुदिनं **श्रीनेमिसूरिर्गुरुः** ॥१॥

शाब्दे साधुमतिः श्रुतिस्मृतिविधौ श्रीगीष्पतिर्जैमिनौ
साक्षाज्जैमिनिरेव काव्यविषये श्रीमान् कविः किं पुनः ।
न्यायाम्भोधिविलोडने पटुतरः श्रेष्ठोऽत्र मन्थाचलः
सोऽयं योगिवरः सदा विजयतां **श्रीनेमिसूरिर्गुरुः** ॥२॥

हेलाभ्यस्तसमस्तशास्त्रगहनो यो बाल्य एवाऽचिरात्
जातस्तर्कवितर्ककर्कशमतिर्जैनागमाराधकः ।
शिष्यान्तस्तिमिरावलिं कवलयन् ज्ञानप्रभां वर्धयन्
सोऽयं योगिवरः सदा विजयतां **श्रीनेमिसूरिर्गुरुः** ॥३॥

नित्यानन्दघनं प्रभाभिरखिलं विद्योतयन्तं जगत्
श्रीवीरं तनु-वाङ्-मनोभिरनिशं सन्ध्यायमानो विदन् ।
श्रीमज्जैनमतावलम्बिजनतां व्याख्यानतो वर्धयन्
सोऽयं योगिवरः सदा विजयतां **श्रीनेमिसूरिर्गुरुः** ॥४॥

किंस्विद् धर्मतनुर्जिनागमवपुः शेषावतारः किमु
किं वा स्वर्गसमाधिसाधनविधिः साक्षाज्जिनो वा भवेत् ।
इत्येवं समवेक्ष्य यं कवयते लोकः प्रमाणैः स्वकैः
सोऽयं योगिवरः सदा विजयतां **श्रीनेमिसूरिर्गुरुः** ॥५॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org



नानास्थानसमागतैर्मुनिजनैः संसेविताङ्घ्रिद्वयः
श्रीमच्छ्रावकपुञ्जपूजितपदस्तेषां मनोह्लादकैः ।
व्याख्यानैर्जिनधर्मभिर्हृदयतोऽज्ञानस्तमः संहरन्
सोऽयं योगिवरः सदा विजयतां **श्रीनेमिसूरिर्गुरुः** ॥६॥

देशाः सन्ति च के न येऽस्य निजसत्कीर्त्या न सम्भाविता
भूपाः केऽस्य पदारविन्दयुगलं मूर्ध्ना च ये नाऽऽर्चिषुः ।
कोऽप्याऽप्यस्ति पुमान् न योऽस्य शृणुते नामामृतं साम्प्रतं
सोऽयं योगिवरः सदा विजयतां **श्रीनेमिसूरिर्गुरुः** ॥७॥

धन्योऽयं दिवसो यदत्र समभूद् विश्वैकवन्द्यो मुनिः
पुण्यो ध्यानगतो मदीयहृदये पूज्यः शरण्यः सताम् ।
यं ध्यात्वाऽऽप्तसमस्तकिल्बिषचयान्मुक्ता भवामो वयं
सोऽयं योगिवरः सदा विजयतां **श्रीनेमिसूरिर्गुरुः** ॥८॥



* स्तुत्यष्टकमिदं केनचिद् विद्वद्वर्येण पण्डितमहोदयेन विरचितमस्ति, किन्तु तन्नामादिकं नोपलभ्यत इत्यतः 'अज्ञातकर्तृकम्' इत्येव-मुल्लिखितम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सद्धर्मदं विजयनेमिमहं प्रणौमि !!

प्रा. अभिराजराजेन्द्र मिश्रः

यस्य स्मृतिर्मनसि सान्द्रसुधानुपानो-
त्कृष्टं सुखं जनयति द्रुततृप्तिमूलम् ।
तीर्थङ्कराऽध्वपथिकं तमहं प्रपद्ये
सूर्युत्तमं **विजयनेमि**मपास्तबन्धम् ॥ १ ॥

सारस्वते तपसि लीनमुदारसत्त्वं
ज्ञानप्रदीपविभयाऽपहृतान्धकारम् ।
कारुण्यमूर्तिमपनीतजनार्तिभारं
सद्धर्मदं **विजयनेमि**महं प्रणौमि ॥ २ ॥

न्यायादिदर्शनगृहे ससुखं प्रविष्टं
पारङ्गतं च पदशासनकोशतर्के ।
छन्दस्यलङ्कृतिपथे च दधत्प्रचारं
वन्दे बुधं **विजयनेमि**महं सुधीन्द्रम् ॥ ३ ॥

यत्साहिती सहृदयानधुना धिनोति
तत्पाण्डिती प्रमदयत्यनिशं विनेयान् ।
तं नौमि सूरिशतहायनपूर्तियोगे
प्राज्ञोत्तमं **विजयनेमि**जिनोत्तमर्णम् ॥ ४ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आजीवनाचरितसौम्यतपस्विवृत्तं
वाक्कायमानसविपोषितशुद्धभावम् ।
बिभ्रज्जिनागममहत्तमदेशनं तं
वन्दे मुदा **विजयनेमि**सुधीन्द्रपादम् ॥ ५ ॥

कार्तघ्न्यवञ्चनशठत्ववनाग्निझञ्झा-
दन्दह्यमानजगदेकबलाहकाभम् ।
तं लोकबन्धुमुपयामि विधूतशोकं
**नेमीश्वरं** यतिवरं प्रथितं मुनीन्द्रम् ॥ ६ ॥

**मिश्रोऽभिराज**पदभाक् सकलत्रपुत्रः
कल्याणमङ्गलसुखाभ्युदयाभिलाषी ।
स्मृत्वैव तं **विजयनेमि**मुदारसञ्ज-
मात्मानमञ्जयति पुण्यचयैः कृतज्ञः ॥ ७ ॥

त्रिवेणी**कविराजेन्द्रो** जय**शीलेन्दु**भावितः ।
**कीर्तित्रय**समासक्तः कुरुते **नेमि**सप्तकम् ॥ ८ ॥





Jain Education International For Private & Personal Use Only www.jainelibrary.org



समग्रशास्त्रपारावारपारीण-सर्वसद्गुणगणालङ्कार-
सौजन्यसुधासिन्धु-निर्व्याजविशुद्धतमवात्सल्यवारिधि-
समस्तसूरिचक्रचक्रेश्वर-पूज्यप्रवर-श्रीमन्नन्दनसूरीश्वर-
महाराजपादानां दीक्षाब्दप्रारम्भात्
षष्टिवर्षसमाप्तिविषयकमहोत्सवमधिकृत्य
हृद्गतभावाविष्कारविभासुरा नैसर्गिकप्रहर्षपूरपरिप्लाविता

# प्रशस्तिः ।

**स्व. कविभालचन्द्रः**
स्तम्भतीर्थम्

प्रज्ञापारमितो मितेतरमहावीरत्वविभ्राजितो-
नीलौदार्यकलाकलापकलितो विज्ञानविद्योतितो
विद्यावैभवभावितोऽमरगुणैरासेवितो विश्वजिद्
भव्यो भारतभूतले विजयते **सौराष्ट्रदेशो** महान् ॥ १ ॥

चकास्ति नगरं तत्र शक्रोपवनसन्निभम् ।
**बोटादा**भिधया तस्य प्रतिभा भुवि विश्रुता ॥ २ ॥

शास्त्रज्ञाः समयानुकूलप्रतिभाः पुण्यप्रभाभासुराः
मर्मज्ञा नितरां विवेकनिपुणाः श्रेयःसुखोन्मेषिणः ।
आत्मज्ञानपरायणा भवसुखे दोषानुसन्धायिनः
केचित् तत्र वसन्ति रम्यनगरे जैनाः सुशीलान्विताः ॥ ३ ॥

**यमुना-हेमचन्द्रा**ख्यौ दम्पतीधर्मशालिनौ ।
एतन्नगरवास्तव्यौ जिनभक्तिपरायणौ ॥ ४ ॥

साधूनां चैव सूरीणां व्याख्यानामृततर्पितौ ।
पवित्रौ सरलौ नूनं संसारासारबोधिनौ ॥ ५ ॥

तयोः पुण्यप्रभावौघो जिनभक्तिविवर्धितः ।
पाण्डवेषुग्रहक्ष्माब्दे (१९५५) कार्तिकस्य सिते दले ॥ ६ ॥

एकादश्यां तिथौ नूनं लग्ने पारीन्द्रसञ्ज्ञिते ।
मेषस्थिते विधौ तत्र पर्यणंसीत् सुतात्मना ॥ ७ ॥

प्रकर्षतां सर्वजनेषु तावत् सम्भोक्ष्यते बालक एष एव ।
इतीव नूनं मनसाऽवधार्य **नरोत्तमो**ऽसौ विहितोऽस्ति नाम्ना ॥ ८ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वोपार्जितभक्तिवैभववशात् पुण्यस्य पाकात् तथा,
सत्संस्काररसुधाप्रसेकसहिता कर्मक्षयोत्पादिनी ।
वैराग्यस्य लता विवेकविहिता तत्स्वान्ततो निर्गता,
दीक्षाया ग्रहणे **नरोत्तम**ममुं शीघ्रं समुत्प्रैरयत् ॥ ९ ॥
आकाशनगनन्देन्दुमिते (१९७०) संवत्सरे शुभे ।
सिते माघद्वितीयेऽह्नि दीक्षामापदसौ मुदा ॥ १० ॥
ज्योतिःशास्त्रार्णवो मान्यो, **विजयोदयसूरिराट्** ।
तद्गुरुस्थानमापन्नः, सर्वशास्त्रविशारदः ॥ ११ ॥
नव्यदीक्षितवर्यस्य, **नन्दनं विजया**न्तिमम् ।
नामसंस्करणं जातं, **नेमिसूरि**प्रभावतः ॥ १२ ॥
न्याय-व्याकृति-साहित्य-निगमागमपारगाम् ।
व्यापार्य शेमुषीं तीक्ष्णां ज्ञानाब्धिं तीर्णवानसौ ॥ १३ ॥
एतस्य लोकोत्तरवैभवाढ्यं, प्रज्ञाप्रकर्षं परमं विचार्य ।
गुरुर्गुरोरस्य व्यधान्मनीषामेनं तु पन्न्यासयितुं मुनीन्द्रम् ॥ १४ ॥
लोकानां हृदयङ्गमं च सरलं सच्छास्त्रसारोज्ज्वलं,
सद्युक्त्यावलिमण्डितं शिवकरं गाम्भीर्यभावोदयम् ।
प्रज्ञावैभवमाकलय्य यमिनोऽस्याऽऽसीन्मतिः सूरीणां,
पन्न्यासस्य पदे नियोक्तुमनघं योगीन्द्रराजं च तम् ॥ १५ ॥
वियद्दिग्गजभक्तीन्दुमिते(१९८०) विक्रमवत्सरे ।
पन्न्यासपदमारूढो, यमीन्द्रोऽयं महायशाः ॥ १६ ॥
पन्न्यासेन्द्रवरोऽथ जैनजनतास्वान्ते प्रतिष्ठां परां
वैदुष्योत्तमवैभवेन च तथा भक्तेः समुद्रेकतः ।
सम्प्राप्येह मुमुक्षुवृन्दमखिलं सद्बोधपीयूषयुग्-
व्याख्यानेन सदा प्रहर्षपरमां सीमानमानाययत् ॥ १७ ॥
गुणवसुनिधिपृथ्वीसम्मिते(१९८३) वैक्रमाब्दे,
परमपुनितमासे माधवे शुक्लपक्षे ।
गणकवरवितीर्णे सन्मुहूर्ते दशम्यां,
पदमयमधिरूढः सूरिसञ्ज्ञं समृद्धम् ॥ १८ ॥
भास्वानेष न चण्डदीधितिरसौ, किं चन्द्रमाः सोऽम्बरे ?,
किं शक्रः स सहस्रनेत्रमहितो भूमौ न सन्तिष्ठते ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं सूरिवरं विलोक्य जनता शङ्कापरा भूतले,
स **श्रीनन्दनसूरि**राजमघवा प्रह्लादयत्यन्वहम् ॥ १९ ॥
यस्य प्रौढप्रतापभानुभयतः सन्त्रासमासादयन्,
सूर्यः सङ्क्रमणं नभस्यनुपलक्षर्कर्ति सङ्क्षोभतः ।
यद्वाचामृततो निरस्तमहिमा जातः क्षयी चन्द्रमाः,
स **श्रीनन्दनसूरिराज**मघवा भूयाज्जगच्छ्रेयसे ॥ २० ॥
प्राप्याऽऽचार्यपदं दधात्यनुपमं स्वान्तं सुखाधायकं,
धर्मस्योद्धरणे भवाब्धितरणे निर्वाणदे सत्वरम् ।
आचार्येन्द्रवरोऽयमेवमखिलं कार्यक्रमं संवहन्,
नैजां सूरिपदोद्भवां विभवितां प्रोद्भासयत्यन्वहम् ॥ २१ ॥
नानाकर्मलताङ्कुरालिजटिलीभूतात्मना चेतसा,
मोहेनेह समाकुले भववने बम्भ्रम्यमाणा जनाः ।
तेषां शान्तिकृते सुधामधुरया वाचोपदेशं ददत्,
श्रीम**न्नन्दनसूरिराड्** विजयते विश्वार्तिहा भूतले ॥ २२ ॥
सङ्ख्यातीतभवेषु या सुवितता मोहान्धकारावली,
रागद्वेषपरम्परापरिगता सर्वार्तिसंवर्धिनी ।
तां नीत्वा विलयं विवेकविधिना वैराग्यसाम्राज्यभाक्
श्रीम**न्नन्दनसूरिराड्** विजयते विश्वार्तिहा भूतले ॥ २३ ॥
वयोवृद्धोऽपि सोत्साहः, सत्त्वाढ्यः सूरिपुङ्गवः ।
**नेमिसूरीश्वरा**रब्धं, समाप्नोत् कार्यमादरात् ॥ २४ ॥
अवशिष्टानि कार्याणि, निर्वक्ष्यति स सत्वरम् ।
क्रियासिद्धिस्तु सत्त्वे स्यात्, सा नोपकरणे मता ॥ २५ ॥
सूरिचक्रेश्वरः सोऽयं, जगन्मङ्गलकारकः ।
कल्याणं विकिरन् विश्वग्, दीर्घायुर्भवतान्मुदा ॥ २६ ॥
वियद्वह्निनभोनेत्रवर्षे (२०३०) पौषे सिते दले ।
बुधेऽह्निरथसप्तम्यां, श्लोका विरचिता मुदा ॥ २७ ॥
कविना **भालचन्द्रेण**, **दयाशङ्कर**सूनुना ।
प्रशस्तिरेषा रचिता, **स्तम्भतीर्था**धिवासिना ॥ २८ ॥

*


Jain Education International For Private & Personal Use Only www.jainelibrary.org

# पूज्यपादशासनसम्राट्श्रीपरमगुरुभगवतां प्रथमं दर्शनम् ।

आ. विजयहेमचन्द्रसूरिः ( देवशिशुः )

तदानीमहं नववर्षीय एवाऽऽसम् । पूज्यशासनसम्राट्श्रीमद्विजयनेमिसूरीश्वर-गुरुप्रवरा निजविशालशिष्यप्रशिष्यवृन्दपरिवृता राजनगरतो विहृत्य श्रीशेरीसातीर्थे प्रकटप्रभाविश्रीशेरीसापार्श्वनाथप्रमुखजिनबिम्बानां प्रतिष्ठां चिकीर्षवः साभ्रमतीग्रामे घीयालालभाई-फुलचन्द्रश्रेष्ठिनो गृहाङ्गणे पादाववधारितवन्तः ।

तदा बालसहजौत्सुक्येन समवयस्कमित्रबालैः सह (केऽपि महान्तो गुरुभगवन्तोऽत्र समागताः सन्ति, अतश्चलन्तु, वयं तेषां दर्शनार्थं गच्छाम इति मनसि विचार्य) तत्र गत्वा तेषां गुरुभगवतां प्रथमं दर्शनं कृतमासीत् ।

एतद्दर्शनेनाऽहं निजात्मानं प्रबलपुण्यशालिनं प्रवरभाग्यवन्तं च मन्ये ।

तदनन्तरं त्र्यधिकद्विसहस्रमितेऽब्दे तु ते हि पूज्यप्रवराः स्वकीयपट्टधरसिद्धान्त-वाचस्पति-न्यायविशारदपूज्याचार्यश्रीमद्विजयोदयसूरीश्वर-तत्पट्टधरशास्त्रविशारद-कविरत्न-न्यायवाचस्पति-सिद्धान्तमार्तण्डपूज्याचार्यश्रीमद्विजयनन्दनसूरीश्वरप्रभृत्यनेक-लघ्वलघुशिष्यपरिवारपरिवृता वर्षावासकृते साभ्रमतीग्रामे समागताः । तदा साभ्रमतीग्रामे अत्यल्पसङ्ख्यकश्रावकाणां गृहाण्यासन् ! तदा कतिचित् श्रावकाः तत्रत्यश्रावकानेवं कथयामासुः - "अरे भद्रभावाः सुश्रावकाः ! भवद्भिः सम्यक् विचारितमस्ति न वा ? एते तु महान्तो गुरुभगवन्तो विद्यन्ते, धवलगजराजसन्निभानां तेषां सेवां शुश्रूषां भक्तिं च यूयं कथं करिष्यथ ?" । तैः प्रत्युत्तरितम्-"अरे श्रेष्ठिवराः ! यूयं व्यर्थं चिन्तां मा कुरुथ, गुरूणां हार्दिकाशीर्वादाः अस्मदीयशिरस्सु वर्षन्ति, अतो नाऽस्माकं स्वल्पीयस्यपि चिन्ता । वयं तेषां सपरिवाराणां सम्यग्रीत्या सेवां शुश्रूषां भक्तिं चाऽवश्यं करिष्यामः । भवन्तो निश्चिन्ता आसताम् ।" तदनन्तरं च तैः श्रावकैर्वर्षा-वासमध्ये समेषां साधूनां साध्वीनां च प्रबलभावतः पर्याप्तरूपेण भक्तिर्विहिता । तन्निरीक्ष्य राजनगरवास्तव्या नामाङ्किताः श्रेष्ठिप्रवरा आश्चर्यचकिता निम्नाननाश्च सञ्जाताः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यां चतुर्मास्यां तेषां पुण्यदर्शनमनेककृत्वः सम्प्राप्तम् ।

समागते च पर्वाधिराजपर्युषणापर्वणि महावीरजन्मवाचनवेलायां प्रयत्नपूर्वकं ते हि गुरुभगवन्त उपरितनमालके व्याख्यानपर्षदि समानीताः । तदानीं पूज्यगुरुभगवन्त भृशमशक्ताः शिथिलशरीराश्चाऽऽसन् । सर्वेषां प्रभूताग्रहतः तैस्तदा यथाकथञ्चित् महावीरजन्मवाचनं कृतमासीत् तत् श्रुत्वा सर्वेऽपि मुदितस्वान्ताः सञ्जाताः । तेषां मध्येऽहमपि एकस्तदाऽऽसम् ।

★

**पूज्यशासनसम्राट्श्रीगुरुभगवतां निजप्रशिष्योपरि अपूर्वं वात्सल्यम् :**

शासनप्रभावकपूज्याचार्यश्रीमद्विजयमेरुप्रभसूरीश्वराणां वदनकमलतः कतिकृत्वः श्रुतस्तेषां जीवनप्रसङ्गः पूज्यशासनसम्राट्सम्बन्धितोऽत्र निर्दिश्यते । प्रायः सप्ताशीत्युत्तर एकोनविंशे वैक्रमे वर्षे श्रीमेरुविजयाभिधानो मुनिर्मैथिलपण्डितप्रवर-श्रीशशिनाथ-झाशास्त्रिणां सविधे व्याकरणादिशास्त्राणामध्ययनं कुर्वन्नासीत् । तदानीं नैके विद्वांसः पूज्यशासनसम्राड्गुरुभगवतां पार्श्वे शिष्याणामध्यापनं कुर्वन्तोऽतिष्ठन् । कस्मिन्नपि समये वर्षावासे शेषकालेऽपि वा कोऽपि विद्वान् तेषां समीपे आगच्छेत् तदा ते हि पूज्यास्तं निजपार्श्वेऽध्यापनाय रक्षन्ति स्म । 'अधुनाऽस्मत्पार्श्वे बहवो-ऽध्यापयितारो विपश्चितः सन्ति, अत आवश्यकता न विद्यते' इति तु ते हि पूज्या न कदाऽपि कथयामासुः ।

तदानीं सर्वत्रैतादृशी लोकोक्तिः प्रचलिताऽऽसीद् यत् पूज्यशासनसम्राड्-गुरुभगवतां समीपे आगताः पण्डितास्तथा च प्रतिमा आदायाऽऽगता मूर्तिनिर्मातारो नैव कदाऽप्येवमेव रिक्तपाणयः पश्चाद् वलन्ति, स्वस्थानं गच्छन्ति वा ।

मुनिमेरुविजयाय केनाऽप्यध्ययनविषये किञ्चित् पृष्टम् । तदुत्तरं सम्यग् अददानः स भृशं विषण्णो बाढं रोदितुं लग्नश्च । पूज्यशासनसम्राट्श्रीगुरुभगवता एतज्ज्ञातं, तैस्तमाकार्य प्रेम्णा पृष्टं - "अरे ! तव किं जातं, कथं त्वं रुदन्नासीः, त्वादृशस्यैवं रोदनं किमुचितम् ?" तेन यथास्थितं निवेदितं, तत् श्रुत्वा पूज्यैः कथितम्, स्वस्थो भव, मा रोदीः, त्वं तु बुद्धिशाली परिश्रमशीलश्चाऽसि । कल्यतो मम पार्श्वे-ऽध्ययनायाऽऽगच्छेः । अहं त्वां सम्यक् पाठयिष्यामि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्वोदिने स गतोऽध्ययनाय । पूज्यगुरुभगवद्भिः 'किरातार्जुनीयमहाकाव्यं' पाठयितुं प्रारब्धम् । पूज्यानामध्यापनशैली काऽप्यनिर्वचनीयैवाऽऽसीत् । एकस्मिन् विषयेऽनेकान् विषयान् सङ्कलय्य ते हि यत् पाठयन्त आसन् तत्तु स्वानुभवसंवेद्यमेव । उपर्युपरि वज्रवत् कठोररूपेण दृश्यमाना अपि ते ह्यन्तस्तु शिरीषकुसुमादप्यधिककोमला वात्सल्यसम्भृतमानसाश्चाऽऽसन् ।

निम्नोल्लिखितश्लोकेन नीतिकारेणाऽपि लालने बहवो दोषास्ताडने च बहवो गुणाः निरूपिताः सन्ति–

लालने बहवो दोषास्ताडने बहवो गुणाः ।
तस्मात् पुत्रं च शिष्यं च, ताडयेन्न तु लालयेत् ।

अपि च, गुरुपरुषवचनेन तिरस्कृता जना महत्त्वं प्राप्नुवन्तीति वचनं पण्डितराजजगन्नाथेनाऽपि स्वरचितभामिनीविलासे 'गीर्भि'रिति श्लोकेन समर्थितम् । अयमेवाऽस्ति स श्लोकः –

गीर्भिर्गुरूणां परुषाक्षराभि-स्तिरस्कृता यान्ति नरा महत्त्वम् ।
अलब्धशाणोत्कषणा नृपाणां न जातु मौलौ मणयो विशन्ति ॥

मुनिमेरुविजयः पूज्यशासनसम्राड्गुरुभगवतां सन्निधौ प्रतिदिनं किरातमभ्यस्यमानः कियता कालेन द्वात्रिंशत्तमश्लोकपर्यन्तं पठितवान् । ततो द्वितीयदिने पुस्तकमादाय नियतसमये पूज्यानां समीपे पठनायाऽऽगतं मुनिमेरुविजयं ते हि पूज्याः कथयामासुः – "अथ मम पार्श्वे पठनाय त्वया नैवाऽऽगन्तव्यम् । अग्रेतनं काव्यं स्वयमेव पठितव्यम् । सर्वेषु विषयेषु तव शेमुष्यस्खलितप्रचारा प्रवर्तिष्यते ।" पूज्यानामेतादृशाशीर्वादस्तेषां खलु जीवने पूर्णरूपेण फलितोऽभवदिति शम् ॥





Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सर्वं सत्त्वे प्रतिष्ठितम्

मुनिरत्नकीर्तिविजयः

दृढसत्त्वानां देवा अपि सान्निध्यं विदधतीति जगति विदितमेवैतत्। बहुभिश्च जनैरेतत् सत्यमनेकशोऽनुभूतमपि परमपूज्यशासनसम्राजां परमगुरुवराणां श्रीविजयनेमिसूरीश्वराणां जीवने।

एतादृशाननुभवान्, ये केचिच्छ्राद्धा यदा कदाचित् कस्मिंश्चित् प्रसङ्गे उपस्थिता आसन् ते पूज्यगुरुभगवतां दिवं गमनानन्तरं पूज्यानां शिष्यप्रशिष्यादिपरिवारस्य पुरतो यदोल्लिखितवन्तस्तदैव ते ज्ञाताः ।

'यत्र चमत्कारस्तत्र नमस्कारः' इत्युक्तिर्लोके प्रचलिताऽप्यस्ति । किन्तु नाऽत्राऽऽसीत् कोऽपि चमत्कारः। यतो लोकरञ्जनाय भवति चमत्कारः। आध्यात्मिकविकासे हि बाधकः सः। अतो दृढसत्त्वा महात्मानो न कदाऽपि चमत्कारं पुरस्कुर्वन्ति। ते हि स्वाभाविकतयैव वर्तन्ते। किन्तु यदा कदाचित् तादृशः कश्चित् प्रसङ्ग उपस्थितो भवति येनाऽस्मादृशाः सामान्या जनाः 'अहो ! अशक्यप्रायमेतद्' इति कृत्वा तं चमत्काररूपेण प्रस्तुवन्ति । वस्तुतस्तु तत्र तेषां महापुरुषाणां दृढसत्त्वेन विशुद्धचारित्र्येण चाऽऽकृष्टा देवाः स्वयं सन्निधिं कृत्वा कार्यं साधयन्ति ।

एतादृश एव कश्चित् प्रसङ्गो वि.सं. १९९०तमवर्षे समुपस्थितः। श्रेष्ठिवर्यश्रीमाणेकलाल-मनसुखभाई-श्राद्धेन परमगुरुभगवतां शासनसम्राजां सान्निध्ये राजनगरात् श्रीशत्रुञ्जयमहातीर्थस्य पदयात्रासङ्घ आयोजितः। (स हि पदयात्रा-सङ्घोऽद्याऽपि 'माकुभाई-श्रेष्ठिनः सङ्घः' इति कृत्वा पुनः पुनः स्मर्यते जनैः ।) सार्धमासपर्यन्तं शासनसम्राड्-गुरुभगवतां सान्निध्यं सम्प्राप्स्यत इति कृत्वा समग्रादपि भारतवर्षाद् यात्रालवः समुपस्थिता बभूवुः। तस्मिंश्च सङ्घे यात्रिकाणां त्रयोदशसहस्री सम्मीलिताऽभूत्। अन्या च रथ-शकट-चलमन्दिर-हस्त्यादिका विपुला सामग्री त्वासीदेव ।

'कथमेतन्निर्विघ्नं सम्पत्स्यते ?' इति कस्यचिच्छ्रावकस्य मनसि शङ्का समुद्भूता। स हि गुरुभगवतां समक्षमुपस्थितोऽभूत्। गुरुभगवन्तस्तु



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वस्था: परमप्रसन्नाश्चैवाऽऽसन् । चिन्तालेशोऽपि तेषां मुखे न दृश्यमान आसीत् । चिन्ताचान्तमुखं तमागतं श्राद्धं निरीक्ष्य पूज्याः पृष्टवन्तः – 'किं रे ! किमस्ति ?'

'सर्वं शोभनमेव भगवन् ! ..... किन्तु चिन्ता काचिद् मां बाधते !'

'का चिन्ता ?'

'महामन्त्रिवस्तुपाल–तेजपालादिमहापुरुषायोजितसङ्घानुकारी विशालोऽयं सङ्घो निर्विघ्नं सम्पत्स्यतेऽपि ? उदधिकल्पो जनसमुदायः, बहुमूल्या च सामग्री ! – मार्गे काऽपि बाधा तु नैवोपस्थास्यति किल ?'

'मैवं भैषीः । शासनरक्षका देवा उपस्थिता एव सन्ति । त एव सर्वं निर्विघ्नं विधास्यन्ति ।'

एवमुक्त्वा पूज्या जनं कञ्चित् श्रीफलान्यानेतुमुक्तवन्तः । शीघ्रमेव श्रीफलान्यानायितानि । 'एतान्यूर्ध्वमाकाशे उच्छालयन्तु' इति पूज्या आदिष्टवन्तः । श्राद्धैस्तथा कृतम् । सर्वेऽपि तत्रोपस्थिताः साश्चर्यमनुभूतवन्तो यत् श्रीफलानां छल्लयः कवचाश्चैवाऽध आगता नाऽन्तः फलम् ! एतदेव च देवानां सान्निध्यस्य प्रमाणमासीत् ।

श्राद्धोऽपि सोऽनेन निःसंशयोऽभूत् । सङ्घोऽपि स विना विघ्नं सम्पन्नोऽभूत् । एतादृश आसीत् पूज्यशासनसम्राड्-गुरुभगवतां सत्त्वस्य चारित्रस्य च प्रभावः ।

गिरयो गुरवस्तेभ्योऽप्युर्वी गुर्वी ततोऽपि जगदण्डम् ।
तस्मादप्यतिगुरवः प्रलयेऽप्यचला महात्मानः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# वचनसिद्धिः

मुनिधर्मकीर्तिविजयः

यो महानस्ति स न महान् भवितुं प्रयतते, यश्च प्रयतते स न कदाऽपि महान् भवति । अद्य जनाः प्रसिद्ध्यर्थमितस्ततोऽटाट्यन्ते, तदर्थं च विविधान् प्रयोगानपि कुर्वन्ति । तेष्वेकः प्रयोगोऽस्ति चमत्कारः । जनाः चमत्कृतिरागिणः सन्ति । "यत्र चमत्कारस्तत्र नमस्कारः" इति जनश्रुतिमनुसृत्य 'चमत्कृतिः' इति नाममात्रमपि निशम्याऽद्य बुद्धिमन्तः पण्डिताः संस्कारिणः श्रेष्ठिनश्चाऽपि सनेत्रनिमीलनमुन्मत्ता इव धावन्ति । अद्य केषाञ्चिज्जनानां हस्तात् कुङ्कुमं क्षरति, मन्दिरादिष्वमृतस्रवणं भवति, केषुचित् स्थानेषु रक्षणार्थं सर्पराज आगच्छति, केषाञ्चिज्जनानां देहेषु माणिभद्र-पद्मावती-कालिका-अम्बिका- इति देवदेव्यः प्रविशन्ति । अहो ! समाजे किं किं न प्रचलति ! चमत्कारस्य व्याजेन बहवो मायाविनः पापिनश्च जना मुग्धजनान् वञ्चयन्ति, स्वमायापाशे च बध्नन्ति । अत्र सत्यं कियदस्ति, इति तु चिन्तनीयमस्ति ।

यः सात्त्विकः सज्जनः सरलः सत्यवादी चाऽस्ति स न कदाऽप्येवं करोति । एतादृशगुणवान् तु यद् यद् वदति तदवश्यंतया फलति, कार्यं चाऽपि सिद्ध्यत्येव । तथाऽपि सज्जना गुणिजनाश्च तं चमत्कृतिरूपेण न वर्णयन्ति, न च स्वभक्तद्वारेणाऽपि प्रसिद्ध्यन्ति ।

अस्माकं गुरुदेवः पूज्यपाद-शासनसम्राट्श्रीनेमिसूरीश्वरमहाराज एतादृशः सात्त्विकः सरलः सत्यभाषी चाऽऽसीत् । स मनोवाक्काययोगेन निर्मल आसीत् । स सदैव प्रसिद्धितो मायाप्रपञ्चतोऽसत्याचरणाच्च दूरमेव वसति स्म । एवं तस्य चित्तस्य विशुद्धिवशात् स यद् वदति स्म तत् सफलीभवति स्मैव । अतः स वचनसिद्धो महापुरुष आसीत् । तस्य पूज्यपादस्य जीवने चमत्काररूपेण कथ्यमाना बहवः प्रसङ्गाः सञ्जाताः । तथाऽपि न कदाचिदपि स्वयमन्येन वा चमत्कारस्य व्याजेन प्रसिद्धिमवाप्तुं प्रयतवान् । तस्य जीवने घटित एकः प्रसङ्गोऽत्र लिख्यते मया ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

वि. सं. १९७२ वर्षे पूज्यपादः शासनसम्राट् सूरीश्वरो राजस्थानमध्ये 'फलोधी' ग्रामे चतुर्मासीं स्थित आसीत् । तदा हि बहवः साधुवरा ज्वरेण पीडिता आसन् । ततस्तेषां ज्वरपीडितानां साधुजनानां कृते स्थण्डिलशुद्ध्यर्थं[1] निर्जीवभूमेरावश्यकताऽऽसीत् । तदर्थं पूज्यपादेन श्रावकवर्यस्य 'श्रीफूलचन्दजी गोलेच्छा' महोदयस्य निर्जनमेकं स्थानं याचितम् । तेन महोदयेनाऽपि दत्ताऽनुमतिः ।

एकदा श्रीपद्मविजयमहाराजोऽस्मिन् स्थाने स्थण्डिलशुद्ध्यर्थं गतवानासीत् । तस्मिन्नैव काले गोलेच्छामहोदयस्य सेवकस्तत्राऽऽगतवान् । तेन तत्स्थानस्य द्वारमुद्घाटितं दृष्टम् । 'कथमुद्घाटितम् ? अन्तः कोऽप्यस्ति न वा ?' इति किमप्यविचिन्त्य तेन द्वारं पिहितम् । स तु ततो निर्गतवान् ।

इतस्तेन श्रीपद्मविजयमहाराजेन तद्द्वारमुद्घाटयितुं बहवः प्रयत्नाः कृताः, किन्तु सर्वेऽपि ते प्रयत्ना निष्फला जाताः । पश्चात्तेन मुनिराजेन श्रीउदयविजयमुनिराजस्य नाम्नोच्चैराह्वानं कृतं, केनाऽपि न श्रुतम् । दीर्घकालो व्यतीतः । अतः पूज्यपादस्य मनसि प्रश्न उद्भूतः - 'एष साधुर्दीर्घकालाद् गतः, कथं पुनर्नाऽऽगतवान् ?' इति । तत्क्षणमेव तत्साधोरन्वेषणार्थं केचित् साधवो बहिर्गतवन्तः । अन्ते, कारणं ज्ञातम् । द्वारमुद्घाटितम् ।

पूज्यपादस्य चित्तमुद्विग्नं जातम् । तेन स सेवक आहूतः । उक्तश्च – 'भो ! वयं तु जैनसाधवः, सर्वमपि सहामहे । किन्तु भवता कदाऽपि संन्यासिनः फकीरादयश्चाऽपि न सन्तापनीयाः । सर्पदशनादिदुष्फलं तेन प्राप्यते' ।

सोऽप्येतदङ्गीकृत्य ततो गतवान् । दैवात् स तत्स्थाने एवैकत्र स्थितं वत्सं निरीक्षितुं गतवान् । वत्सस्य पार्श्वे स्थितस्य घासपुञ्जस्य मध्ये कश्चित् सर्प आसीत् । स च तं तदा दष्टवान् । मूर्च्छामापन्नः स भूमौ पतितः । तं तथा दृष्ट्वा कश्चिद् गोलेच्छामहोदयाय निवेदितवान् । स हि त्वरितं तत्र प्राप्तवान् । गोलेच्छामहोदयस्य माता पूज्यपादस्य सकाशं गत्वाऽनुनीतवती यद् 'माताऽस्य वृद्धाऽस्ति । तस्याश्चाऽयमेकल एव पुत्रः । अतः कृपां विधायाऽस्य रक्षणं कुर्वन्तु भवन्तः ।'

---

१. प्रस्रवणमलादिविसर्जनार्थम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतच्छ्रुत्वा दयासागरो गुरुवरोऽपि खेदमाप्तवान् उक्तवांश्च - 'तस्मै घृतं पाययतु । सर्वं सुस्थं भविष्यति' । पूज्यपादस्य निर्देशानुसारेण घृतपानान्तरं झटित्येव निर्विषः स सञ्जातः । सुप्तोत्थित इवाऽक्षिणी उन्मील्योपविष्टवांश्च । सर्वेऽपि प्रसन्ना जाताः ।

सहजतयोच्चरितमपि महापुरुषाणां वचनं कथं फलवद् भवतीति प्रसङ्गे-नैतेन ज्ञायते । एतादृशस्य वचनसिद्धस्य पूज्यपादस्य श्रीनेमिसूरीश्वरभगवतश्चरणयोः शताब्दीवर्षे कोटीशो वन्दनावलिः ।

*अणुरपि मणिः प्राणत्राणक्षमो विषभक्षिणां*
*शिशुरपि राजा सिंहीसूनुः समाह्वयते गजान् ।*
*तनुरपि तरुस्कन्धोद्भूतो दहत्यनलो वनं*
*प्रकृतिमहतां जात्यं तेजो न मूर्त्तिमपेक्षते ॥*



Jain Education International For Private & Personal Use Only www.jainelibrary.org





Jain Education International For Private & Personal Use Only www.jainelibrary.org

# भज जिनराजम्

मुनिकल्याणकीर्तिविजयः

[ **रागः** भज गोविन्दं ]

भज जिनराजं भज जिनराजं भज जिनराजं चतुरमते !
पारावारे इह संसारे नहि किञ्चित् तव शरणं वाऽरे ! ॥

क्रोधवशादन्धीभूतस्त्वं दर्पाल्लीनं ते नम्रत्वम् ।
मायावेशाद् विषधरसि त्वं लोभान्मुञ्चसि नैव ममत्वम् ॥

यौवनमदतो निर्जरायसे गुरूपदेशं नैव मन्यसे ।
वार्धक्ये ननु किं करिष्यसे ? दुरितशतैर्नूनं हनिष्यसे ॥

विरचय विशदां विषयविरक्तिं विमुञ्च पुद्गलद्रव्यासक्तिम् ।
शुचिभावनया कुरु जिनभक्तिं महाजनानां श्रुत्वा सूक्तिम् ॥

सावहितं कुरु चित्तनिरीक्षां कुरुष्व सन्ततमात्मपरीक्षाम् ।
स्वीकुरु सहजां शरीरशिक्षां ह्यादियस्व स्वयमेव सुदीक्षाम् ॥

कुरु गुरुवचनसुधारसपानं भक्त्या गाय च जिनगुणगानम् ।
धारय शीलं दृढमविगानं प्राप्नुहि धीर ! रुचिरकल्याणम् ॥





Jain Education International For Private & Personal Use Only www.jainelibrary.org

# सरस्वत्या वन्दनम्

डॉ. आचार्यरामकिशोर मिश्रः

हे श्वेतहंसपरिवाहिनि ! वन्दनीये !
गन्धर्वदेवदितिसूनुमनुष्यपूज्ये !
कुन्देन्दुशङ्खनिभभास्वरगौररूपे !
वीणाप्रवादिनि सरस्वति ! देवि ! वन्दे ॥ १ ॥

पृथ्व्यात्मकं जननि ! गन्धमहं ददामि,
धूपं ददामि पवनात्मकमत्र तुभ्यम् ।
दीपं च ते हि दहनात्मकमर्पयामि,
सर्वोपचारमयि देवि ! समर्पये ते ॥ २ ॥

सम्पादयित्रि ! नतभक्तमनोमुदो हे !
विज्ञानतत्त्वरसदे ! वरदे ! यशोदे !
वेदान्तदे ! दह च मे जडतां सुवर्णे !
वीणाप्रवादिनि ! सरस्वति ! देवि ! वन्दे ॥३॥

वीणाधरे ! कमलवासिनि ! शुभ्रगात्रि !
ताराधिनाथवदने ! कविकीर्तनीये !
वागीश्वरि ! प्रथितपुस्तकधारयित्रि !
बुद्धिं प्रदेहि कवितावरदे ! नमस्ते ॥ ४ ॥

आनन्ददायिनि ! बुधार्चितपादपद्मे !
त्वामाह्वयामि हृदये कविताप्रदात्रि !
ज्ञानेश्वरी त्वमसि मङ्गलदे ! प्रसीद,
वीणाप्रवादिनि ! सरस्वति ! देवि ! वन्दे ॥५॥

अग्रे नमामि पुरतः प्रणमामि पश्चात्,
भूमौ नमामि गगने प्रणमामि चोर्ध्वम् ।
अब्धौ नमामि च सरित्सु सरोवरेषु,
वीणाप्रवादिनि ! सरस्वति ! देवि ! वन्दे ॥६॥

२९५/पट्टीरामपुरम्,
खेकड़ा (बागपत) उत्तरप्रदेशः २५०१०१



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# गलज्जलिकाः

प्रा. अभिराजराजेन्द्रमिश्रः

(१)

## निद्रिते लोचने

रोचते नो किमपि निद्रिते लोचने
मोदते नो किमपि निद्रिते लोचने ॥ १ ॥

उर्वशीमेनकारूपराशिर्वृथा
काम्यते नो किमपि निद्रिते लोचने ॥ २ ॥

भोज्यजातं सुधास्वादु नानाविधम्
स्वाद्यते नो किमपि निद्रिते लोचने ॥ ३ ॥

नैव वंशीरवो नाऽपि वीणाध्वनिः
गाहते नो किमपि निद्रिते लोचने ॥ ४ ॥

नैव भार्या, न पुत्रः कुटुम्बोऽथवा
सेवते नो किमपि निद्रिते लोचने ॥ ५ ॥

हन्त, मृत्योः पदक्षेपरावे श्रुते
चिन्त्यते नो किमपि निद्रिते लोचने ॥ ६ ॥

जीवनं नूनमम्भःपृषत्सन्निभम्
इत्यपि ज्ञायते निद्रिते लोचने ॥ ७ ॥

क्वाऽपयातं बलं भोगझञ्झास्पदम् ?
नो परित्रायते निद्रिते लोचने ॥ ८ ॥

सर्वमासीन्ममैव, स्वयं साम्प्रतम्
मुच्यते, का गतिर्निद्रिते लोचने ॥ ९ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(२)

# यूयं यूयं वयं वयम् !!

विश्वमिदं नूनं गृहकल्पं जगत् कुटुम्बं जानीमः
तदपि समुत्थे स्वार्थारम्भे, यूयं यूयं वयं वयम् ॥ १ ॥

आकाश्मीरात् सिन्धुं यावन्निखिलमेव भारतमेकम् ।
किन्तूत्तरदक्षिणवादे सति, यूयं यूयं वयं वयम् ॥ २ ॥

सङ्गच्छामः सम्पश्यामः सन्तिष्ठामः क्षणे क्षणे
संसदि किन्तु हते निजपक्षे, यूयं यूयं वयं वयम् ॥ ३ ॥

राष्ट्रमेकमस्माकं बन्धो ! वयं भारतीयाः सर्वे
परं स्वजनपदपक्षरक्षणे, यूयं यूयं वयं वयम् ॥ ४ ॥

उपदिशन्ति नेतारो मञ्चे जातिधर्मयोः समभावम् ।
गृहमासाद्य परं मन्यन्ते, यूयं यूयं वयं वयम् ॥ ५ ॥

एक एव जगदीशः सकलं ध्रुवं निर्ममे संसारम् ।
समीक्षिते ननु धर्मसम्बले, यूयं यूयं वयं वयम् ॥ ६ ॥

दक्षिणगङ्गाधिया न कैर्दक्षिणे स्तूयते कावेरी ? ।
किन्तु तदीये जलविभाजने, यूयं यूयं वयं वयम् ॥ ७ ॥

परकीये क्षेत्रे वयमेके सहयोद्धारो मानार्थम् ।
स्वात्मकुटुम्बे परं विभक्ता, यूयं यूयं वयं वयम् ॥ ८ ॥

मम गेहे, तव चक्रे बदरी - बादरायणः सम्बन्धः ।
ननु गन्त्रीरोहणनिवेदने, यूयं यूयं वयं वयम् ॥ ९ ॥

द्विशरीराः परमेकात्मानः सम्पतिते सङ्कटक्षणे ।
किन्तूत्सवमङ्गलवेलायां, यूयं यूयं वयं वयम् ॥ १० ॥

केयं शिक्षा कोऽयं धर्मः कीदृशमिदं तु बन्धुत्वम् ? ।
सत्स्वपि येषु जना मन्यन्ते, यूयं यूयं वयं वयम् ॥ ११ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(३)

## व्याहरामो वयं स्वागतं स्वागतम् !!

अस्मदीये कुटीरे भवानागतो
व्याहरामो वयं स्वागतं स्वागतम् ।
हे महामान्य ! पूजार्ह ! वन्यातिथे !
कुर्महे ते वयं स्वागतं स्वागतम् ॥ १ ॥

शैलतुल्या क्व ते सद्गुणोत्तुङ्गता
क्वाऽस्मदीयं लघुत्वं शिशुत्वाञ्चितम् ।
प्रीतिपूतैर्वचोभिस्तथाऽपि प्रभो !
व्याहरामो वयं स्वागतं स्वागतम् ॥ २ ॥

नाऽस्ति पाद्यं न वाऽर्घ्यं न वा विष्टरं
नाऽपि नैवेद्यजातं किमप्यालये ।
भक्तिभावैरसीमैस्तथाऽपि प्रभो !
व्याहरामो वयं स्वागतं स्वागतम् ॥ ३ ॥

दीप्तभानुं यथा पङ्कजानां वनी
श्लाघते पूर्णचन्द्रं त्रियामा यथा ।
पक्षिणश्चाऽभिनन्दन्ति कुञ्जं यथा
व्याहरामस्तथा तावकं स्वागतम् ॥ ४ ॥

त्वं समर्थप्रभुर्हन्त भक्ता वयम्
वन्दनीयो भवान् वन्दनार्ता वयम् ।
आवयोरस्ति सम्बन्ध एषोऽनघो
व्याहरामस्ततः स्वागतं स्वागतम् ॥ ५ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आशिषा श्रीमतां जीवनं चिन्मयम्
धीमयं श्रीमयं ज्ञानदीप्रं भवेत् ।
राष्ट्रसौभाग्यरक्षाकराः स्मो वयं
व्याहरामो भवत्स्वागतं स्वागतम् ।। ६ ।।

नैव भाषा, न भावो, न पूजाविधि-
र्नाऽपि लोकोपचारे समर्था वयम् ।
मुग्धमुग्धा वयं बालकल्पा विभो !
व्याहरामो भवत्स्वागतं स्वागतम् ।। ७ ।।

हे गुरो ! त्वत्पदाम्भोजधूलीचयै-
र्नूनमेतत्पवित्रीकृतं मन्दिरम् ।
धन्यधन्याः कृतार्था गृहीता वयं
व्याहरामो भवत्स्वागतं स्वागतम् ।। ८ ।।

सनराइज़ विला
लोअर समर हिल
शिमला - १७१००५ (हि.प्र.)

कटु क्वणन्तो मलदायकाः खला-
स्तुदन्त्यलं बन्धनशृङ्खला इव ।
मनस्तु साधुध्वनिभिः पदे पदे
हरन्ति सन्तो मणिनुपूरा इव ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमो नमः श्रीगुरुनेमिसूरये ॥




**मुनिधर्मकीर्तिविजयः**

आत्मीयबन्धो ! चेतन !

धर्मलाभोऽस्तु ।

तव स्वास्थ्यमनुकूलं वर्तेत । वयं सर्वेऽपि कुशला निरामयदेहाश्च स्मः । सौराष्ट्रदेशस्य विहारयात्रां समाप्य चातुर्मास्यर्थं कर्णावतीनगरे आगतवन्तो वयम् ।

अद्य पाश्चात्यशिक्षणमुपलक्ष्य किञ्चिद् लिखामि । शिक्षणस्य विशेषत आवश्यकताऽस्ति, इति बोधोऽद्य देशस्य सर्वासामपि व्यक्तीनां चित्ते प्रवर्तते । बाल्यकालादेव बालमानसे पठनस्य तीव्रभारश्चिन्ता च विद्यते । अद्य बालकस्य बौद्धिकविकासो विशेषो दृश्यते । बाह्यदृष्ट्या पञ्चाशद्वर्षीयजनस्य बोधादपि पञ्चदशवर्षीयबालकस्य बोधो विशेषः सूक्ष्मश्च विज्ञायते । अत्र पाश्चात्यशिक्षणस्य प्रभाव एव कारणम् । अद्य प्रतिदिनं देशे समाजे च पाश्चात्यशिक्षणस्य महत्ता वृद्धिं गता दरीदृश्यते । अहो ! पाश्चात्यशिक्षणं त्वस्माकं प्रतिष्ठाविषयः (status) कुलगौरवं चाऽस्तीति मन्यतेऽस्माभिः । गूर्जरभाषयाऽन्यभाषया च पठन् बालको हीनोऽस्तीति विचारधाराऽपि प्रवर्तते । तत एवाऽऽर्थिकस्थित्या मध्यमवर्गीयाः सामान्यजनाश्चाऽपि पाश्चात्यशिक्षणस्य दुराग्रहमासेवन्ते ।

बन्धो ! पाश्चात्यैर्भारतदेशे पाश्चात्यशिक्षणस्यैतादृश्या महत्तायाः स्थापनार्थं कथं बहुशो विविधाश्च प्रयत्नाः क्रियन्ते, इति किं त्वं जानासि ? भो ! अत्राऽपि तेषामाङ्ग्लजनानां दुराशयोऽस्ति । अद्यावधि तैराङ्ग्लजनैरार्यसंस्कृत्या नाशार्थं बहुशो बहुरीत्या च प्रयत्नाः कृताः, किन्तु सर्वेऽपि ते प्रयत्ना निरर्थका जाताः । विश्वस्मिन् विश्वेऽद्याऽऽर्यसंस्कृतिः सर्वमान्या विद्यते । आर्यजनैरेव तेषां पाश्चात्यानां शरणं नोररीकृतम् । एवमार्यजना एव तेषां दुष्टनीतिं दुराशयं च प्रत्याह्वयन्त्यपि । अतोऽन्ते तैः पाश्चात्यैरेतस्याः शिक्षणशैल्या आश्रयः कृतः । अस्माकं दुर्भाग्यं यदेषा



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शिक्षणशैली विशेषतः सफलीभूता । वयं सर्वेऽपि सानन्दं सगौरवं च स्वकीयानां पुत्रादीनां सत्संस्काराणां विनाशकं पाश्चात्यशिक्षणं स्वीकुर्मः ।

भोः ! किमेतत् शिक्षणं मान्यमस्ति ? एतेन शिक्षणेन का का हानिर्भवतीति जानासि त्वम् ?

– बालकस्य शिरसि पठनस्यैतादृशो भार आरोपितो येन बालकैः स्वकीया नैसर्गिकी क्रीडैव विस्मृता । कौटुम्बिकजनैर्मेलनं सम्भाषणं धर्मचर्चा चैवं देवपूजनं गुरुपूजनं चेति सर्वमपि विस्मृतम् । एतेन बालकाः शारीरिकदृष्ट्याऽपि दुर्बला जातास्तथा सत्संस्कारेभ्यो दूरीभूताः ।

– शालायाम् 'ईशुख्रिस्तस्य प्रार्थनं नमनं चाऽवश्यंतया करणीयम् । तस्यैव चिह्नमप्यङ्गीकरणीयमस्ति । न तु स्वकीयानां श्रद्धेयभगवतां नमनं स्तुतिं वा कर्तुं शक्ताः केऽपि जनाः । एवं श्रद्धानुरूपं तिलकं रक्षादवरकं रक्षायन्त्रं चाऽपि धारयितुं न शक्यन्ते । एतत्सर्वं त्वन्धश्रद्धायाः सूचकमित्युक्त्वाऽस्माकं महावीर-कृष्ण-राम-हनुमत्-शम्भ्वादीनां देवानामवमाननं कुर्वन्ति ते शिक्षकाः । एवं रीत्या स्वेष्टदेवताभ्यः स्वधर्मश्रद्धातश्च विमुखान् कुर्वन्ति । प्रभूणां पूजनं, तेषां भक्तिकरणे धनव्ययः, तपश्चरणमिति सर्वं निरर्थकम् । पीडितजनानां सेवा, तेभ्यश्च साहाय्यं करणीयम्, तदेव सत्यं सफलं च तथा वस्तुतो धर्मोऽपि तदेवेति वदन्ति ते शिक्षकाः ।

एवं शिक्षणस्य व्याजेनैते पाश्चात्या अस्माकं भगवतामुपर्यश्रद्धामरुचिं चोत्पादयन्ति, तथाऽऽर्यसंस्कारेभ्यो विमुखान् कुर्वन्ति । एवं सत्यप्यस्माभिराङ्ग्लभाषाया एतादृश आदरः कृतो येनाऽद्य भारतदेशस्य सर्वेष्वपि राज्येष्वाङ्ग्लभाषायाः प्रभुत्वं वर्तते । अन्यराज्येषु त्वेतां भाषां विना सामान्यव्यवहारकरणेऽपि बाधाऽनुभूयते खलु । आङ्ग्लभाषां प्रत्यस्माकमेतादृशासक्तिवशादस्माभिरस्माकं संस्कारपोषणकर्त्र्याः संस्कृतभाषाया नितरामुपेक्षा कृता । अद्य कः संस्कृतं जानाति ? कस्य तां प्रत्यभिरुचिर्विद्यते ? को वा तत्पठनार्थं तथा तस्योत्थानस्य कृते प्रयत्नमपि करोति ? । बहवो जनास्तु तादृशाः सन्ति, येषां मनसि



Jain Education International For Private & Personal Use Only www.jainelibrary.org

संस्कृतं प्रति घृणा (Alergy) वर्तते । यस्या भाषायाः प्रभावाद् वयं संस्कृताः स्मस्तस्या एतादृश्युपेक्षा ? न केवलं सामान्यजना अपि तु सर्वकारीया अधिकारिणः शिक्षणमन्त्रिणश्चाऽपि संस्कृतभाषाया उपेक्षामाचरन्ति । अन्यभाषाया विकासनार्थं तत्राऽप्याङ्ग्लभाषायाश्चोत्थानार्थं यादृग्रीत्या यावन्तः प्रयत्नाः क्रियन्ते, तदपेक्षया संस्कृतभाषाया उत्थानस्य कृते किं कृतम् ? किं च क्रियते ? संस्कृतभाषा परकीया दुहिता स्यादिति व्यवहरन्ति सर्वेऽपि जना अधिकारिणश्च । अन्यभाषया विद्वत्तां प्राप्नुवतामध्यापकानां समाजे महती प्रतिष्ठा भवति, आर्थिकवेतनं चाऽपि तैर्विशेषतः प्राप्यते । संस्कृताध्यपकानां समाजे किं गौरवं का वा प्रतिष्ठा ? तेभ्यश्च वेतनमपि किं दीयते ?

भो ! दौर्भाग्यबलेन गतवर्षे एका दुर्घटना जाता । उत्तरप्रदेशस्य राज्यपालो बनारसनगरे वर्तमानस्य सम्पूर्णानन्दविश्वविद्यालयस्य च कुलपतिः 'टी.वी. राजेश्वरवर्य' आसीत् । तेन महोदयेन विश्वविद्यालयस्य संस्कृतसमारोहे संस्कृतस्य कियदवमाननं कृतम् ? आङ्ग्लभाषां पठन्तु, तयैवोद्धारोऽस्ति, तयैव समाजे प्रतिष्ठा सन्माननं च प्राप्यते । यदि धनेच्छा स्यात् तर्हि आङ्ग्लभाषैव पठनीया । एवं संस्कृतभाषाया अवहेलनं विधायाऽऽङ्ग्लभाषाया महत्तैव वर्णिता प्रस्थापिता च तेन महोदयेन । संस्कृतविद्यालयस्य कुलपतिरेतादृशं यथातथं प्रलपति, तथाऽपि वयं शृणुमः । न कोऽपि प्रतीकारः क्रियतेऽस्माभिः-इत्यतोऽधिका दयनीया लज्जनीया वा का स्थितिः स्यात् ! ।

संस्कृतिरक्षणस्य व्याजेनाऽऽराटिं कुर्वन्तः, कण्ठं विस्फोट्य भाषणं दधानाः, तुमुलं च कुर्वन्तः, रामस्य कृष्णस्य महावीरस्य च व्याजेन क्लेशं कुर्वन्त आर्यजनाः संस्कृतिरक्षकाश्च कुत्र गतवन्तः ? युष्माकं शक्तिः कुत्राऽन्तर्धानं प्राप्ता ? रामस्याऽवमाननं कुर्वतः प्रति किमपि न करणीयम् ? यस्याः संस्कृतभाषायाः प्रभावेनैव वयमेतादृशाः सज्जनाः सदाचारिणश्च स्मः, शान्तिपूर्वकं प्रेमपूर्वकं च वसामः । अन्यथा पाश्चात्यजनानामिव वयमपि संस्कारशून्याः क्रूराश्च स्याम । जगत्समक्षमेव दुराचारं हिंसनं मद्यपानादिकं च कुर्वन्तः स्याम । एवमेतस्याः संस्कृतभाषाया अस्माकमुपरि



Jain Education International For Private & Personal Use Only www.jainelibrary.org

महान् उपकारोऽस्ति, तथाऽप्येतस्या एवोपेक्षा ? एतत्त्वस्माकं पतनस्य सूचनमस्ति, इति ज्ञेयम् ।

इदानीमस्माकं संस्कृतिर्धर्मः कला संस्कारो जीवनरीतिश्चेत्यादीनां सर्वेषामपि प्रतिदिनं ह्रासोऽनुभूयते । साम्प्रतं वयं बाह्यसम्पत्त्या धनाढ्याः स्मः, किन्तु संस्कारैराभ्यन्तरसम्पदा च नितरां दरिद्राः स्मः । वस्तुतस्तु धनिका न संस्कारिणोऽपि तु ये सदाचारादिगुणान्विता ते एव संस्कारिणः सन्ति । अधुना तु विपरीतं वर्तते । ये धनिकाः सत्ताधीशाः प्रतिष्ठिताश्च ते संस्कारिणः कथ्यन्तेऽस्माभिः । किन्तु तन्नोचितमस्ति, यतो धनाढ्यता श्रीमत्ता च संस्कारिताया न प्रमाणपत्रमपि तु नीतिमत्ता सदाचारश्चैव । इदानीं देशे धनिकैः सत्ताधीशैश्च याऽराजकताऽशान्तिश्च प्रसारिता, साऽक्षम्याऽसह्या चाऽस्ति । अतो न कदाचिदपि धनिकाः संस्कारिण एव स्युः, इति भ्रम आसेव्यः । एतदपेक्षया 'वयं दरिद्रा' इत्युक्तं मया ।

बन्धो ! अस्माकं संस्कारदरिद्रतायाः कारणमेकमेवाऽस्ति- संस्कृतभाषाया उपेक्षा । भारतवर्षे विद्यमानानां सर्वेषामपि धर्माणां शास्त्राणि प्रायः संस्कृत-प्राकृतभाषामयानि सन्ति । एषा भाषा तु देवभाषा मन्यते । एवं च पुरातनकालादेषा भाषैव सर्वमान्या सर्वग्राहिणी चाऽऽसीत्, तथाऽधुनाऽप्यस्ति । पश्यतु, भारतवर्षे सर्वेषु ग्रामेषु नगरेषु, एवं विदेशेषु चाऽपि संस्कृतभाषैकरीत्यैव प्रवर्तते, न काचिदप्यन्या । गूर्जरभाषा केवलं गूर्जरराज्ये, कच्छीभाषा कच्छप्रदेशे, कन्नडभाषा कर्णाटकराज्ये किन्तु संस्कृतभाषा तु सर्वत्र प्रचलति । एतदेव प्रमाणीकरोति यत् संस्कृतभाषैव सर्वमान्या सर्वग्राहिणी चाऽस्ति । भारतदेशे विद्यमानानां सर्वासां भाषाणामुपरि प्रायः संस्कृतभाषायाः प्रभावो दृश्यते, तत्राऽपि गूर्जरभाषाया उपरि तु विशेषतः प्रभावो दृश्यते । एवं संस्कृतभाषैवाऽऽर्यसंस्कृतेः प्राणरूपा गौरवप्रदा चाऽस्ति । दौर्भाग्यादेषैव भाषोपेक्षिताऽस्माभिः । भो ! मानवस्य जीवनविकासे केवलं वायु जलं वृक्षः पर्यावरणं चैव न कारणं, किन्तु मातृभाषा जीवनरीतिर्लोकगीतिः संस्कारिता चाऽपि कारणमस्तीति न विस्मर्तव्यम् । यदि यया भाषयाऽस्माकं जीवनविकासो भवति तस्या एव भाषाया उपेक्षा भवेत्तर्हि विकासः कथं स्यात् ?



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्माभिः संस्कृतभाषायाः कृताया उपेक्षायाः फलमेतदेव यदद्य देशे आङ्ग्लभाषा सर्वत्र मान्या बभूव, संस्कृतभाषा च गौणीभूता। एवं विद्यालयेष्वपि आङ्ग्लभाषाऽनिवार्यरूपेण पाठ्यते तथा संस्कृतभाषा वैकल्पिकरूपेण पाठ्यते । अहो ! आर्यदेशे एव संस्कृतभाषाया ईदृश्युपेक्षा ?

बन्धो ! एवं लिखित्वाऽऽङ्ग्लभाषायास्तिरस्कारं नाऽहं करोमि, न च तत्पठनस्य विरोधमपि विदधामि। किन्त्वस्माभिः संस्कारपोषिकां संस्कृतभाषामवगणय्य याऽऽङ्ग्लभाषाया महत्ता प्रस्थापिता सा नोचिता, अत एवैतल्लिखितम्।

अन्ते, त्वमपि पाश्चात्यशिक्षणेन जायमानां हानिं विज्ञाय यथाशक्ति संस्कृतं पठ, अन्याँश्च प्रेरय, संस्कृतं पठतां जनानां साहाय्यं कुरु, तथा संस्कृतभाषाया उद्धारार्थं प्रयतस्वेत्यपेक्षेऽहम्।

आः किमर्थमिदं चेतः सतामम्भोधिदुर्धरम्।
इति क्रुधेव दुर्वेधाः परदुःखैरपूरयत् ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# स्मरणम्

मुनिधर्मकीर्तिविजयः

पूज्यपादगुरुवर्यैः सह वयं सर्वेऽपि वर्षत्रयात् पूर्वं गूर्जरराज्यस्थे 'कच्छ'प्रदेशे विहरामः स्म । 'मांडवी-सुथरी-लाला-जखौ-नलिया' इत्यादीनां विभिन्नक्षेत्राणां तीर्थरूपाणि नयनरम्याणि कलाकृतिमयानि च जिनमन्दिराणि दृष्टानि । एवं तत्रस्थानां पुरातनकालीनानां चित्ताह्लादकारिणीनां प्रशान्तवदनानां च जिनप्रतिमानां दर्शनं विधाय प्रफुल्लितमानसा वयं विहरन्तः 'तेरा' ग्रामे आगतवन्तः ।

सायङ्काले भिक्षार्थमहं गतवान् । तत्र न कानिचिदपि श्राद्धानां गृहाण्यासन्, तत आहारार्थं भोजनशालायामेव गन्तव्यमासीत् । आवश्यकमाहारादिकं गृहीत्वोपाश्रयं समागतोऽहम् । कारणवशाच्च पुनस्तत्राऽहं गतवान् । ततो यदा प्रतिनिवर्तमान आसं तदा वर्त्मन्येका दीर्घकाया हृष्टपुष्टा तीक्ष्णशृङ्गा रक्तवर्णा च गौर्मे सम्मुखमागच्छन्ती दृष्टा मया । मां निरीक्ष्य प्रत्यक्षमेव स्थितवती सा । पश्चात्तु यथा यथाऽग्रे गन्तुं प्रयते स्माऽहं तथा तथा साऽपि मां प्रत्यागच्छन्त्यासीत् । मां दर्शं दर्शं शृङ्गमूर्ध्वीकृत्य ताडयितुमुद्यतेव साऽऽसीत् । नाऽग्रे गन्तुं न च प्रत्यावर्तयितुमपि शक्त आसमहम् । अग्रे गन्तुं कृताः सर्वेऽपि प्रयत्ना निष्फला जाताः । एवं दशक्षणा व्यतीताः । अहं तु नितरां भीतः ! हस्तस्थानि पात्राणि पतिष्यन्ति, गृहीत आहारो भूमौ पतेत्, हस्तपादा अपि व्रणिता भवेयुः । अतः 'किं भवेत् ?' इति चिन्तयतो मे देहे कम्पनमारब्धं, श्वासोच्छ्वासस्य गतिरपि वृद्धिं गता, समग्रो देहः स्वेदक्लिन्नो जातः ।

स मार्गोऽपि निर्जन आसीत् । वर्त्मनि गमनागमनं कुर्वन्तो न केऽपि जना दृष्टिपथमागच्छन् । अन्ते, शनैः शनैर्मार्जारपदेन पृष्ठपादेन च मया भोजनशालां प्रत्यावर्तयितुं प्रयत्न आरब्धः । सक्रोधं रक्तनेत्रवती साऽपि तामेव दिशं प्रत्येवाऽऽगतवती । यदा मया भोजनशाला दृष्टा तदाऽतित्वरया गत्या धावमानोऽहमन्तः प्रविश्य द्वारं पिहितवान् । साऽप्युच्छलन्ती सक्रोधं भोजनशालायाः प्राङ्गणे प्रविश्य नेत्र-कर्णमूर्ध्वीकृत्योत्थिता । तदा तत्रत्यैर्जनैः पृष्टोऽहं सर्वं कथितवान् । अन्ते तैर्जनैः



Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्चिदाहारं पुनः पुनः सन्दर्श्याऽन्यस्यां दिश्याकृष्टा सा । यदा साऽऽहारं भक्षयितुं प्रवृत्ता तदाऽहं विना शब्दं सभयं च बहिर्निर्गतवान् । पुनः पुनः पृष्ठतो दृष्टिं प्रकुर्वन् झटिति प्रविष्टवानुपाश्रयम् । शीतकालेऽपि सर्वाणि वस्त्राणि स्वेदक्लिन्नानि जातानि । मन्दरक्तसम्मर्दानां यादृशी स्थितिर्भवति तादृशी स्थितिर्मे जाता ।

गुरुदेवेन पृष्टम् - भोः !! किं जातम् ? कथं कम्पसे ? कथं भयभीतो दृश्यसे ? कथं च वस्त्राण्यपि सर्वाण्यार्द्रीभूतानि जातानि ?

मया सर्वमपि कथितम् । सर्वेऽपि मित्रमुनिवरा हसितवन्तः । अहमपि हसितवान् । किन्तु यदा यदा प्रसङ्गमेतं स्मरामि तदा क्षणं तु देहे भयं प्रसरति ।

**अद्याऽपि दुर्निवारं स्तुतिकन्या भजति शुद्धकौमारम् ।**
**सद्भ्यो न रोचते सा सन्तोऽप्यस्यै न रोचन्ते ॥**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनुवादः

# सौन्दर्यस्य नवं द्वारम्

मू. - जेरोम वीडमनः

अनु. - मुनिरत्नकीर्तिविजयः

एकदा कस्यचित् प्रसिद्धजनस्य गृहे भोजनायाऽहं निमन्त्रणं प्राप्तवान्। भोजनानन्तरं दृश्यद्वयं दृष्ट्वाऽहं किञ्चिदस्वस्थोऽभवम् । एकं तु, सेवकास्तत्र चतुष्पदीनां विन्यासं कुर्वाणा आसन् । अन्यच्च समक्षमेव भित्त्याः समीपे वाद्यानि स्थापितान्यासन् । मयाऽद्य सङ्गीतं श्रोतव्यं भविष्यतीति तेनाऽहं कल्पितवान्।

'श्रोतव्यं भविष्यती'ति शब्दप्रयोगोऽयं मम साभिप्रायोऽस्ति । यतः सङ्गीतं हि मम कृते सर्वथाऽर्थशून्यमेवाऽऽसीत्। प्रायोऽहं स्वरबधिर एवाऽऽसम्। सामान्यानपि स्वरानहं बहुप्रयत्नेनैवाऽभिज्ञातुं शक्नुयाम्; तत्राऽपि गभीरं वा शास्त्रीयसङ्गीतं तु मम कृते विविधानां ध्वनीनां मिश्रणमेव केवलमासीत्। अतो हि यत्र कुत्राऽप्यहमेवं पाशबन्धनमिवाऽनुभवेयं तदा यां रीतिं प्रयुञ्ज्यां तामेव रीतिमहमत्राऽप्युपयुक्तवान् - एकत्र स्थानं गृहीत्वा मुखं च बोधभावेन प्रशंसाभावेन चोपलिप्य कर्णव्यापारं च स्थगयित्वा विचारपरम्परायामहं लीनो जातः ।

किञ्चित्कालानन्तरमहमनुभूतवान् यन्मां परित उपविष्टा जनाः करतल-ध्वनिना सङ्गीतविषयकं स्वकीयमानन्दमभिव्यञ्जन्ति स्म। अतो मयाऽपि सावधानेन भवितव्यमित्यहं विचारितवान्। तावद् मृदुरपि विस्मयावहो हृदयस्पर्शी कश्चिद् ध्वनिर्मया श्रुतः - 'बाकमहाशयस्य सङ्गीतं भवते रोचते खलु ?' इति।

बाकविषयकं मम ज्ञानं तावदेवाऽऽसीद् यावदणुविस्फोटनविषयकम्। किन्तु, नित्यमोष्ठद्वयमध्यस्थितधूमवर्तिकस्य विकीर्णश्वेतकेशस्य विश्वप्रसिद्धस्य च तस्य जनस्य मम सम्यक् परिचय आसीत् - अहं हि 'आल्बर्ट आइन्स्टाइन'-महोदयस्य समीप उपविष्ट आसम् ।

'हं.....' अस्वस्थतयाऽहं प्रत्युत्तरितवान्; किञ्चित् क्षोभमपि प्राप्तवान्। प्रश्नोऽयं स्वाभाविकतयैव पृष्ट आसीत्। प्रत्युत्तरं हि मया कदाचिदुपेक्षया प्रदत्तं स्यादपि किन्तु मम समीपोपविष्टस्य तस्य महाशयस्याऽनन्यसाधारणी दृष्टिरेवं सूचयन्त्यासीद् यन्नैष व्यवहार औपचारिकः केवलम् । वार्तालापस्याऽस्य मम



Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनसि किञ्चिन्मात्रमपि मूल्यं न स्यात् किन्तु तस्य कृते तु तन्महत्त्वपूर्णमासीत्। अपरं च तस्य प्रतिभैव तादृश्यासीद् यदस्य पुरतोऽसत्यभाषणं स्वल्पमपि कर्तुं नोचितमित्यहमनुभूतवान् !

'बाकविषयेऽहं किमपि न जानामि' – किञ्चिद् दुविधयाऽहमुक्तवान् – 'तस्य सङ्गीतं हि पूर्वं कदाऽपि मया नैव श्रुतम्' ।

आइन्स्टाइनमहोदयस्य मुखेऽपि व्यग्रतामिश्रितमाश्चर्यं प्रसृतम् ।

'अपि बाकमहोदयस्य सङ्गीतं नैव श्रुतं भवता ?' तस्य घोष एव तादृश आसीद्, यथा कश्चित् पृच्छतीव-अपि भवता कदाऽपि स्नानमेव न कृतम् ? इति ।

मया त्वरितं प्रत्युत्तरितम् – 'सङ्गीतविषयेऽहं बधिरप्रायोऽस्मि । कस्याऽपि सङ्गीतं मया श्रुतं नाऽस्तीत्येव सत्यम्'– इति ।

वयोवृद्धस्य तस्य महाशयस्य मुखे चिन्ता व्याप्ता । 'अपि मया सहाऽऽगमिष्यति भवान् ?' अकस्मादेव स पृष्टवान् ।

उत्थाय च स मम हस्तं गृहीतवान् । जनसम्मर्दमध्यात् स मां बहिर्नीतवान् । विकला च मम दृष्टिरास्तरण एव कीलितेव जाता । एतद् दृष्ट्वाऽऽश्चर्यचकितेषु जनेषु मन्दं मन्दं जायमानः कलकलध्वनिः खण्डाद् बहिर्निर्गमनं यावदस्माभिः श्रुतः । किन्तु, आइन्स्टाइनमहाशयस्तं बाढमुपेक्षितवान् ।

दृढतया स मां गृहस्योपरितनभूमिकां नीतवान् । स हि तद्गृहस्य व्यवस्थया सम्यक् परिचितोऽस्तीति तस्य व्यवहारेण प्रतीयते स्म । खण्डमेकमुदघाट्य स मामन्तरुपवेशितवान् । स्वयं च तस्य द्वारं पिहितवान् । पश्चाद् वेदनामिश्रितेन स्मितेन स मां पृष्टवान् – 'अथ कथयतु नाम यत्–सङ्गीतविषये एतादृशो भावः कियता कालेन प्रवर्तते ?'

'आ प्रारम्भादेव' – अहमुक्तवान् । अनेनाऽस्वास्थ्यमहमनुभवन्नासम् । अतः – 'डॉ. आइन्स्टाइनमहोदय ! अहमिच्छामि यद् भवानधः सभायामुपविश्य सङ्गीतमास्वादयतु नाम । अहं तदास्वादयितुं न शक्नोमीत्यस्य नाऽस्ति तावत् किमपि महत्त्वम्' इति कथितवानहम् ।

एतच्छ्रुत्वा स तथा मस्तकं व्यधूनयद् यथा मया किमप्यसम्बद्धं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रलपितं स्यात् ।

पुनः स पृष्टवान् - 'अप्यस्ति तादृशं किमपि सङ्गीतं यद् तुभ्यं रोचेत ?' इति ।

'हम्... हम्.... सशब्दं यत् स्याद् यस्य च स्वराणामनुगुञ्जनं मम शक्यं स्यात् तादृशं हि सङ्गीतं मह्यं रोचेताऽपि' ।

सस्मितं स मस्तकमधुनोत् । मम प्रत्युत्तरेण स आनन्दितो जात इत्येतेन स्पष्टं ज्ञायते स्म ।

'उदाहरणतः .... ?'

'चित्रपटसङ्गीतगायकस्य बिंगक्रोस्बीमहाशयस्य यत्किमपि गीतम्' - सधैर्यमहं प्रत्युत्तरितवान् ।

'साधु साधु ।' पुनः स मस्तकं व्यधूनयत् । प्रकोष्ठस्य कोणे स्थिताद् लघुकोष्ठाच्च ध्वनिमुद्रिकान्वेषणं स प्रारब्धवान् । अहं ह्यस्वस्थतयैव तच्चेष्टितं निरीक्षमाण आसम् । अन्ततस्तस्य मुखं विकसितमिवाऽभूत् - 'आह !' इत्यानन्दोद्गारस्ततो निःसृतः ।

स हि ग्रामोफोन-यन्त्रं सञ्चालितवान् । पञ्चषनिमेषैरेव च बिंगक्रोस्बी-महाशयस्य - 'व्हेर ध ब्लु ओफ ध नाइट मिट्स ध गोल्ड ऑफ ध डे (यत्र हि रात्र्या नीलिमा दिवसस्य सुवर्णमाश्लिष्यति) - इति गीतेन खण्डः स समग्रतया व्याप्तो जातः । त्रिचतुरपङ्क्तयो गीतस्य प्रवृत्ता । अनन्तरम् आइन्स्टाइनमहोदयः सानन्दं मां प्रति दृष्ट्वा पृष्टवान् - 'अथ कथयेत् किल यद् भवता किं श्रुत'मिति ?

गीतस्य गानमेव प्रश्नस्यैतस्य सरलमुत्तरमासीत् । महता कष्टेनाऽहं मम स्वरभङ्गं संरुध्य यथाशक्यं माधुर्येण तदगायम् । तेन आइन्स्टाइनमहोदयस्य मुखे यो भावः समुद्गतः स उदीयमानस्य सूर्यस्य प्रकाशतुल्य आसीत् ।

'अरे वाह् !' मम गानेन समुल्लसितः स उक्तवान् - 'भवान् सङ्गीतं बुध्यत एव !' इति ।

'तत्तु मम प्रियं गीतमासीत् । बहुशश्च तन्मया श्रुतमप्यासीद्, अतो नाऽस्त्यस्य गाने किमपि वैशिष्ट्यम्' इत्यादिरूपं किमपि तदाऽहं स्वगतमिव जल्पितवान् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

आइन्स्टाइन उक्तवान् – 'अरे ! मैवं चिन्तयतु । इदमेव विशिष्टं महत्त्वपूर्णं चाऽपि । अपि स्मरति भवान् यद् विद्यालये गणितं कथं शिक्ष्यते ? प्रथमं तावदङ्कानां परिचयो दीयते । अथाऽङ्कानां परिचयदानानन्तरमेव यदि बहुलानामङ्कानां गुणनं विभजनं वा शिक्षयितुमारभेत तदा किं भवान् तत कर्तुं शक्नुयात् ?'

''नैव, किल ! ''

'आम् सत्यम् !' आइन्स्टाइनमहाशयो विजयीव मुद्रां कृतवान् – 'सत्यमेवैतद् यद् भवान् तथा कर्तुं नैवाऽशक्ष्यत । अपि च तदर्थं दुःखमपि भवतः स्यादेव । गणितविषये भवत उत्साहोऽपि मन्दोऽभविष्यत् । परिणामतः शिक्षकस्यैतादृश्या लघ्व्या अपि क्षतेः कारणादाजीवनं भवान् गणितस्य सौन्दर्यमानन्दं वा नैव प्राप्स्यत् ।'

धूमवर्तिका तस्य पुनस्तरङ्गिता जाता – 'किन्तु, गणितशिक्षणस्य प्रथम एव दिवसे न कोऽपि शिक्षक एतादृशं मूर्खत्वमाचरेदपि । प्रथमं स सामान्यबोधं दद्यात् । अङ्कानां सुकरं गुणनं विभजनं वा स प्रथमं शिक्षेत । पश्चाच्च शनैः शनैः स कठिनं गुणनादिकं शिक्षेत । सङ्गीतविषयेऽप्येषैव रीतिः' – आइन्स्टाइन-महोदयो बिंगक्रोस्बीमहाशयस्य ध्वनिमुद्रिकां गृहीतवान् – 'एतन्मधुरमपि सुबोधं गीतं सामान्यगुणनविभजनतुल्यमस्ति । तत्तु भवता सम्यग् ज्ञातम् । अथो भवानतोऽपि किञ्चित् कठिनं सङ्गीतमवबोद्धुमर्हति ।'

स ह्यन्यां ध्वनिमुद्रिकां मृगयित्वा वादितवान् । 'ध ट्रम्पेटर' इति गायतो जोह्नमेक्कोरमेकस्य मधुरो ध्वनिः सर्वत्र प्रसृतः । पञ्चषनिमेषानन्तरं स गीतं स्थगितवान् – 'अथ भवानस्याऽनुगानं करिष्यति, सत्यम् ?'

अत्यन्तं जागरूकतया स्वयमपि चाऽहमाश्चर्यं प्राप्नुयां तावताऽवधानेनाऽहं तस्य गानं कृतवान् । आइन्स्टाइनमहोदयो मां निरीक्षमाण आसीत् । तदा हि तस्य वदने यादृशो भावः समुद्भूतस्तादृशं भावमहं जीवने तत्पूर्वमेकश एव दृष्टवानासम् : विद्यालयस्याऽन्तिमे दिने यदाऽहं वक्तव्यं कृतवान् तदा मम पितुर्वदने तादृशो भावः समुद्गत आसीत् ।

'सुन्दरम् !' मम गानानन्तरम् आइन्स्टाइनमहाशय उक्तवान् – 'अद्भुतम् । अथ चेदम्-'



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदनन्तरं गीतं ततोऽपि कठिनमासीत्; किन्तु तथाऽप्यहं प्रयतवान्। तेन च आइन्स्टाइनमहोदयस्य वदनमाह्लादेन प्रकाशितमिवाऽभूत् ।

तदनु च प्रायोऽन्या द्वादश ध्वनिमुद्रिका वादिताः । अस्य महतो जनस्यैनां पद्धतिमधिकृत्याऽहं प्रथमत एवाऽस्वास्थ्यमनुभवन्नासम्। आकस्मिकतयैवाऽहं तस्य सन्निधिं प्राप्तवानासम्; अधुना चाऽत्र यत् प्रवर्तमानमासीत् तत्र हि स तथैकाग्रो जातो यथाऽहमेव केवलं तस्य चिन्ताया मध्यबिन्दुः स्याम् ।

एवमेव शनैः शनैरस्माकमियं सङ्गीतयात्रा शब्दरहितसङ्गीतपर्यन्तमागता। अथ मया शब्दशून्यानां केवलं स्वराणामेवाऽनुगानं करणीयमासीत् । उच्चैश्च स्वरालापो मया प्रारब्धः । तच्छ्रुत्वा आइन्स्टाइनमहोदयस्य वदनं विकसितमिव जातम् । मस्तकं च तस्य पश्चाद् गतम् । मदर्थं चाऽप्राप्यप्रायं मम प्रापयितुं साहाय्यं चिकीर्षुरिव तस्य तच्चेष्टितमासीत् !

स हि ग्रामोफोन-यन्त्रं स्थगितवान् ।

'अथ'... स्वहस्तेन मम हस्तं स गृहीतवान् : 'बाक-सङ्गीताय वयं सज्जाः किल !'

सभामध्ये आवयोः स्थानमावां पुनर्गृहीतवन्तौ । तदा च गायकास्तत्र नवीनं कञ्चित् स्वरं संयोजयन्त आसन्। 'मुक्तमनसा केवलं शृणोतु तावत्' - आइन्स्टाइन-महोदयो मम कर्णे मन्दमुक्तवान् : 'नाऽधिकं किमपि करणीयम्।'

किन्त्वधिकं तु तेनैव कृतमासीत्। कस्यचित् सर्वथाऽपरिचितस्य जनस्य कृते ये प्रयत्नास्तेन कृतास्ते यदि न कृताः स्युस्तर्हि बाकमहोदयस्य 'शीप मे सेइफली ग्रेइझ' - इति गीतं मया कदाऽप्यास्वादितं न स्यात्। तदनु च तद्गीतं मयाऽनेकशः श्रुतम्; तच्छ्रवणेन च न कदाऽपि मया खेदोऽनुभूतः । यतो नाऽहं कदाऽपि तदेकलः शृणोमि, किन्तु यदा कदाऽप्यहं तच्छृणोमि तदा श्वेतविकीर्णकेशस्य ओष्ठद्वयमध्यस्थितधूमवर्तिकस्य विस्मयसम्भृतनेत्रस्य तस्य जनस्य सान्निध्यं सततमनुभवाम्येव ।

समारम्भसमाप्तौ मया यः करतलध्वनिः कृतः स मम हार्दिकमानन्दमेवाऽभिव्यनक्ति स्म ।

सहसैव कार्यक्रमस्य निमन्त्रणदात्री स्त्री अस्माकं पुरः समुपस्थिता - 'अहं बहु विषण्णाऽस्मि, डॉ.आइन्स्टाइनमहोदय !' म्लानदृष्ट्या मां निरीक्षमाणा



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा जल्पितवती – 'यद् भवान् सङ्गीतस्य बहुलानंशान् श्रोतुं नाऽशक्नोत्' इति ।

आवामुभावपि तत उदतिष्ठताम् – 'अहमपि विषण्णोऽस्मि' – स प्रत्युत्तरितवान् – 'एवं सत्यप्यहं मम मित्रं च विश्वेऽस्मिन् मनुष्येण कर्तुं शक्यायां श्रेष्ठप्रवृत्तौ प्रवृत्तावास्ताम्' इति ।

'सत्यं किल ? का सा प्रवृत्तिः ?' निमन्त्रिकायाः स्त्रिया मुखे व्याकुलता प्रकटितेवाऽभूत् ।

आइन्स्टाइनमहोदयः स्मितं कृतवान् मम स्कन्धोपरि च स्वहस्तं स्थापितवान् । पश्चात् स यदुक्तवान् तदर्थमेकोऽप्ययं जनस्तस्याऽनन्तमृणभारं सदैवाऽनुभविष्यति । तदेव तस्य वचनं तत्पुण्यस्मृतावञ्जलिरूपेण प्रत्यर्प्यते– 'सौन्दर्यस्यैकं नवं द्वारमस्माभिरुद्घाटितम्' इति ।

विगृहीतः पदाक्रान्तो भूयो भूयश्च खण्डितः ।
माधुर्यमेवाऽऽवहति सुश्लोक इव सज्जनः ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# कथात्रयी

मुनिकल्याणकीर्तिविजयः

## (१) भगवन्नाम्नः शक्तिः

एकदा एकः कश्चिद् राजा निरागसं कञ्चिद् ब्राह्मणं हतवान् । पश्चात् तेन स्वीयो दोषो ज्ञातः । अतः पश्चात्तापपूर्णः सन् स ब्रह्मवधस्य घोरपापात् स्वात्मनो मोचनार्थं प्रायश्चित्तं कर्तुं स कस्यचिद् ऋषेराश्रमं गतवान् । ऋषिस्तु कार्यवशात् कुत्रचिद् गतवान् आसीत् । अतो राज्ञा तच्छिष्याग्रे स्वपापं प्रकटितं प्रायश्चित्तं च पृष्टम् । शिष्येण किञ्चिद् विचार्य कथितं – 'भो राजन् ! शुद्धेन मनसा भवान् त्रिर्भगवतो नाम गृह्णातु, भवतः सर्वोऽपि दोषो विनङ्क्ष्यति शुद्धश्च भवान् भविष्यति।' राजा तं नमस्कृत्य स्वनगरं प्रतिनिवृत्तः ।

इत आश्रमे प्रतिनिवृत्त ऋषिः शिष्यमुखाद् राज्ञः प्रायश्चित्तविधानं श्रुत्वाऽतीव रुष्टो जातः । स स्वशिष्यमुपालब्धवान् – 'भो ! केवलमेकवारमेव गृहीतमपि भगवन्नामाऽसङ्ख्यानां जन्मनां पापानि नाशयितुं समर्थमस्ति । तथाऽपि भवता राज्ञे त्रिर्भगवन्नाम जपितुमादिष्टं तद् भवतः श्रद्धाया ऊनत्वं ज्ञापयति ।'

—•—

## (२) कैतवम्

एकस्य सज्जनस्य पार्श्वे एक उत्तमोऽश्व आसीत् । अत्यन्तं सुन्दरो जात्यश्च सोऽश्वस्तस्मै अत्यधिकं प्रिय आसीत् । कदाचित् स तमश्वमारुह्याऽश्वचालनं कुर्वन् केनचिद् धनिकेन वणिजा विलोकितः । अश्वं दृष्ट्वैव स वणिग् विस्मयमुग्धो जातः । तेन चिन्तितं यद् 'यद्ययमश्वो मदीयः स्यात् तदा कियद् वरम् ? अहमप्यसाविवा-ऽश्वचालनानन्दं प्राप्नुयाम् । जनेषु च मम गौरववृद्धिरपि भवेत् ।'

ततः स तस्य सज्जनस्य गृहसङ्केतं प्राप्य तत्पार्श्वे गतः । तेनाऽपि स वणिक् सम्यक् सत्कृत्योचिते आसने उपवेशितः । विविधं वार्तालापं कुर्वन् सोऽवसरं प्राप्य तस्याऽश्वस्य विक्रयणार्थं तं प्रार्थितवान् । किन्तु सज्जनेन तत्प्रार्थनं निराकृतम् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदाऽनेन पुष्कलं धनं नैके चोष्ट्रास्तदश्वात् प्रति निवेदितास्तथाऽपि तेन सज्जनेन स्वीयोऽश्वोऽतिप्रियत्वात् नैवाऽर्पितस्तस्मै ।

अथ च स वणिक् 'कथमप्ययमश्वो मया हस्तसात् कर्तव्य एवे'ति निश्चयं कृत्वा तत्प्राप्त्युपायांश्चिन्तितवान् । 'अयं ह्येवमेव मेऽश्वं नैव दास्यत्यत एनं वञ्चयित्वैवाऽश्वं हरिष्यामि' - इति विचार्य स रोगिणो भिक्षुकस्य वेषेण राजमार्गे उपविष्टः । यदा स सज्जनस्तेनैव मार्गेणाऽश्वचालनं कुर्वन् समागतस्तदा तस्य भिक्षुकस्य दुरवस्थां दृष्ट्वा तच्चित्ते करुणा समुत्पन्ना । तत्समीपं गत्वा स कथितवान् - 'भोः ! कुत्र जिगमिषति भवान् ? उपविशतु ममाऽश्वोपरि । गन्तव्यस्थाने भवन्तं प्रापय्याऽहं प्रत्यागमिष्यामि ।' कपटभिक्षुकोऽपि तन्निशम्य शनैः शनैरश्वमारूढः । सज्जनश्चाऽयं यावत् पदातिरेव गन्तुं प्रवृत्तस्तावता स वणिक् कशयाऽश्वं प्रहृत्य वेगेन गच्छन्नुक्तवान् - 'भो ! भवता तदा मया बहुशो याचितेऽपि महता मूल्येनाऽपि मेऽश्वो न दत्तस्ततो मया भवानेवं वञ्चितो भवदश्वं प्राप्तुम् ।'

तदाऽयं सज्जन उच्चैस्तं कथितवान् - 'भो ! यदि भवता कैतवेन ममाऽश्वो गृहीतस्तदा भवत्वेवं नाम । भवानश्वं गृहीत्वा गच्छतु तं च सम्यक् पालयतु । किन्तु भवता कस्यचिदपि वञ्चनवार्तेयं न कथयितव्या । अन्यथा जनाः सर्वेऽप्यत्यधिकं सावधाना भविष्यन्ति दीन-दुःखिनां च सहायकरणे साशङ्का भविष्यन्ति कदाचिद् विरंस्यन्ति चाऽपि । अनेन च बहवो दुःखिनः सहायं न प्राप्स्यन्ति ।'

एतच्छ्रुत्वा स भिक्षुवेषी धनिको बहु लज्जितो जातस्तदैव चाऽश्वतोऽवरुह्य तस्य सज्जनस्य पादयोः पतितः, तस्मै चाऽश्वं प्रत्यर्प्य तेन सह मैत्रीं कृतवान् ।

## (३) भाग्यं फलति छदिषोऽपि

सोऽतीव सौम्यो भद्रिको नीतिमांश्चाऽऽसीत् । यद्यपि दारिद्र्यं तं बहु पीडयति स्म, तथाऽपि कुमार्गैर्धनमर्जयितुं स्वप्नेऽपि न विचारयन् स सन्तोषेणैव निजजीवनं यापयति स्म । सौभाग्येन तत्पत्न्यपि तत्सदृश्येव स्वभावेनाऽऽसीत् । अतः सुखेन तयोः सहजीवनं प्रचलति स्म ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एकदा केनचित् कार्येण राजमार्गान्निःसृतस्य तस्य पादः शिलाखण्डेनैकेन पथि पतितेन घट्टितो जातः । तीव्रवेदनया पीडितः स तत्रैवोपविष्टः । किञ्चिद्वेलानन्तरं दरोपशान्तवेदनः स चिन्तितवान् यद् 'अयं शिलाखण्डो यद्यत्रैव पतितः स्यात् तर्हि बहूनां जनानां सङ्घट्टनं भविष्यति पीडाव्रणादिकं चाऽपि भविष्यन्ति । अत एनमित उत्थाप्याऽन्यत्र स्थापयेयं येन कस्यचिदपि बाधा न भवेत् ।'

ततो यावत् स तं शिलाखण्डमुन्नीतवान् तावता तदधः सुवर्णमुद्राभिः पूरित एकस्ताम्रघटस्तत्दृष्टिपथमायातः । तं घटं दृष्ट्वाऽनेन चिन्तितं यत्, 'केनाऽपि स्वीयं धनमत्र निधिरूपेण गोपितमस्ति तत्प्रत्यभिज्ञार्थं च सङ्केतोऽपि कृतोऽस्तीति ज्ञायते, अतो न मयाऽयं परकीयो निधिर्ग्रहीतव्यः, अत्रैवाऽयं तिष्ठतु नाम ।' एवं विचार्य स ततो निर्गत्य गृहं प्राप्तः ।

रात्रौ वेदनार्त्ते पादे औषधं लेपयन् स स्वपत्नीं तत्सर्वं सुवर्णमुद्रापूरितघटादिवृत्तं कथितवान् । अथ तद् वृत्तं तदैव तस्य गृहे चौर्यार्थमागतश्चौरः कश्चिच्छ्रुतवान् । 'अहो ! विनाऽऽयासेनैव यद्येतावद् धनं प्राप्येत तर्हि कः क्षात्रादिपरिश्रमं वा कुर्यात् ?' इति चिन्तयन् स चौरस्तेन निर्दिष्टं स्थानं गत्वा झटित्येव तं शिलाखण्डमपनीतवान् । ततो लघुदीपसाहाय्येन यावत् तदन्तः पश्यति तावत् तत्र वृश्चिकैः पूर्णो घटस्तेन दृष्टः । तदा क्रोधेन, 'हुम्-इयती वञ्चना ! इदमिदानीमेव तस्य वञ्चनायाः फलं दर्शयामि' इत्यादि चिन्तयन्नसौ तं घटं गृहीत्वा तस्य जनस्य गृहं प्राप्तो, गृहोपर्यारुह्य पटलं चाऽपसार्य गृहमध्ये एव तं घटं 'सर्वे वृश्चिका एनं दशन्तु' इति बुद्ध्याऽधोमुखीकृतवान् । तावता खणणण--- इति ध्वनिं कुर्वत्यः सर्वा अपि सुवर्णमुद्रास्तस्य जनस्योपर्येव पतिता ।

एतद् दृष्ट्वाऽतीव हृष्टः स कथितवान् यद् 'यदा भाग्यं फलति तदा छदिषं पाटयित्वाऽपि ददाती'ति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# स आसीन्मम तातपादः

प्रा. अभिराजराजेन्द्रमिश्रः

इलाहाबादनगरस्य दारागञ्जश्मसानघट्टे तस्य शवो दह्यमान आसीत्। ममाऽनुगतानां कार्यालयीयाधीनस्थकर्मचारिणामन्येषां च परिचितमित्राणां विशाल-समवायो मया सहैव तत्र स्थित आसीत्। विचित्रैवाऽऽसीदुभयोः स्थितिः - ममाऽपि च, सम्मर्दस्य चाऽपि।

शवोऽयं न मम पितुः, पितृव्यस्य, कुटुम्बिनो, ज्ञातिजनस्य वाऽऽसीत् - इति निपुणं जानन्त एव तत्रस्था जना न मां तथा सान्त्वयितुमुद्यता आसन् यथा ते दिवङ्गते सति कस्मिन्नपि ममाऽऽत्मीयेऽभविष्यन्। तथाऽपि मया क्रियमाणायामस्यामन्त्येष्ट्यां, यस्य कस्याऽपि वा, ते सर्वेऽपि सम्मिलिता आसन्।

सर्वेषामेव मुखमण्डलं निर्लेखकर्गजपर्णमिव प्रत्यभासत। सर्वेषामेव नयनयोः प्रश्नाः प्लवन्त इव पर्यलक्ष्यन्त। तत्सर्वमहं न ज्ञातवान् इति न। तथाऽप्यनवसरवशाद् वयं सर्वेऽपि मौनमेवाऽऽश्रित्य स्थिताः। एवं सत्यपि केचित् केषाञ्चित् कर्णेषु किञ्चिदुद्वमन्त आसन्। तदहं सम्यक्तया ज्ञातवान्। वस्तुतो यद्रहस्यं ते मां निवेदयितुमैच्छन्, तथा कर्तुमशक्ताः सन्तस्तदेव तेषां सहस्थानां कर्णेषु विन्यस्यन्ति स्म। परन्तु तावताऽपि तेषामुत्कण्ठाप्रशमनं न जातमित्यहं तर्कितवान्। यतो हि महताऽऽदरभावेन दाह्यमानोऽयं जनो मया सह केन सम्बन्धेन सम्बद्ध आसीदित्यहं स्वयं न ज्ञातवान्। का कथा पुनरपरेषाम्?

अन्त्येष्टिः सम्पन्ना। मृतात्मने, मया मत्सहचरैश्च समवेतैः श्रद्धाञ्जलयोऽर्पिताः। भागीरथ्या जलेन शवदाहभूमिं शीतलीकृत्य वयं सर्वेऽपि स्वगेहानुपावृत्ताः। मार्गेऽपि, पदातय एवाऽग्रेसरन्तो वयं स्वमौनव्रतं सम्यक्तया निर्व्यूढवन्तः। ततश्च गृहमासाद्य, पूर्वत एव स्थापितं तत्रत्यमग्निमुपस्पृश्य निम्बपर्णं च दन्तैरीषन्निकृत्य सर्वेऽपि सहयायिनः स्वगृहं प्रस्थिताः।

अहमप्येकादशदिनानि यावद् मृतकाशौचं निर्वहन्, सायं प्रातर्गङ्गातटं गत्वा तस्मै प्रेतात्मने जलाञ्जलिं दत्त्वा, पिप्पलतरुशाखावलम्बितं घटं जलेनाऽऽपूर्य पक्वश्यामाकचूर्णनिर्मितं पिण्डं प्रदाय धूपदीपादिकं च प्रदर्श्याऽन्ते साञ्जलिपुटप्रणामं क्षमायाचनं च कृत्वा गृहमागच्छम्। सकृदेव सायङ्काले स्वहस्तनिर्मितं स्वादुभोजनं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतवान् । कदाचित् घृतशर्कराप्रचुरं पायसं, कदाचित् पूरिकाशाकं, कदाचिन्माषराजमाषमिश्रितं कृशरं, कदाचिदापणादानीतं रसगोलकजातं,कदाचिच्च सक्तुगर्भां शष्कुलीं वृन्ताकालुकचौक्षसहितामशित्वा परमां प्रीतिमुपगतोऽहम् । यावदेव स्वादु भोजनं भक्ष्यते तावदेव परितुष्टिर्जायते प्रेतात्मन इति कुलवृद्धा मां समुपादिशन्।

ततश्च दशमे दिने दशगात्रकर्म सम्पन्नम्। महापात्रः पिण्डदानादिकार्यं सम्पाद्य शाखालम्बितघटं स्फोटितवान् । गृहसदस्याश्च सर्वे शिरोमुण्डनं कारितवन्तः । मृतकाशौचमद्य परिसमाप्तम् । पृथग्भोजनमप्यवसितम् ।

अन्येद्युः श्राद्धकर्म प्रारब्धम्। तदासीन्निखिलदिवसव्यापि। श्वेतवस्त्राच्छादिते शरपत्रच्छदियुक्ते विस्तृतमण्डपे सर्वमपि कार्यं धर्मानुष्ठानं च सम्पन्नं जातम्। पार्श्ववर्तिन्यां वैतरण्यां सवत्सां धेनुं संस्थाप्य मया सा सरिदुत्तीर्णा। सपिण्डीकरणाऽनन्तरं महापात्रं वैकुण्ठमण्डपे समुपवेश्य यथाशक्ति प्रदत्तदक्षिणाभिस्तं प्रसादमावमापाद्याऽऽत्मानं कृतकृत्यं धन्यधन्यं तातपादादनृणं चाऽहं कृतवान्। त्रयोदशे दिवसे ब्राह्मणभोजनाख्यः सामाजिकः कश्चिदुपक्रमोऽपि पूर्तिमभजत् । वस्तुतो ब्रह्मभोजेन सहैव सर्वमपि गृहवातावरणं सामान्यं जायते ।

स आसीन्मम तातपादः ।

परन्तु ममाऽनेन कथनेन को लाभः ? यतो हि ममाऽस्मिन्नङ्गीकारेऽप्यासन् अनेके प्रत्यवायाः । यदि नामाऽसौ मम तातपाद एवाऽऽसीत् तर्हि कथं न मया सह ममाऽऽवासेऽवसत् ? कथं न मया सहैवऽभुङ्क्त ? इतः प्राक् क्वाऽऽसीदसौ ? न मया कदाऽप्यसौ मध्येमित्रमण्डलं चर्चितः परिचायितो वा ! सर्वेऽपि नागरिका मां पितृविहीनं कुटुम्बिजनविरहितमेव परिचिन्वन्ति। आत्रिंशद्वर्षेभ्यो नगरेऽस्मिन् एकल एव स्थितोऽस्मि । विवाहानन्तरमेव पुत्रकलत्रतृतीयोऽस्मि सञ्जातः ।

इत्यपि सर्वे चिन्तयन्ति स्म यत् को नु जन्मदाता पिता मत्सदृशस्य श्रेष्ठाधिकारिपदप्रतिष्ठितस्य विद्याविनयसम्पन्नस्य पुत्रस्य गर्वं नोद्वहति ? यदि पुनर्दिवङ्गतोऽसौ जनः परमार्थत एवाऽऽसीन्मम जन्मदाता पिता तत्कथं नु मत्तः पृथगवस्थातुमशकत् ? नाऽऽसीदसावसाध्यरोगजर्जरो, न वा विरक्तः संन्यासी, न चाऽपि मया परित्यक्तो बहिष्कृतो वा ? तत्कथमासीदसौ मम तातपादः ?

प्रश्नमिमं समाधातुमेव पाठकानतीतेऽनेहसि नयामि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वादशकक्षां प्रथमश्रेण्यां समुत्तीर्य शिक्षाग्रहणार्थं प्रयागमागत आसम् । ग्रामटिकामृत्तिकायां समुत्पन्नस्तावता कालेन इलाहाबादनगरमपि सम्यक्तया न ज्ञातवान् । परन्तु ममैव ग्रामस्य निवासी श्रीपालः प्रयागनगरे रिक्शायानं चालयति स्म । अन्त्यजकुलोत्पन्नोऽसौ मया सहैव पञ्चमीं कक्षां यावत् शिक्षामग्रहीत् । पश्चादसौ गृहदैन्यवशात् पठितुं नाऽशकत् । परन्तु सहाध्ययनकाले मयि नितरामसौ स्निग्ध आसीत् । ततश्चाऽसौ कुटुम्बपोषणार्थं किञ्चिदर्जितुं निजावुत्तेन सार्धमिलाहाबाद-नगरमुपागमत् । विगतसप्तवर्षेभ्योऽसौ तत्रैवाऽऽसीत् ।

यदाऽसौ मां प्रथमश्रेण्यामुत्तीर्णं श्रुतवान् तदा स्वहर्षं प्रकटयितुं मामपश्यत् । चिरकालानन्तरमावयोः सङ्गमो जातः । स कदाचिदेव ग्राममागच्छति स्म । आगतोऽप्यसौ प्रायेण स्ववसतावेव निरुद्ध आसीत् । यावदहं तमागतं शृणोमि, तं च मिलितुं निश्चिनोमि तावदसौ प्रयागं प्रतिष्ठितोऽश्रूयत । विचित्रैवाऽऽसीदावयोः स्थितिः ।

परन्तु सम्प्रत्यावां सम्मुखीनौ जातौ । स मां महतोत्साहेन हर्षेण च वर्धापितवान् । भूयोऽप्यवदत् ।

– बन्धो ! ग्रामेऽस्मिन् रत्नकल्पोऽसि । कुलं ग्रामः क्षेत्रं जनपदः सर्वेऽपि भवता सदर्थिताः । भवत्सहपाठित्वेनाऽहमपि धन्यो जातः । मातृपितृसुखवञ्चितोऽपि समाजैकशरणो भवान् यथा शिक्षां गृहीतवान् तन्निदर्शनभूतमन्येषां कृते ।

सम्प्रति क्व पठितुमभिलषति भवान् ?

– श्रीपाल ! पार्श्ववर्तिनि महाविद्यालय एव गन्तुमिच्छामि !

– बदलापुरस्थे प्रतापगञ्जस्थे वा ? श्रीपालोऽपृच्छत् ।

– यत्र कुत्रापि सरलतयाऽर्थसाहाय्यमुपलभ्येत । सर्वमेव जानाति भवान् । भोजनस्याऽपि सम्यक् प्रबन्धो न वर्तते । अत एव नगरस्थे विद्यालये क्वचिद् गन्तुं क्व मे शक्तिः ? मया भणितम् ।

– भ्रातः ! स्वर्णकुद्दालो दर्शनाय भवति न पुनर्धरित्रीखननाय । यद्यल्पशिक्षितोऽहम् इलाहाबादनगरमुपगन्तुं समर्थोऽभूवं तर्हि कथं न भवान् तत्रस्थे विश्वविश्रुत-विश्वविद्यालये शिक्षां गृहीतुं समर्थः ? सोऽपि मयि तत्र विद्यमाने ?

– श्रीपाल ! बन्धो ! तव स्नेह एवं भाषते । जानामि भवदीयं हृदयम् । तथाऽपि



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नगरनिवासव्ययो न मया सोढुं शक्यते । यद्यपि सुनिश्चितमिदं यत् छात्र-वृत्तिर्मयोपलप्स्यते, तथाऽपि प्रारम्भे तु सर्वतोभावि कृच्छ्रमेव समवलोक्यते । न मम भालपट्टेऽङ्कितः प्रयागविश्वविद्यालयः ।

– साधूक्तं भवता । नाऽङ्कितो भवद्भालपट्टे प्रयागविश्वविद्यालयः । तत्कार्यमहं करिष्यामि । साट्टहासमवादीत् श्रीपालः ।

बन्धो ! जानात्येव भवान् यन्मूर्तिकारा न भवन्ति भगवन्माहात्म्यविशारदाः । शिलालेखटाङ्किका न भवन्ति पण्डिताः श्लोकार्थवेत्तारः । कविप्रणीतं पद्यजातं जयघोषणादिकं दर्शं दर्शमेव सयत्नं तत्सर्वमुट्टङ्कयन्ति ।

एवमेव भवद्बालमित्रमहमपि पञ्चमकक्षोत्तीर्णो भवद्भविष्यमजानन्नपि भवद्भालपट्टे प्रयागविश्वविद्यालयं लिखामि ।

पश्य बन्धो ! इलाहाबादनगरोपकण्ठस्थिते गडरियापुरनाम्नि ग्रामे वयं प्रायेण विंशतिमिता रिक्शाचालका निवसामः । कस्यचिदाभीरस्य तद् गृहम् । तत्रैवाऽस्माभिः सह भवानपि कोणे कस्मिंश्चित् निवसतु । स्वकीयं भोजनं स्वयमेव पचतु । यथाऽहमात्मनः कृते गोधूमचूर्ण-द्विदल-तैल-लवण-शाकादिकस्य प्रबन्धं करोमि तथैव भवतोऽपि प्रबन्धं विधास्ये !

बन्धो महेश्वर ! पण्डितकुलोत्पन्नोऽसि । अत्र ग्रामटिकाविद्यालये न ते प्रतिभा विकासमवाप्स्यति । पामराणां सङ्गतौ क्व परिष्कारः ? परन्तु तत्र प्रयागे सुरुचिसम्पन्नानां साहचर्ये भवज्जीवनं देदीप्यमानं भविष्यति ।

– तदलं विचार्य । मया सहैव प्रस्थातव्यम् । शापितोऽसि भवान् आवयोः सौहृदेन । अस्मिन् विषये न केनाऽपि सह काऽपि मन्त्रणा कार्या, न वा साहाय्यं ग्राह्यम् । अहमस्मि भवता सहैव !

इति श्रुत्वैवाऽहं श्रीपालं सप्रणयमाकृष्य सपरीरम्भं क्रोडे कृतवान् । दिनद्वयानन्तरमेवाऽहं श्रीपालेन सार्धमिलाहाबादमागतवान् । यथाऽऽख्यातमासीत् श्रीपालेन तत्सत्यमासीत् । विविधजात्युत्पन्नाः सर्वेऽपि रिक्शाचालका बन्धुत्वरज्जुनिबद्धा महता प्रेम्णा तत्राऽऽभीरगृहे निवसन्ति स्म । केचन दिवाकाले, केचिच्च रात्रौ रिक्शां चालयन्ति स्म । केषाञ्चित् समवेतभोजनव्यवस्थाऽसीत् । कश्चिच्चैकल एव पचति स्म । प्रायेण सर्वेऽपि प्रतिवेशिग्रामवासिनो मिथः परिचिता आसन् । तेषु द्वित्रा निर्धनब्राह्मणकुलोत्पन्ना युवानोऽप्यासन् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीपालः सविशेषं निवेद्य, तैः साकमेव ममाऽपि भोजनप्रबन्धं कृतवान् । सर्वमिदानीं सम्पन्नं जातम् । परिचये घनीभूते, प्रीतिरपि प्रगाढात् प्रगाढतरा जाता । सर्वेऽपि रिक्शाचालका मय्यतितरां स्निह्यन्ति स्म । यः कोऽपि विश्वविद्यालयदिशि आगच्छन् मामपि सप्रणयं सनिर्बन्धं निर्भाटकमानयति स्म । सायङ्कालेऽपि प्रायेण नगरादावासमुपावर्तमानः पथि मिलितः कोऽपि मां गडरियापुरं यावदानयति स्म ।

मम भाग्यद्वारमपावृतमासीदिदानीम् । श्रीपालकृपया सम्प्रत्यहं प्राच्यकेम्ब्रिज-पदवाच्ये इलाहाबादविश्वविद्यालये प्रविष्टो जातः । संस्कृतेतिहासाङ्ग्लभाषाश्चेति त्रयो मम पाठ्यविषया आसन् ।

कतिपयमासनन्तरमेव छात्रवृत्तिरप्यवाप्ता । छात्रावासे कश्चित्कक्षोऽपि मह्यमावण्टितः । सजलनयनः सन् सर्वान् रिक्शाचालकानकारणबन्धून् प्रणम्य, श्रीपालं च भूयो भूयः प्रचुम्ब्य, समालिङ्ग्याऽहं छात्रावासमागतवान् ।

ताराचन्दच्छात्रावासात् नाऽतिदूर आसीद् विश्वविद्यालयः । अत एवाऽहं पदातिरेव प्रायेण सार्धनववादने कक्षान्निष्क्रम्य कोषागार(बैङ्क)मार्गेणाऽऽसाद्य पक्षद्वारदिशात एव विश्वविद्यालयमागतवान् । एवङ्करणे पञ्चदशनिमेषा एवाऽपेक्ष्यन्ते स्म ।

कस्मिंश्चिद् दिने मम दृष्टिः क्वचित् केन्द्रिता जाता । अयमासीत् कश्चिदन्धो भिक्षुकः । स खलु कोषागारमार्गस्थ एव कस्मिंश्चिद् वटवृक्षाधःस्थले स्थितो 'राम राम ! राम राम !' इतिमात्रं रटन् परिलक्ष्यते स्म । न कोऽपि याञ्चाशब्दः, न वा किमपि निवेदनम् । न केनाऽपि सह वार्ता । न चाऽपि रामशब्दोच्चारणक्रमे काऽपि त्रुटिः, भङ्गोऽवरोधो वा । सर्वथा निरपेक्षभावेन रामस्मरणं कुर्वन्नसौ महान् तपस्वी प्रतीयते स्म ।

प्रथमदृष्टौ न मे किमप्यधिकमाकर्षणं जातम् । दशपणकानां मुद्रां कामपि तस्मै दत्त्वाऽहं विश्वविद्यालयं गतवान् । एवमेव कदाचित् किमपि दत्त्वा, कदाचिदत्त्वा, कदाचिदुत्तरमनपेक्ष्याऽपि स्वप्रणामं निवेद्य, कदाचिच्च कतिपयनिमेषान् यावत् तस्य रामस्मरणमुद्रामात्रं सश्रद्धमवेक्ष्याऽहं गतागतानि समपादयम् ।

स खलु धूसरप्रच्छदं स्वकीयमास्तीर्योपविशति स्म । पार्श्व एव तस्य लघ्वी वंशयष्टिः समुद्गकं चेति द्वयं दृश्यते स्म । कदाऽयमायाति, कुत आयाति, सायङ्काले कुत्र गच्छति, रामस्मरणमध्यावधौ कदा मेहननिमित्तमुत्तिष्ठति, कदा वा जलं पिबति



Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्चिदश्नाति वा-इत्येते प्रश्ना ममाऽन्तरालोपवने झञ्झामिव समुत्थापितवन्तः । स खलु निरन्तरमेव करतलद्वयं भूमौ संस्थाप्य, कायं प्रणिधाय, स्मिताननः सन् रामनामस्मरणं कृतवान् ।

विचित्र एवाऽऽसीदसौ भिक्षुकः । शतावधानः प्रतीयते स्म । काचिन्महिला तस्मै पायसं प्रयच्छन्ती कथयति स्म-साधो ! अद्य मम गृहे पुत्रजन्मोत्सव आसीत्। भवत्कृते पायसमानीतं मया । एतदिदं भवत्समुद्गके स्थाप्यते । अवसरमवाप्य भुञ्जीथाः । तत्सर्वमाकर्ण्याऽप्यसौ स्मितकमात्रं प्रकटितवान्, स्वरामनामस्मरणं न जातु स्थगयति स्म । एवमेव नित्यायायिनः केचन परिचयवशाद् निमेषमात्रं स्थित्वा तस्य कुशलमनामयं पृष्ट्वैवाऽग्रेसरन्ति स्म ।

स खलु सर्वेषां वचनानि, प्रस्तावानशृणोत् । कदाचिद् द्वित्राणां पञ्चषाणां वा वार्ता एकैकशोऽशृणोत्,सम्भूय वाऽशृणोत् । परन्तु समेषां प्रियजनानां कृते तदुत्तरमेकमेवाऽसीत् - लघुस्मितकमात्रं रामनामसहकृतम् । इयमेवाऽऽसीत् तस्य शतावधानता । अयमेवाऽऽसीत् तस्य समाधिर्योगो वा । कूर्मोऽङ्गानीव सर्वान् बाह्यविषयान् सर्वश आत्मनि संहृत्य रामनाम्नि स्थितोऽसौ प्रकृत्यैव स्थितप्रज्ञः प्रतीयते स्म ।

मम पदगतिमेव प्रत्यभिज्ञायाऽसौ मुखमुद्यम्य स्मितं प्रकटयति स्म । यथा नु पृच्छत्येव माम्-वत्स ! विश्वविद्यालयं गच्छसि ? अपि सर्वं कुशलम् ? अध्ययनं सम्यक्तया प्रवर्तते ? काऽपि समस्या बाधते किम् ?

एते प्रश्नास्तेनाऽपृष्टाः सन्तोऽपि पृष्टा एव प्रतिभान्ति स्म । अहमपि कल्पितमात्रं तदीयं वात्सल्यसमुदाचारमनुभूय प्रत्यङ्गं प्रहृष्ट इव सञ्जातः ।

शनैः शनैर्ममाऽऽसक्तिस्तस्मिन् प्रगाढा सञ्जाता । इयमासीन्मदीया भक्तिर्वा निष्ठा वा ? जिज्ञासा वा समुत्कण्ठा वा ? कुतूहलोपशान्तिप्रयत्नो वा तद्रहस्याधिगम-प्रयासो वा ? एतत्सर्वं नाऽहं वेद । तथाऽपि लौहखण्डमिव चुम्बकस्य तस्याऽऽकर्षणं मां प्रसह्याऽऽचकर्ष बबन्ध च ।

ततश्च कस्मिंश्चिद् दिनेऽहं सान्ध्यकाले तमुपगतः । अद्य मया सङ्कल्पितमासीद् यद्रामनामस्मरणावसान एव तं द्रक्ष्यामि । सान्ध्यविद्युद्दीपा राजमार्गेषु गृहेषु चाऽपि सन्दीप्ता आसन् । स खलु साञ्जलिपुटप्रणामं भगवन्तं प्रणम्य नामजपं परिसमाप्य प्रच्छदविकीर्णा दशपणक-विंशतिपणक-पञ्चाशत्पणकमुद्रा अन्विष्याऽन्विष्य संहर्तुं



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रायतत । तावदेव पार्श्वमुपेत्य नमस्कृतं मया ।

– अये वत्स ! इयति सान्ध्यकाले उपावर्तसे ? अपि सर्वं कुशलम् ?

– तात ! भवद्वचनं श्रोतुं कातरीभूता मे प्राणाः । षण्मासा व्यतीताः । न ते वाणी मया श्रुता । केवलं स्मितकेनोत्तरमाशीर्वादं वा प्रयच्छसि । नाऽहं भवन्तं रामनामस्मरणारम्भात् प्राक् न चाऽप्यनन्तरं दृष्टवान् । ततोऽद्य सर्वमपि कार्यजातं हित्वा, भीष्मप्रतिज्ञां च कृत्वा समायातोऽस्मि । अद्य भवता सहैव भवदावासं गमिष्यामि ! मयोक्तम् ।

तदुपश्रुत्य भिक्षुकोऽसौ निर्भरं हसितुमारब्धवान् । तं तथा प्रहसन्तमवेक्ष्य सोत्कण्ठमहं पृष्टवान् - कस्मादेवं प्रहसति भवान् ?

– प्रहसामि यत् त्वमद्य मम गृहं गन्तुमिच्छसि । वत्स ! श्वापदस्येव न मम किमपि गृहम् । यत्र कुत्राऽपि भूविवरमवाप्नोमि तत्रैव निर्भरं स्वपिमि । भगवत्या गङ्गायास्तटमेव मम गृहं जीवनयापनक्षेत्रं च । तत्र गत्वाऽपि किं करिष्यसि ?

– भवदीयं भिक्षान्नपिटकं वहन् भवता सह वार्तां करिष्ये ।

– कियन्ति दिनानि यावत् ?

– यावदत्र इलाहाबादनगरे स्थितोऽस्मि । यावच्च भवान् जीवति !

– वत्स ! मैवम् । किमिदं भणसि ? वहतो नीरस्य रममाणस्य योगिनो वा न कोऽपि निश्चितो मार्गः, न काऽपि नियता दिशा । त्वमसि नवयुवा, अहमस्मि वृद्धः । किं नु साम्यमावयोरवस्थयोः ? चिरञ्जीव शतञ्जीव इत्येव कामयेऽहम् ।

वत्स ! यन्निमित्तमागतोऽसि तदेव पूरय । शिक्षामवाप्य वृत्तिं चोपलभ्य सुखय स्वपितरौ कुटुम्बिनश्च । गच्छेदानीम् । सोऽवदत् !

– तात ! नाऽहमद्य भवन्तं त्यक्ष्यामि । भवता सहैव गङ्गातटं यावत् चलिष्यामि ।

इति कथयित्वैवाऽहमन्धभिक्षुकस्य वंशयष्टिकां तद्धस्ते दत्त्वा, तत्समुद्गकं च वामस्मकन्धेनाऽवलम्ब्य तेन सह प्रस्थितः । चिरपरिचिते मार्गेऽसौ तथा निर्भयमग्रेऽसरद् यथा दृष्टिसम्पन्नः स्यात् । अर्धहोरानन्तरमेव तेन साकमहं गङ्गापुलिनं यावदागतवान् । स खलु मां दारागञ्जोपनगरसमीपस्थे सघनलतावृक्षनिचिते कस्मिंश्चित् कुटीरे समानयत् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदं कुटीरं बन्धमार्गं निकषैवाऽऽसीत् । पार्श्व एव केचनाऽऽभीरा निवसन्ति स्म महिषीदुग्धव्यापारसंलग्नाः । अत एव तत्र पेयजलादिव्यवस्थाऽप्युपलब्धाऽऽसीत् । इतो गङ्गातटं नातिदूरस्थमासीत् । इदमेवाऽऽसीद् भिक्षुकस्य तस्य निवासमन्दिरम् ।

चिरं यावदहं तत्रैव स्थित आसम् । बन्धमार्गस्योपरिभागे केनचित् साधुना देवस्थानं निर्मापितमासीत् । दर्शनार्थिनां सम्मर्दः प्रातः सन्ध्यायां च तत्र दृश्यते स्म । तत्रैव चायपानादिकस्याऽपि व्यवस्थाऽऽसीत् । आगच्छतैव मया तत्सर्वं निपुणमवलोकितम् । अत एव वार्तामध्य एव तात ! सम्प्रत्येवाऽऽगच्छामीत्युक्त्वाऽहं बन्धमार्गोपरि गतवान् मल्लकद्वये चाऽत्युष्णचायपेयं निधाय समागतः ।

– तात ! चायं गृहाण ?

– बाढं बाढम् ! सम्यग् ज्ञातम् । मया चिन्तितं यन्मेहनार्थं गतोऽसि ! इदानीं ज्ञायते यच्चायपेयमानेतुं गतवानासीः-प्रसन्नतां प्रकटयन्निव सोऽवदत् ।

चायं पिबतोरावयोर्वार्ता प्रारब्धा । अहमिव सोऽपि मद्विषये परिज्ञातुं सोत्कण्ठ एवाऽसीत् । आत्मविषये मया किमाख्येयमासीत् ? आख्यात्री जननी तु शैशव एव मां विहाय दिवङ्गता । तदाऽहं दशवर्षदेशीय एवाऽसम् । केवलमेतावदेव स्मृतिपथमायाति यन्मम गृहे भग्नावशेषबहुले न किञ्चिदप्यासीत् । प्रबलवर्षाभिर्मृत्तिकानिर्मितं सकलमपि गृहं धराशायि जातम् । खर्परच्छदि निर्माणाय धनमपेक्ष्यते । तदेव मम मातुः पार्श्वे नाऽऽसीत् । न हलं, न वृषभौ, न कोऽपि हलवाहः ! कृषिकर्माऽप्यसम्भवमासीत् ।

एकस्मिन्नेवाऽवशिष्टे कक्षे जननी मामुत्सङ्गे कृत्वा शेते स्म । प्रायेणाऽसौ सम्मेलनव्याजेन मामादाय प्रतिवेशिनीनां गृहेषु पर्यटति स्म । परन्तु तस्या वास्तविकं लक्ष्यमासीत् क्षुत्क्षामकण्ठस्य मम कृते भोजनप्रबन्धः । काचिद् दयमाना प्रतिवेशिनी स्नेहवशादपृच्छदेव-वत्स ! महेश्वर ! किञ्चिद् भुक्तं न वा ? तच्छ्रुत्वा मयि स्तिमितनयने जाते सत्येव विदितयथार्था सा गृहलक्ष्मीर्मामुदरम्भरि भोजयति स्म । मां भुक्तवन्तं दृष्ट्वैव मम मातुरपि सम्यक्तृप्तिरिव जायते स्म ।

सप्तवर्षीयः सन्नहं शिक्षामवाप्तुं क्रोशत्रयदूरस्थे विद्यालये गतवान् । आसप्ताहं तत्रैवाऽध्यापकगृहे निवसन् शनिवासरे जननीं द्रष्टुं ग्राममागच्छम् । सप्ताहमध्ये जातु जनन्यपि वात्सल्यवशान्मां द्रष्टुं विद्यालयमागतवती । तदसौ कस्मिंश्चित् पात्रे पक्वं वास्तुकशाकं सर्षपतैललवणसम्मिश्रितं मत्कृते आनयति स्म । परन्तु रोटिकाया



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभावे कथं भक्षणीयः शाकः ?

अद्याऽऽत्मविषयेऽन्धभिक्षुकेण सदयं पृष्टः सन् तत्सर्वं स्मृतवान् । हन्त ! साऽकिञ्चना सत्यपि मत्सर्वस्वभूता जननी करालकालेन प्रसह्य लुण्ठिता । द्वादशवर्षदेशीय एवाऽऽसं यदा ममाऽम्बा दुर्निवारप्लेगाख्यसङ्क्रामकरोगेणाऽपहृता । तत एवैकलोऽहं जातः । केषाञ्चित् सानुकम्पमहानुभावानां साहाय्येन, कासाञ्चिच्चाऽन्नपूर्णानां जननीनां वात्सल्येन, मृत्योर्वारितः सन् द्वादशकक्षामुत्तीर्णवानहम् । तत्सर्वं मया यथास्मृति तातपादाय निवेदितम् । कथान्ते च स्वबालमित्रस्याऽन्त्यजकुलोत्पन्नस्य श्रीपालस्याऽपि कृपावृत्तं वर्णितं मया ।

ममाऽऽख्यानमाकर्ण्यैव भिक्षुकोऽसौ स्फुटितहृदयः सन् गाढगाढं रोदितुं प्रवृत्तः । किंकर्तव्यविमूढोऽहं जातः । किमपराद्धं मयेति ममाऽप्यज्ञेयमेवाऽऽसीत् ।

– तात ! कथं रोदिति भवान् ? ससाध्वसं पृष्टवानहम् ।

– न किमपि, न किमपि वत्स ! अश्रूणि प्रोञ्छन्या मार्जयन् सोऽवदत् । वत्स महेश्वर ! अतीव करुणा ते जीवनकथा । बहु दुःखं सोढं त्वया ! हे राम ! हे प्रभो ! किमेवं शातयसि निर्दोषान् ?

– तात ! मर्मनिकृन्तनीं मम व्यथां भवानिदानीमपि न जानाति । तामपि भवते निवेदयिष्ये । निर्भयमवदमहम् ।

– काऽसौ वत्स ? सविस्मयमन्धभिक्षुः प्रावदत् ।

– तात ! ग्रामे एतादृशोऽपि लोकापवादो मद्विषये परिव्याप्त आसाद्यत् पितर्युपरते सति, महता विलम्बेनाऽहं मातृगर्भात् समुत्पन्नः । एवंवादिनां जाल्मानां किमुद्देश्यं किं वा विवक्षितमासीदिति भवानपि सम्यक्तया वेत्ति । परन्तु तथ्यमिदं न केनाऽपि प्रत्यक्षमभिहितं न चाऽपि मया प्रत्यक्षं श्रुतम् । तथाऽपि सर्वमिदं श्रुत्वा जाबालायां सत्यवत इव ममाऽप्यास्था जन्मदात्र्यां दृढीभूता ।

– साधु साधु ! चिरञ्जीव वत्स ! इत्यसकृद् ब्रुवाणोऽन्धभिक्षुर्बाहू प्रसार्य मामुत्सङ्गे समाकुञ्च्य बहुशः प्रचुम्बितवान् । चिरं यावन्न कोऽपि भूयोऽप्याननमुद्घाटितवान् । मामकीं व्यथाकथां निशम्य स भिक्षुवरस्तु करतलद्वयं ललाटस्थले विन्यस्य शान्तशान्तोऽतिष्ठत् ।

तावदेव मया भणितम् – मन्येऽवसादितो मया भवान् । तत् क्षन्तव्योऽहमस्मि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदपराधभयादेव भवद्विषये नाऽद्य किञ्चित् पृच्छामि । सम्प्रति गमिष्यामि । अन्यथा भोजनकालेऽतिक्रान्ते सति भोजनालयकक्षोऽर्गलित एव सन्द्रक्ष्यते । भूयोऽप्यागमिष्यामि । इत्युक्त्वा यावदेवाऽहं गन्तुमैच्छं तावदेव तातोचितादेशगिरा मां सम्बोधयन्नसौ भिक्षुरवदत् -

– वत्स ! मदिच्छाविरुद्धमेव मय्यासक्तोऽसि जातः । मदिच्छाविरुद्धमेव मया सह मत्कुटीरं यावत् समागतोऽसि । अहमपि तावदीश्वरेच्छां मत्वा सर्वमपि तव प्रस्तावं स्वीकृतवान् । ईश्वरेच्छयैव प्रेरितः सन् स्वकीये दारुणदुर्घटितप्रचुरे जीवने प्रवेष्टुं त्वामहमनुमतवान् । सर्वथाऽसम्बद्धमपि दृष्टिहीनमिमं भिक्षुकं तातपदेन सम्बोध्य समादृतवानसि । तदिदानीं तताधिकारेणैव त्वामहमनुशासिष्यामि । ममाऽऽदेशं स्वीकरिष्यसि नवा ? मह्यं वचनं देहि। तातोऽवदत् ।

– तात ! कोऽयं सन्देहः ? त्वत्कृते जीवनमपीदं समर्पितम् । कथं न भवद्वचनं करिष्ये ? अहमुक्तवान् ।

– साधु, तर्हि समोदं गच्छ । श्वस्तने सान्ध्यकाले भूयोऽपि वार्तां करिष्ये ।

ततश्च छात्रावासमहमुपावृत्तः । परन्तु मध्येमार्गं चिन्तेयं नितरां बाधिततवती यत् किमनुशासिष्यति मां तातपादः ? किं मां भूयोऽप्यागन्तुं निषेधिष्यति ? उताऽहो वर्धमानं सम्बन्धमुच्छेत्तुं कथयिष्यति ? यद्येवमभूत् तर्हि दत्तपरिपालनवचनः किमहं करिष्ये ? कथं नाऽद्यैव सर्वं स्फुटीकृतं मया ?

एवं चिन्तयमान एवाऽहं छात्रावासमुपावृत्तः । ततश्चाऽग्रिमेऽहनि सान्ध्यकाले भूयोऽप्यहं भिक्षुवरेण सार्धं तत्कुटीरमगच्छम् । परन्त्वद्याऽऽवयोः साहचर्ये मुखरता नाऽऽसीत् । अहमपि भीत इवाऽऽसम् । साधुरपि प्रायेण मौनमेव समाश्रयत् ।

अथ मां ह्यस्तनं वृत्तं स्मारयन् भिक्षुकोऽसौ निजात्मकथामश्रावयत् - पार्श्ववर्तिन्येव कस्मिंश्चिद् ग्रामेऽसौ निवसति स्म । पापपरायणाः प्रतिवेशिनः धनवैभवोन्मत्ताः तद्गृहस्थाने काञ्चित् कर्मशालां निर्मापयितुमैच्छन् । परन्त्वसौ स्वपितृपितामहानां भवनं भूमिं च परित्यक्तुं कथमपि समुद्यतो नाऽऽसीत् । तत एव ईर्ष्याद्वेषरोषोपहतचेतसस्ते जाल्माः कस्याञ्चिद् रात्रौ तस्य पत्नीं पुत्रं च निर्दयं हतवन्तः । तस्याऽपि गृहपतेर्नयनयोर्विषाक्तं क्षाररसं भृतवन्तः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुटुम्बविनाशसन्तप्तो विनष्टदृष्टिश्च मासं यावदसौ नेत्रौषधालयेऽवसत् । परन्तु कृतेऽपि बहुश उपचारे नेत्रज्योतिर्न मनागप्यवाप्तम् । स्फुटितनेत्रोऽसौ भूयोऽपि स्वग्रामं नैवोपावर्तत । व्यथितो हताशः सन्तप्तः सन् सर्वमिदं स्वपूर्वजन्माचरितदुष्कर्मपरिपाकमात्रं मत्वाऽसौ रामनामस्मरणमेव जीवनालम्बनं विधाय प्रयाग एव स्थितो जातः । पुत्रकलत्रहीनोऽधुना कं नु द्रष्टुं ग्रामं गच्छेत् ?

रोदनपुरस्सरं कथेयं मया श्रुता । आसीन्मे मनसि - हे परमेश्वर ! एवंविधाः पापा अपि मनुष्या एव कथ्यन्ते ? आत्महिताय परेषां विनाशः ? स्वकर्मशालां निर्मापयितुं परकीयभवनोत्पाटनम् ? कुतस्त्योऽयं न्यायः ? आः दैव ! तातपादानां सर्वानन्दोपनिचितः कुटुम्ब एव क्षयमुपनीतः ? क्रोधामर्षवशान्ममाऽन्तराले भूकम्प इव समुत्थः । शोकवेगं यथाकथञ्चिन्नियम्य मयोक्तम् ।

– तात ! इतोऽग्रे भवच्छातकानां विनाश एव भविष्यति मज्जीवनलक्ष्यम् । तान् पापानहमवश्यं न्यायालयकोष्ठागारे स्थापयिष्यामि । सरोषमवदम् ।

– न, न । न कदाऽपि । वत्स ! मैवम् । प्रतिज्ञातं त्वया ह्यस्तनसन्ध्यायाम् । ममाऽनुशासनं स्वीकरिष्यसीति दत्तवचनोऽसि त्वम् । तत् सावधानं शृणु यत् कथयामि । भूयोऽपि नाऽहं किञ्चिद् भणिष्यामि ।

– तात ! कथय । एष शृणोम्यहम् ।

– महेश्वर ! एवं प्रतीयते यथा दिवङ्गतं स्वपुत्रं पुनरपि प्राप्तवानहम् । इतः प्रभृति त्वमेव मत्पुत्रोऽसि । अहमिच्छामि यद्धनाभावस्तवाऽध्ययनमार्गे प्रत्यवायो न भवेत् । अत एव रामनामस्मरणावाप्तदक्षिणाधनराशिं यं कमपि कोषागारे निक्षिप्तवानहं तमुपयोजय त्वमात्मकार्येषु ।

वत्स ! इतोऽग्रेऽहं परमार्थतस्तव तातपाद एव । सम्बन्धमिमं स्वीकरोम्यात्मधन्यतया । परन्तु नाऽयं सम्बन्धो लोके प्रकाशनीयः । लोकदृष्ट्या तु भिक्षुरेव भविष्याम्यहम् ।

महेश्वर ! कतिपयवर्षानन्तरमेव स्वाध्ययनं परिसमाप्य किमप्यधिकारिपदमवाप्स्यसि । स्वभवनं कुटुम्बमपि स्वकीयं कल्पिष्यसि ।

परन्तु वत्स ! न मां कदाऽप्यात्मभवने स्थिरमवस्थातुमनुरोत्स्यसि । अहमाजीवनं स्थास्यामि स्वकुटीर एवाऽस्मिन् ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतदेव ममाऽनुशासनम् । यदि नामैतत् सर्वं तेऽभिमतं स्यात् तर्हि आवयोः पितृपुत्रात्मकः सम्बन्धोऽक्षुण्णतामुपयाति । अन्यथा इतोऽग्रे न मां तातसम्बोधनेनोद्वेजयिष्यसि न चाऽपि दुर्भाग्यग्रस्तं मामनुसरिष्यसि ! सम्प्रत्याचक्षस्व । किमुच्यते त्वया ?

– तात ! भवता तु सर्वं ममाऽपहृतमेव । न किमपि दत्तम् । किमपि दास्यसि न वा ? मयोक्तम् ।

– दास्यामि, दास्यामि । परन्तु तदेव, तावन्मात्रमेव यन्ममाऽधिकारे भविष्यति । तातोऽवदत् ।

– सम्यगाह भवान् । तद् वस्तुद्वयं याचे यद् वर्तते भवदधिकारे । तात ! यदि भवदाशिषाऽध्ययनानन्तरं मया किमपि प्रतिष्ठास्पदं पदमवाप्तं, पदप्राप्त्यनन्तरं च यदि निवासभवनं किमपि निर्मापितं तर्हि भवनं तद् भवदीयनाम्नैव ख्यातं भविष्यति ।

द्वितीयाऽपि याच्ञा भवदधिकार एव तिष्ठति । शरीरत्यागानन्तरं शवदाहादारभ्य त्रयोदशाहसंस्कारं यावत् सम्पाद्यमानं सर्वमपि पुत्रोचितं धार्मिकं कार्यजातं केवलमहमेव सम्पादयिष्यामि ।

स्वीक्रियते भवतैतत् न वा ? मयोक्तम् ।

– स्वीकृतं स्वीकृतम् । स्मेराननः सन् वदति स्म तातः । भूयोऽप्याह–परन्तु वत्स ! केन नाम्ना स्वभवनं ख्यापयिष्यसि ? मन्नाम तु न कदाऽपि त्वया पृष्टम् ।

– यथाऽवसरं प्रक्ष्यामि । तन्मणिबन्धमाकुञ्च्य कथितवानहम् ।

– मा मैवम् । श्वकरणीयमद्यैव कार्यं धीमता । मन्नामाऽस्ति पुरुषोत्तम-पाण्डेयः । अत एव त्वमपि पुरुषोत्तमभवनमेव निर्मापयिष्यसि । रोचते न वा ?

स आसीन्मम तातपादः ।

सम्प्रति पाठकाः सम्यगवगताः स्युः । तदिच्छां समादृत्यैव न मयाऽऽवयोः सम्बन्धो मध्येसुहृत्समुदायं मध्येसमाजं वा कदाऽपि प्रकाशितश्चर्चितो वा । सर्वेऽपि मम सखायः परिचिताश्च केवलमेतावन्मात्रं ज्ञातवन्तो यदन्धभिक्षुके तस्मिन् मदीया



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रगाढा भक्तिर्वर्तते तद्दैन्यवशात् तद्विकलाङ्गतावशादेव। इतोऽधिकं न कोऽपि वेद। आन्तरः कोऽपि हेतुरावां व्यतिषजतीति न कोऽपि ज्ञातवान्!

मम भवनस्य नामाऽस्ति - पुरुषोत्तमभवनमिति। परन्तु भवननामकरण-रहस्यमपि रहस्यमेव वर्तते। द्वित्रैः सुहृद्भिः पृष्टमपि - भोः कथं न महेश्वरभवनमित्येव समुट्टङ्कितम्। यथा पुरुषोत्तमो विष्णुस्तथैव महेश्वरोऽपि देवाधिदेवः शम्भुः। मयोक्तं नर्मणा - किं न जानाति भवान् यन्महेश्वरोऽपि महान् वैष्णव एव? शिवस्य विष्णुभक्तिस्तु प्रसिद्धा।

तातपादप्रदत्ताधिकारेणैव मया तदौर्ध्वदैहिकं सर्वमपि कृत्यं सम्पादितम्। तातपादनिदेशं शिरसि धृत्वैव च मया न तदपकारिणः पापिष्ठा दुर्जना अन्विष्टा दण्डिता वा। तातपादस्य सर्वमपि धनं मया, पुरुषोत्तमन्यासं संस्थाप्य, तदीयकोष एव संरक्षितम्।

नगरनिगमाधिकारिणामनुमतिमवाप्य तातपादस्य कुटीरस्थाने पुरुषोत्तममन्दिरं, कोषागारमार्गेऽपि च वटवृक्षतले कामपि प्रपां निर्मातुमिच्छामि।



**सन्तः स्वतः प्रकाशन्ते गुणा न परतो नृणाम्।**
**आमोदो नहि कस्तूर्याः शपथेन विभाव्यते॥**



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# कण्ठाभूषणम्

डॉ. आचार्यरामकिशोरमिश्रः

लोपामुद्रा मुनेरगस्त्यस्य धर्मपरायणा कर्मनिष्ठा च भार्याऽऽसीत् । सा पत्या सह तपोवने निवसति स्म । राजा ऋषेरगस्त्यस्याऽऽश्रममागच्छति यदा कदा स्वपत्न्या सह तस्य दर्शनार्थमाशीर्वादाय च । राज्ञी सुन्दराभूषणावृता भवति स्म । तां दृष्ट्वा लोपामुद्राया हृदये वाञ्छा जागरिता, यत्तस्याः पार्श्वेऽप्याभूषणानि सन्तु । अतः सा स्वपतिमेकदा कथितवती-स्वामिन् ! तस्याः समीपे किमपि सुवर्णाभूषणं नास्ति । तस्याः कण्ठे त्वेकं सुवर्णाभूषणमवश्यमेव स्यात् । ऋषिरगस्त्यस्तस्या इच्छां पश्यंस्तामुक्तवान्-प्रिये ! कस्मिन्नपि दिने राजानमेकं कण्ठाभूषणं याचित्वा तुभ्यं प्रदास्यामि ।

एकदा मुनिरगस्त्यो राजप्रासादं गतः । स एकं कण्ठाभूषणं स्वपत्न्यै राजानं याचितवान् । राजा यदा कण्ठाभूषणं प्रदातुं राज्ञीं जगाद, तदा मुनिना कथितम् - राजन् ! यत्कण्ठाभूषणं भवान् मम पत्न्यै प्रदास्यति, तद् भवदर्जितधनस्य भवेत्, प्रजाया धनस्य न स्यादिति । राज्ञा निवेदितम् - 'मुने ! यानि सुवर्णस्याऽऽभूषणानि भवन्ति, तानि सर्वाणि प्रजासकाशात् प्राप्तैर्धनैर्निर्मितानि सन्ति ।' ऋषिणा प्रजाधनेन निर्मितं कण्ठाभूषणं ग्रहीतुं निषेधः कृतः । आश्रममागत्याऽगस्त्येन स्वपत्नी लोपामुद्रा कथिता - राज्ञः समीपे तदर्जितधननिर्मितं किमपि सुवर्णाभूषणं नाऽस्ति । अतः प्रिये ! मया प्रजाधननिर्मितं कण्ठाभूषणं न गृहीतम् ।

लोपामुद्रा स्वपतिमगस्त्यं कथितवती - स्वामिन् ! भवता प्रजाधननिर्मितं कण्ठाभूषणं न गृहीत्वा शुभं कृतम् । न जाने, प्रजाधनं कीदृशं स्यात् ? राजकोषस्तु प्रजाधनेनैव परिपूर्णो भवति । राजा प्रजासकाशात् कररूपेण सुवर्णाभूषणान्यपि प्राप्नोति । प्रजाभूषणान्येव राजभूषणानि भवन्ति । अतो राजधनमधर्मार्जितधनं भवति । अधर्मार्जितं राज्ञ आभूषणमस्माकं पुण्यानि नाशयितुं समर्थं सम्भवति । अतः स्वामिन् ! अस्माकं तप एवाऽस्मदीयं कण्ठाभूषणमस्ति ।

प्रिये ! सत्यमुक्तं त्वया । एहि, तपस्तद्धुं संलग्नौ भवेव ।

२९५/१४, पट्टीरामपुरम्,
खेकड़ा (बागपत) उ.प्र. २५०१०१



Jain Education International For Private & Personal Use Only www.jainelibrary.org



# मर्म-नर्म

कीर्तित्रयी

**भृत्यः** स्वामिनि ! नाऽहं मूर्खः । अहं भवत्यै कथं प्रत्याययेयम् ? - - - - - मया शब्दा एव न प्राप्यन्ते ।

**गृहस्वामिनी** अहो अहो ! भोः ! तव शब्दा न प्राप्यन्ते मम च गृहमध्ये कानिचिद् भाजनानि न प्राप्यन्ते !!

**एकः** भो ! किमिति भवान् वारं वारं मुखं विकृतं करोति ?

**अपरः** तत् तु, चिकित्सकेन मम 'स्तोक-स्तोकवेलायां हसनीय'मिति कथितमस्ति ।

**चतुरः** भोः ! तव जन्मदिनं कस्यां तिथौ ?

**सार्धचतुरः** ऑक्टोबर्-मासस्य त्रयोदश्यां तिथौ ।

**चतुरः** परं कस्मिन् वर्षे ?

**सार्धचतुरः** कीदृशं प्रश्नं पृच्छति भवान् ? प्रत्येकस्मिन् वर्षे भोः !

**पत्नी** भवान् किमर्थं निद्रायामुच्चैः क्रोशनं करोति ?

**पतिः** स्वप्नेऽपि त्वं मे कथनं नैव मन्यसे, अतः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

(जीवविज्ञानस्य प्रयोगिकीपरीक्षायां शिक्षकेणैकस्मै विद्यार्थिने कस्यचित् पक्षिणः पादमेकं दर्शयित्वा पृष्टं)

**शिक्षकः** वदतु भोः ! कस्य पक्षिणोऽयं पादः ?

**विद्यार्थी** नैव जानामि महोदय !

**शिक्षकः** एवं तर्हि त्वं परीक्षायामनुत्तीर्णो भविता । वदतु किं वा ते नाम ?

**विद्यार्थी** (पादमूर्ध्वीकृत्य) यदि भवता ज्ञायेत तर्हि लिखतु !!

**पतिः** त्वं ममैकस्मिन्नपि कथने सम्मतिं न दर्शयसि । किमहं मूर्खो वा ?

**पत्नी** भवतु । अस्मिन् कथने मम पूर्णा सम्मतिरस्ति ।

(एकदा द्वौ ग्रामीणौ नगरं गतौ सन्तौ सङ्ग्रहालयमेकं द्रष्टुं गतौ । तत्रैकं इजिप्तदेशीयं पुराणं शवं प्रदर्शनार्थं स्थापितमासीत् । तस्योपरि बह्वीः पट्टिका बद्धा दृष्ट्वा-)

**एकः** नूनं लोरी-यानेन सहाऽस्याऽपघातो जात इति प्रतिभाति ।

**द्वितीयः** आम्, सत्यम् । पश्यत्वत्र लोरी-यानस्य क्रमाङ्कोऽपि B.C. 1760 इत्युल्लिखितोऽस्ति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पं. राजेन्द्र शाह
डीसा

**पत्नी** अहं भवते यदपि कथयामि तद् भवानेककर्णेन श्रुत्वाऽपरकर्णतः निष्कासयति ।

**पतिः** किन्तु अहं यत् कथयामि तद् त्वं द्वाभ्यां कर्णाभ्यां श्रुत्वा मुखतो निष्कासयसि खलु !

**चैत्रः** मम, पत्न्या सह यदाऽपि मम क्लेशो भवेत् तदाऽन्ते सा मम कथनं मन्यते एव ।

**मैत्रः** एवं कथं वा सम्भवेत् ?

**चैत्रः** कथमेवं न भवेत् ? यतः प्रान्तेऽहं तस्यै एवं विज्ञपयामि यत् सर्वाऽपि क्षतिर्ममैव । कृपया क्षमस्व माम् ।

**पत्नी** स्वातन्त्र्यदिनं कदा वाऽऽयाति ?

**पतिः** यदा त्वं पितृगृहं गच्छसि तदा !



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राकृतविभागः

# पाउअपाउडम् - प्राकृतप्राभृतम्

अरैयर् श्रीरामशर्मा

## अन्तरङ्गम्


| | | |
|---|---|---|
| (१) | कइन्दो | कवीन्द्रः |
| (२) | मङ्गळम् | मङ्गलम् |
| (३) | कइविसओ | कविविषयः |
| (४) | सावअसिद्धा | श्रावकसिद्धाः |
| (५) | पाउअविचारो | प्राकृतविचारः |
| (६) | रट्ठत्थिई | राष्ट्रस्थितिः |
| (७) | सिवो | शिवः |
| (८) | कन्हो | कृष्णः |
| (९) | गोआदेवी | गोदादेवी |
| (१०) | कम्हीरतलुणी | काश्मीरतरुणी |
| (११) | वसन्दो | वसन्तः |
| (१२) | पुप्फं-भवँरो | पुष्पं-भ्रमरः |
| (१३) | नारिकेळो | नालिकेरः |
| (१४) | णिगमणम् | निगमनम् |
| (१५) | संपुत्तिवअणम् | संपूर्तिवचनम् |




Jain Education International For Private & Personal Use Only www.jainelibrary.org

# पाअुअपाअुडम् - प्राकृतप्राभृतम्

**कअिन्दो :** - कण्णाडजअुसेलविट्ठुविण्णत्तिअरो सिरिरामो

**कवीन्द्रः** - कर्णाटयदुशैलविष्णुविज्ञप्तिकरः श्रीरामः

### मङ्गळम् - मङ्गलम्

सिरिवेङ्कटणामज्जं म्हण मादूणज्जमुज्झिआवज्जम् ।
विज्जाविळाससेज्जं णमामि पाअुअअुवज्झअिन्दज्जम् ।। १ ।।

श्रीवेंकटनामार्यं अस्माकं मातुरार्यं अुज्झितावद्यम् ।
विद्याविलासशय्यां नमामि प्राकृतोपाध्यायेन्द्रार्यम् ।।१।।

देवी लच्छी जस्स णु तस्स णु सेवं करेमि करणिज्जम् ।
संअलं भुवणं जस्सा जीवअि भिक्खालवेण किदकज्जम् ।। २ ।।
देवी लक्ष्मीर्यस्य नु तस्य नु सेवां करोमि करणीयाम् ।
सकलं भुवनं यस्या जीवति भिक्षालवेन कृतकार्यम् ।। २ ।।

णमह अ णमो णमेत्ति अ वअणेण णमन्तअन्तरंगेणेव्वम् ।
कम्म अ णाणं भत्ती जस्स पदे होन्ति तुरगसीसं देव्वम् ।। ३ ।।
नमत च नमो नम इति च वचनेन नमदन्तरङ्गेणैवम् ।
कर्म च ज्ञानं भक्तिर्यस्य पदे भवन्ति तुरगशीर्षं देवम् ।। ३ ।।

### कअिविसओ-कविविषयः

म्हण वासो गिरिदेसो जअुपअिलच्छीकडक्कसंवेसो सो ।
कव्वेरुत्तरसीसो पम्मगिरिन्दप्पहावपुव्वासासो ।। ४ ।।
मम वासो गिरिदेशो यदुपतिलक्ष्मीकटाक्षसंवेशः सः ।
कावेर्य्युत्तरशीर्षः पद्मगिरीन्द्रप्रभावपूर्वाश्वासः ।। ४ ।।

हं म्हि ण जिणो ण जीणो जणो म्हि जाणो म्हि जाणअ जणा ! अे !
मुक्खो एक्को जीणो, मुक्को एक्को जिणो खु सव्वगुणो ।। ५ ।।
अहमस्मि न जिनो न जीनो जनोऽस्मि ज्ञानवानस्मि जानत जना हे ! ।
मूर्ख एको जीनो, मुक्त एको जिनः खलु सर्वगुणः ।। ५ ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

सक्कअगुरुकरुणुत्थिअपाउअभासित्थियेहिँ गहिदमिमम् ।
कण्णडदामिळसुमुही रसेहिँ सिञ्चअि कअिन्दवाणी मम् ।। ६ ।।
संस्कृतगुरुकरुणोत्थितप्राकृतभाषास्त्रीभिर्गृहीतमिमम् ।
कर्णाटद्राविडसुमुखी रसैः सिञ्चति कवीन्द्रवाणी माम् ।। ६ ।।

खणदासी गणदासी गुणदासी मं हुवीअ घडदासी अम् !
अुणजणमुज्झिअ गेण्हिअ अुण पाउअकण्णिआ रसेअि णिअम् ।। ७ ।।
क्षणदासी गणदासी गुणदासी मां भूत्वा घटदासी अहो ।
पुनर्जनमुज्झित्वा, गृहीत्वा पुनः प्राकृतकन्यका रसयति निजम् ।। ७ ।।

## सावअसिद्धा - श्रावकसिद्धाः

पाउअभारतरट्ठिअमेळनपढमज्ज ! चारुकित्तीभट्टा !
पाउअपुल्लिअमुत्तापुप्फाअिँ अपेक्ख दाणिँ रामकअिट्ठा ! ।। ८ ।।
प्राकृतभारतराष्ट्रीयमेळनप्रथमार्य ! चारुकीर्तिभट्टारक !
प्राकृतफुल्लितमुक्तापुष्पाणि च पश्येदानीं रामकवीष्ट ! ।। ८ ।।

पाउअसिद्धकअिन्दा ! तुम्हाणँ गुणेहिँ गेण्हिअेव्व पदायिँ ।
सक्कअजट्ठिसमत्थो डोम्बिअणट्टं जणस्स दंसेमि ।। ९ ।।
प्राकृतसिद्धकवीन्द्रा युष्माकं गुणैर्गृहीत्वैव पदानि ।
संस्कृतयष्टिसमस्थो डोम्बिकनाट्यं जनस्य दर्शयामि ।। ९ ।।

## पाउअविआरो-प्राकृतविचारः

सव्वमुणिन्देन्दं तं दक्खिणवाअं अअत्तिअं पणुमो ।
अज्ज वि अज्जो जस्स णु सव्वो सीसेण पाउअं धरअि ।। १० ।।
सर्वमुनीन्द्रेन्द्रं तं दक्षिणवाचमगस्त्यं प्रणुमः ।
अद्याऽप्यार्यो यस्य नु सर्वः शीर्षेण पादुकामिव प्राकृतं धारयति ।। १० ।।

जिणमुणिवरठाणकलिअं गुणमणिसरपुण्णवण्णिअुज्जलिअम् ।
पणमामि पाउअं तं जणस्स जाणस्स मुद्धवाणीअे ।। ११ ।।
जिनमुनिवरगणकलितं(तां) गुणमणिसरपुण्यवर्णिकोज्ज्वलितम् (ताम्) ।
प्रणमामि प्राकृतं तं (पादुकां तां) जनस्य ज्ञानिनो मुग्धवाण्याः ।।११।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

रामायणसमयस्स वि पुव्वं पाउअकअिन्दविन्दो वन्दो ।
सक्कदअिन्दचन्दो वम्मिअपुत्तो तदो णु आदिकअिन्दो ।। १२ ।।
रामायणसमयादपि पूर्वं प्राकृतकवीन्द्रवृन्दो वन्द्यः ।
संस्कृतकवीन्द्रचन्द्रो वल्मीकपुत्रः ततो नु आदिकवीन्द्रः ।।१२।।

परुसोवि सरिसहरिसो सक्कअपुरुसो पिओ णु राअरिसी ।
मिउआ वि सरिसहरिसा पाउअबासेत्थिआ पिआ णु सा मअिसी ।। १३ ।।
पुरुषोऽपि सदृशहर्षः संस्कृतपुरुषः प्रियो नु राजर्षिः ।
मृदुकाऽपि सदृशहर्षा प्राकृतभाषास्त्री प्रिया नु सा महिषी ।।१३।।

पाउअकहाणुलावा होन्ति म्ह पुराणु अुदयणस्स कआ ।
पेम्मलकहाणुहावा ता अज्ज कहिं वि टेलिविजन्भीआ ।। १४ ।।
प्राकृतकथानुलापा भवन्ति स्म पुरा नु अुदयनस्य कृताः ।
प्रेमलकथानुभाताः तेऽद्य क्वाऽपि टेलिविजन्भीताः ।। १४ ।।

पाउअजणो खु अण्णो, पाउअभासाजणो वि अण्णो खु ।
पाउअजणहिअअम्मि अ पाउअजीअं करेदि अुज्जलिअम् ।। १५ ।।
प्राकृतजनः खल्वन्यः, प्राकृतभाषाजनोऽप्यन्यः खलु ।
प्राकृतजनहृदये च प्राकृतजीवं कारयत्युज्ज्वलितम् ।। १५ ।।

कअिरामेण कअे अुण कव्वे सव्वेसनिअुणसंकप्पमये ।
पाउअजणस्स पाउअपेम्मरसो होअि णीदिपुप्फेहिँ जुअे ।। १६ ।।
कविरामेण कृते पुनः काव्ये सर्वेशनिपुणसङ्कल्पमये ।
प्राकृतजनस्य प्राकृतप्रेमरसो भवति नीतिपुष्पैर्युते ।। १६ ।।

पाउअमहाकअिन्दो जअि को वि अ अज्ज होअि तस्स णमो ।
जअि को अि ण होअि म्हण कवित्तणस्सेव्व सव्वणमो ।। १७ ।।
प्राकृतमहाकवीन्द्रो यदि कोऽपि चाऽद्य भवति; तस्मै नमः ।
यदि कोऽपि न भवति; मम कवित्वस्यैव सर्वनमः ।। १७ ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

दामिळ-केरळ-तोळ्व-कण्णाडन्धअमहोड्डवंगा अंगा ।
मागध-मज्झअ-गुज्जर-सैन्धव-कम्हीर-नेवुळुच्चंगा ।। १८ ।।
द्राविडकेरळतौळ्वकर्णाटान्ध्रकमहोद्रवङ्गा अङ्गाः ।
मागधमध्यकगुर्जरसैन्धवकाश्मीरनेपाळोत्सङ्गाः ।। १८ ।।

टंकण-बम्म-पुळिन्दा तुळुक्ख-जवना अ पारसीयज्जा ।
बलि-जव-मलया चीना सिंहळपुव्वा अ पाउआ देसा ।। १९ ।।
टङ्कणब्रह्मपुळिन्दाः तुरुष्कयवनाश्च पारसीकाद्याः ।
बलियवमलयाश्चीनाः सिंहळपूर्वाश्च प्राकृता देशाः ।। १९ ।।

देसो सेसो को णु खु पाउअहीणो ? ण को वि दीसेदि ।
देव्वाणँ लोअ अँव्व णु अित्थिअभासेत्ति पाउअं जअअि ।। २० ।।
देशः शेषः को नु खलु प्राकृतहीनः ? न कोऽपि दृश्यते ।
देवानां लोक एव नु स्त्रीभाषेति प्राकृतं जयति ।। २० ।।

शुव्विअपाउअभासाकव्वकहं अेक्कलक्खणुव्वेल्लिअभोअम् ।
कप्पविकप्पाकप्पं कप्पिअ करेदु दुल्लहकअिन्दसुहजोअम् ।। २१ ।।
षड्विधप्राकृतभाषाकाव्यकथां एकलक्षणोद्वेल्लितभोगाम् ।
कल्पविकल्पाकल्पां कल्पयित्वा कारयतु दुर्लभकवीन्द्रसुखयोगम् ।। २१ ।।

सद्दो अत्थो भावो सिक्खिअपुव्वो वि दिट्ठमग्गेण ।
अज्ज कवित्तणकाळे अदिट्ठमग्गक्कमेण पडिवाअि ।। २२ ।।
शब्दोऽर्थो भावः शिक्षितपूर्वोऽपि दृष्टमार्गेण ।
अद्य कवित्वकाले अदृष्टमार्गक्रमेण प्रतिभाति ।। २२ ।।

आलिंगिआ वि बाला मादुळ्कण्णा वहू हुवीअ पुणो ।
अुवगूढा णवजव्वणणवरसदुग्घी अदिट्ठपुव्वरसा ।। २३ ।।
आलिङ्गिताऽपि बाला मातुलकन्या वधूर्भूत्वा पुनः ।
उपगूढा नवयौवननवरसदोग्धी अदृष्टपूर्वरसा ।। २३ ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शालिवाहननरेन्दशालिआ काळिदासपवरेन्दपालिआ ।
रामणामअकअिन्दघोळिआ पाउआमिअरसद्दपोळिया ॥ २४ ॥
शालिवाहननरेन्द्रशालिता कालिदासप्रवरेन्द्रपालिता ।
रामनामककवीन्द्रगोलिता प्राकृतामृतरसार्द्रपोलिका ॥ ४ ॥

वारिआवि अ पुणो वि वारिआ कारिआ महुरपुण्णपूरिआ ।
कारिअेव्व म्हण वेसिआ पिआ भूरि अेव्व रसिअेहिँ भोअिआ ॥ २५ ॥
वारिताऽपि च पुनरपि वारिता कारिका मधुरपूर्णपूरिका(ता) ।
कारितैव मम वेषिता प्रिया भूर्येव रसिकैर्भोजिता ॥ २५ ॥

पाउआमिअकळामयी कहा पाउआ मिअकळामयी अ आ !
जत्थ जाणपदमग्गजोअिआ तत्थ सव्वसुहुगामिणी कआ ॥ २६ ॥
प्राकृतामृतकलामयी कथा पादुका मृगकलामयी च आः ।
यत्र जानपदमार्गयोजिता तत्र सर्वसुखगामिनी कृता ॥ २६ ॥

छव्विहपाउअकव्वकहा वि णु सुव्वअि णो सुजणाणँ सवेसु ।
अज्ज णु दुज्जणभज्जणअग्गिणो जुज्जअि वुत्तकहा हिअअेसु ॥ २७ ॥
षड्विधप्राकृतकाव्यकथाऽपि नु श्रूयते नो सुजनानां श्रवस्सु ।
अद्य नु दुर्जनभर्जनकाग्नेः योज्यते वृत्तकथा हृदयेषु ॥ २७ ॥

## रट्ठत्थिअी-राष्ट्रस्थितिः

भारतरट्टं अज्जवि सन्तिगुणं केवलं कहिज्जेदि ।
सन्तिगुणधम्मकहणो मुस्लिमलोओ वि हन्त ! सन्तगुणो ॥ २८ ॥
भारतराष्ट्रं अद्याऽपि शान्तिगुणं केवलं कथयिष्यति ।
शान्तिगुणधर्मकथनो मुस्लिमलोकोऽपि हन्त ! शान्तगुणः ॥ २८ ॥

तित्थकरा भुवणम्मि अ जत्थ दया तत्थ होन्ति दे दे अुण णु ।
जत्थ रणं कळहं वा तत्थ णु दीणे दया णु करणिज्जा णु ॥ २९ ॥
तीर्थकरा भुवने च यत्र दया तत्र भवन्ति ते ते पुनर्नु ।
यत्र रणः कलहो वा तत्र नु दीने दया नु करणीया नु ॥ २९ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

म्हण रामो म्हण कण्णो म्हण अण्णो को वि दुल्लहो ण अुण देव्वो ।
कित्तो वा अल्लाहो सिद्धो बुद्धो सिवो वि हिअअ णन्तव्वो ॥ ३० ॥
मम रामो मम कृष्णो ममाऽन्यः कोऽपि दुर्लभो न पुनर्देवः ।
क्रिस्तो वाऽल्लाहः सिद्धो बुद्धः शिवोऽपि हृदय नन्तव्यः ॥ ३० ॥

भण भण भणे व्व भण भण रामस्स णु सव्वदेव पुण्णं णामम् ।
धण धण धणेति मा भण, धणदो जक्खो वि अेक्कपिंगो होअि ॥ ३१ ॥
भण भण भणैव भण भण रामस्य नु सर्वदेव पुण्यं नाम ।
धन ! धन ! धनेति मा भण; धनदो यक्षोऽप्येकपिङ्गो भवति ॥ ३१ ॥

## सिवो - शिवः

कन्धे सप्पो, हत्थे सीसअसिप्पी अ भम्म कायम्मि ।
पिट्ठे वाघियचम्म अ अग्गी भालम्मि हन्त ! सिवो ॥ ३२ ॥
स्कन्धे सर्पो, हस्ते शीर्षककपालश्च, भस्म काये ।
पृष्ठे व्याघ्रीयचर्म च, अग्निः फाले, हन्त ! शिवः ॥ ३२ ॥

सो पव्वअीत्थणविहूअिविहूसिअंगो, गंगाजळप्पडिकिदीहुअचन्दलेहो ।
सप्पाहिरायणवगन्दिअमालिअंको, कैळासडोळणमहाणटणम्मि देवो ॥ ३३ ॥
स पार्वतीस्तनविभूतिविभूषिताङ्गो, गङ्गाजलप्रतिकृतीभूतचन्द्रलेखः ।
सर्पाधिराजनवगन्धिकमालिकाङ्कः, कैलासडोलनमहानटने देवः ॥ ३३ ॥

जो चन्दकोरअिअजूडलदाविदान-पज्जन्तमुग्गकमलुक्करसांझराओ ।
संझाणडुण्णडविळासविडम्बिआसो, संझाविलम्बिरअिमण्डलवन्दिओ सो ॥ ३४ ॥
यश्चन्द्रकोरकितजूटलतावितान-पर्यन्तमुग्धकमलोत्करसान्ध्यरागः ।
सन्ध्यानतोन्नतविलासविडम्बिताशः, सन्ध्याविलम्बिरविमण्डलवन्दितः सः ॥३४॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## कन्हो - कृष्णः

अप्पाकिदो वि पाकिदलोआणं लोअणाणँ जो चन्दो ।
सो गोअिन्दो मह तह किदनामो दाणिँ होदु आणन्दो ॥ ३५ ॥
अप्राकृतोऽपि प्राकृतलोकानां लोचनानां यश्चन्द्रः ।
स गोविन्दो मम तथा कृतनामेदानीं भवत्वानन्दः ॥ ३५ ॥

भालं सपुण्डं, चअणं समण्डं, सीसं सिहण्डं, हिअअं सहण्डम् ।
करं सडण्डं, चलणं सहिण्डं, कण्णस्स सव्वं मम कल्लखण्डम् ॥ ३६ ॥
फालं सपुण्ड्रं, वदनं समण्डं, शीर्षं शिखण्डं, हृदयं सहण्डम् ।
करः सदण्डश्चलनं सहिण्डं, कृष्णस्य सर्वं मम कल्यखण्डम् ॥ ३६ ॥

दुज्जणदुल्लह ! सज्जणवल्लह ! अज्ज णु सज्जेहि म्हण रअुज्जोअी ।
कमळअिँ व्व णु हिअआअिं म्हण विमळाअिँ अ होन्तु विअसनद्दरसाअिम् ॥३७॥
दुर्जनदुर्लभ ! सज्जनवल्लभ ! अद्य नु सज्जस्वास्माकं रव्यु(त्यु)द्योगी ।
कमलानीव नु हृदयान्यस्माकं विमलानि च भवन्तु विकसनार्द्ररसानि ॥ ३७ ॥

सिहंडाणं मुद्दं सिहरमणिलुद्दं जह महा-
प्पहाणं मोळीणं महमहिअरण्णुज्जलतरम् ।
अहीणं णच्चेसु प्पडिकलिअमोरँणँणडणं
तहम्हाणं देव्वो सअळसमभावो रअअदि ॥ ३८ ॥
शिखण्डानां मुग्धं शिखरमनिलोर्ध्वं यथा महा-
प्रभाणां मौलीनां महमहितरत्नोज्ज्वलतरम् ।
अहीनां नृत्येषु प्रतिकलितमायूरनटनं
तथाऽस्माकं देवः सकलसमभावो रचयति ॥ ३८ ॥

## गोआदेवी - गोदादेवी

सअमहमणिणीळा चारुकल्लारहत्था
त्थणभरणमिअङ्गी वच्चलत्ताणहिन्दू ।
अळकविणिहितेहिं कित्तणाहा सजेहिं
विळसअि सिरिगोआ विट्ठुचित्तस्स बन्दू ॥ ३९ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

शतमखमणिनीला चारुकल्हारहस्ता
स्तनभरनमिताङ्गी वत्सलत्वसिन्धुः ।
अलकविनिहिताभिः कृष्टनाथा स्रग्भिः
विलसति श्रीगोदा विष्णुचित्तस्य बन्धुः ॥ ३९ ॥

## सक्कअमूळम् जहा-वेअन्तदेसिअस्स
## संस्कृतमूलम् यथाः-वेदान्तदेशिकस्य

शतमखमणिनीला चारुकल्हारहस्ता
स्तनभरनमिताङ्गी सान्द्रवात्सल्यसिन्धुः ।
अलकविनिहिताभिः स्रग्भिराकृष्टनाथा
विलसतु हृदि गोदा विष्णुचित्तात्मजा नः ॥

## कम्हीरतलुणी-काश्मीरतरुणी

कम्हीरजणपदाणं जम्मट्ठाणं णु जम्मुसंठाणम् ।
दे होन्ति सोणवण्णा, ण जम्मुवण्णा अिदं णु चित्ताणम् ॥ ४० ॥
काश्मीरजनपदानां जन्मस्थानं नु जम्बूसंस्थानम् ।
ते भवन्ति स्वर्णवर्णा न जम्बूवर्णाः इदं तु चित्रम् ॥ ४० ॥

पावारअेण कलिआ तरुणी तुरुक्की ।
चन्दंसुमुद्दमुहमण्डलकोमुईआ ।
दिट्ठा वि दिट्ठिसुहमुज्झअि मीलिअच्छी
पक्कत्थणाहगुरुलोअणवारिअेव्व ॥ ४१ ॥

प्रावारकेण कलिता तरुणी तुरुष्की
चन्द्रांशुमुग्धमुखमण्डलकौमुदीका ।
दृष्टाऽपि दृष्टिसुखमुज्झति मीलिताक्षी
पक्षस्थनाथगुरुलोचनवारितेव ॥ ४१ ॥

(पक्षस्तना ह गुरुलोचनवारितेव ॥)



Jain Education International For Private & Personal Use Only www.jainelibrary.org

पावारअेण गुरुणा तरुणी परीदा
वावारअिच्चअि कहं णु सुहं कडक्कम् ।
दावाणळेण गहणम्मि मिअी परीदा
सा वारि वांछअि अ किं सुलहं तडक्कम् ॥ ४२ ॥

प्रावारकेण गुरुणा तरुणी परीता
व्यापारयिष्यति कथं नु सुखं कटाक्षम् ।
दावानलेन गहने मृगी परीता
सा वारि वाञ्छति च, किं सुलभस्तटाकः ॥ ४२ ॥

## वसन्तो - वसन्तः

हिअअ ! कहेहि किं णु कोअिलाअिं
महुरवसन्दमहुस्सवेसु मत्तो !
भवँरवरविळासिणीहिँ किं वा
सरिसतरेहिँ सुसंगमो पमोदो ॥ ४३ ॥

अअि ! महुरवसन्दलच्छिजुत्तो
णववणमालिअमाहवो विदग्घो ।
मह णु वि तुह संगमस्स काळो
विअ हि कपोदअकूअिआअिँ होन्ति ॥ ४४ ॥

हृदय ! कथय किन्नु कोकिलाभिः
मधुरवसन्तमहोत्सवेषु मत्तः !
भ्रमरवरविलासिनीभिः किं वा !
सदृशतरैः सुसङ्गमः प्रमोदः ॥ ४३ ॥

अयि ! मधुरवसन्तलक्ष्मीयुक्तः
नववनमालिकमाधवो विदग्धः ।
मम त्वपि तव सङ्गमस्य कालः
इव हि कपोतककूजितानि भवन्ति ॥ ४४ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## पुष्पं भवँरो - पुष्पं भ्रमरः

कुरविअकुसुमाणं णीलवण्णाणँ रूवं
मिउदळ्परिसाणं सोम्मसोहग्गलेवम् ।
कुसुमसरसभोअट्ठाणभोअिन्दिराणं
फुरअि रविअसिणिद्दफ्फुल्लमिन्दिन्दिराणम् ।। ४५ ।।
कुरविककुसुमानां नीलवर्णानां रूपं
मृदुदलस्पर्शानां सौम्यसौभाग्यलेपम् ।
कुसुमसरसभोगस्थानभोगीन्द्राणां
स्फुरति रवि(ति)स्निग्धफुल्लमिन्दिन्दिराणाम् ।। ४५ ।।

## नाळिकेरो-नालिकेरः

अग्गं पत्तफलेहिँ पुण्णमकिसं, मज्झं वि दण्डन्तरं
मुग्गं मूलणिवेसणं वि मिळिअं पज्जन्तकुण्डेहिँ दे ।
अुग्गम्मीअ रसादळेण भुवणं संभाळ्यन्तो भवं
सग्गं सग्गसुहं रसं अ सअळं अे ! णारिकेळ ! म्हणम् ।। ४६ ।।
अग्रं पत्रफलैः, पूर्णमकृशं, मध्यमपि दण्डान्तरं
मुग्धं मूलनिवेशनमपि मिलितं पर्यन्तकुण्डैः ते ।
उद्गम्य रसतलेन भुवनं सम्भालयन् भवान्
स्वर्गः स्वर्गसुखं रसश्च सकलं हे ! नालिकेर ! अस्माकम् ।। ४६ ।।

## णिगमणम् - निगमनम्

बालस्स मह कव्वेऽस्सिं कअि होन्ति पुणो गुणा ।
दोसा अवि अ होन्तिव्व, किं दोसे हिँ, गुणा गुणा ।। ४७ ।।
सज्जणाणं णु दासो म्हि अिअि मे दूसणं जअि ।
दुज्जणा वि परं सच्चं भावुआ अिअि कप्पअि ।। ४८ ।।
हं म्हि रामो किमेदेण, सव्वे रामा वि किं पुणो ।
जअि पाअुअसीदाअे सेअुबन्धो वि होअि णो ।। ४९ ।।
अिअि मे कअिरामस्स सत्थहोअि णु पत्थणा ।
राअअद्दिग सारं अे ! (सारत्थो) होदु पाअुअपाअुडम् ।। ५० ।।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

## संपुत्तिवअणम् - संपूर्तिवचनम्

कअित्तणे समो णत्थि लेहणम्मि समो बहु ॥

अिअि जअुपअिकुळसेहरसिरिरामप्पिअभअवन्तसन्तठ्ठाणम्मि,
जअुसेलसक्कअमहाविज्जासालद्दिकमहाकज्जपज्जळिअ-
समत्थत्तणविअडविज्जाविळासेण, विण्णत्तिअर-
वंसमुत्ताफळकळाळंकिदेण, सक्कअपाअुअ-
कण्णडदामिळहिन्दिअप्पहुदिभासे-
त्थिआन्तरंगवल्लहेण, सिरि-
गुरुमादामहसाअित्त-
रण्णजग्गुवेंगडज्ज-
करुणा
कडक्कतडक्कसंफुल्लसरसकमळविमळसअळमाणसेण, भारअ-
पाअुअप्पढमरट्टिअमहासम्मेलनदंसणुब्बुद्धपुराण-
पाअुअप्पडिहाप्पहावकिदपाअुअमुत्तावचाय-
प्पाअुअपुप्पावचायाभिक्खपाअुअसअअ-
द्दिगणिम्माणणिअुणणिव्वट्टिअपाअुअ-
वाणीचरणसेवणेण,सवणवेळगोळ-
क्खेत्तराअेसिरिचारुकित्तिभट्टारअसवणसिद्धाणुहाव-
बन्धुरेण, कअिरामेण किदं अिदं पाअुअपाअुडं
जाव संपुण्णम् ॥ मंगळमहासिरी ॥

## निगमनम्

बालस्य मम काव्येऽस्मिन् कति भवन्ति पुनर्गुणाः ।
दोषा अपि च भवन्त्येव, किं दोषैः ? गुणा गुणाः ॥ ४७ ॥

सज्जनानां नु दासोऽस्मि इति मे दूषणं यदि ।
दुर्जना अपि परं सत्यं भावुका इति कल्प्यते ॥ ४८ ॥

अहमस्मि रामः किमेतेन ! सर्वे रामा अपि किं पुनः ? ।
यदि प्राकृतसीतायै सेतुबन्धोऽपि भवति नो ॥ ४९ ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अिति मे कविरामस्य अत्र भवति तु प्रार्थना ।
शतकद्विकसारार्थो भवतु प्राकृतप्राभृतम् ।। ५० ।।

## सम्पूर्तिवचनम् ।

"कवितायां श्रमो नाऽस्ति लेखने तु श्रमो बहुः"

इति यदुपतिकुलशेखरश्रीरामप्रियभगवत्सत्स्थाने, यदुशैलसंस्कृतमहा-
विद्याशालाध्यक्ष्यमहाकार्यप्रज्वलितसमर्थत्वविकटविद्याविलासेन, विज्ञप्तिकर-
वंशमुक्ताफलकलालङ्कृतेन, संस्कृतप्राकृतकर्णाटद्राविडहिन्दीप्रभृति-
भाषास्त्रीअन्तरङ्गवल्लभेन, श्रीगुरुमातामहसाहित्यरत्नजग्गुवेङ्क-
टार्यकरुणाकटाक्षतटाकसम्फुल्लसरसकमलविमलसकल-
मानसेन, भारतप्राकृतप्रथमराष्ट्रीयमहासम्मेलन-
दर्शनोद्बुद्धपुराणप्राकृतप्रतिभाप्रभावकृत-
प्राकृतमुक्तावचायप्राकृतपुष्पापचाया-
भिख्यप्राकृतशतकद्विकनिर्माण-
निपुणनिर्वर्तितप्राकृतवाणी-
चरणसेवनेन, श्रवण-
बेळ्गोळक्षेत्र-
राजर्षि-
श्रीचारुकीर्ति-
भट्टारकश्रमणसिद्धानुभाव-
बन्धुरेण, कविरामेण कृतं इदं प्राकृत-
प्राभृतं यावत् सम्पूर्णम् ।। मङ्गलमहाश्रीः ।।

**काव्यपूरणसमयः** भीमाष्टमी - प्रमोदसंवत्सरमाघशुक्लपक्षः क्रिश २३-१-१९९१ दि०
**स्वयं लेखकः** अरैयर्श्रीरामशर्मा रामानुजदासः कविः, **स्थानं** यदुशैले स्वकीयं गृहम्

285, UPUNEERUBAVI-BEEDI
MELUKOTE, (MANDYA DIST)
KARNATAKA-571431



Jain Education International For Private & Personal Use Only www.jainelibrary.org

# पाइयविन्नाणकहा

कहा

आचार्यविजयकस्तूरसूरिः

## (१) वुड्ढमंतिणो कहा

**सच्चनायस्स दाउणो, मंतिणो संति थोवया ।**
**जह अब्भुयनायंमि, वुड्ढमंतिनिदंसणं ॥ १ ॥**

एगस्स **सेट्ठिवरस्स खत्तियपुत्तो** लेहवाहगो अत्थि । सो दुब्बलो वि अईव निब्भओ अत्थि । एगया सिट्ठिणो लेहं गहिऊणं गामंतरे गओ । अडवीए एगो सिंघो मिलिओ । तेण सह जुद्धं काऊण असिणा हंतूण अग्गओ गओ । तत्थ कोवि रायसुहडो समागओ । मयं सीहं दट्ठूण, मए एसो हओ त्ति जंपंतो निवस्स पुरओ गओ । नरिंदो संतुट्ठो सिंघवहाओ । पारितोसिअं तस्स दिण्णं । सव्वलोएहिं सो पसंसिओ । सो खत्तियपुत्तो कज्जं काऊण पच्छा नियग्गामे आगओ । सीहवहवुत्तंतो सेट्ठिणो कहिओ । सेट्ठी बेइ - 'तुं असच्चपलावी असि । कहं किसीभूएण तए सिंघो हओ' ? । तेण उत्तं- 'मए च्चिअ हओ' इअ सच्चं कहिअं । तया सेट्ठिणा नरिंदस्स तं पण्णविअं - 'एएण खत्तियपुत्तेण सीहो हओ, न तुम्ह सुहडेण' ।

निवेण सुहडो बोल्लाविओ पुच्छिओ य । सो कहेइ 'मए हओ' । निवेण निण्णयत्थं ते दुण्णि पुरिसा वुड्ढमंतिस्स समप्पिआ । तेणाऽवि निण्णयत्थं भिण्ण-भिण्णावरगे दुण्णि ठविआ । सो मंती नियदाढिआए दीहं तणं धरिऊण पुत्थयं पढंतो आसि । तंमि समए पढमं रायसुहडो आहूओ । सो आगओ, मंतिं च पढंतं दट्ठूण दाढिगाए तिणं दट्ठूण तिणस्स अवणयणत्थं हत्थं उप्पाडेइ । तया सो मंतिणा 'हुं हं' ति वोत्तूण भयं पाविओ, भयाउलो सो भग्गो । पच्छा सो खत्तियपुत्तो आहूओ। तेण वि दाढिगाठिअतिणावणयणत्थं हत्थो उप्पाडिओ, तया सो मंती हुंकारं मुंचइ। सो निब्भओ दाढिअं मुट्ठीए गिण्हइ, न मुंचइ । तया मंतिणा जाणिअं-जं एसो चेव खत्तियउत्तो सिंघवहगो अत्थि । तं निवपुरओ नेऊण कहिअं 'एसो च्चिअ सिंघवहगो जाणियव्वो' । कहं ?, तेण सव्वं वुत्तं कहिअं । एसो किसो वि निब्भओ, सुहडो थूलो वि सभओ, भयाउलो कहं सीहं हणिज्ज त्ति ? । निवेण सो सुहडो धिक्कारिओ निक्कासिओ य । खत्तियउत्तो सम्माणिओ, पाहुडं तस्स दिण्णं ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवएसो-

सच्च-नायपयाणंमि, वुड्ढमंतिसमस्सियं ।
सोच्चा अक्खाणगं रम्मं, जएह तह निण्णए ॥ २ ॥

॥ सच्चनायपयाणे वुड्ढमंतिणो कहा समत्ता ॥

- गुज्जरभासाकहाए

(२)

## वुड्ढाए कहा

परिणामं समिक्खित्ता, तहा सम्माणकारगा ।
अप्पा संति जए लोगा, वुड्ढाए एत्थ नायगं ॥ १ ॥

एगया घय-चम्मवावारिणो घयचम्मगहणत्थं नियगामाओ निग्गया । कम्मि वि गामे एगाए थेरीए गिहे भोयणत्थं गया । सा थेरी भावओ बोल्लावेइ, भोयणावसरे घयवावारिं गिहब्भंतरे, चम्मवावारियं गिहाओ बाहिरं भोयावेइ, भोत्तूण गामंतरे गया । जया पुणो घय-चम्माइं किणिऊण आगया ते दुण्णि थेरीए गेहे । तया भोयणावसरे चम्मवावारिं गिहब्भंतरं, घयवावारिं च गिहाओ बाहिरं भोयावेइ ।

भोयणंते तेहिं कमभेयकारणं वुड्ढा पुट्ठा । सा कहेइ- "पुव्वं तुम्हे जया आगया तया घयवावारिणो चित्तं विसुद्धं हुवीअ, जेण अहुणा जइ पसुधणं बहुं होइ तया सोहणं, घयं सुलहं अप्पमुल्लेण बहुं लब्भइ, एवं भावविसुद्धीए गेहब्भंतरे सो भोयाविओ । तहा चम्मवावारिणो असुद्धं चित्तं, जओ सो एवं चिंतइ-जइ पसुधणस्स संहारो भवेज्जा तया चम्माइं सुलहाइं, थोवमुल्लेण लब्भंते । एवं भावस्स अविसुद्धीए बाहिरं भोयाविओ । पच्छा पुणो आगया, तया पसुधणविणासवियारणाए सो घयवावारी बाहिरं ठविओ, पसुधणवुड्ढिवियारणाए य सो चम्मवावारी गिहब्भंतरे ठविओ" । एवं भावस्स विसुद्धीए अविसुद्धीए य सम्माणं असम्माणं च नायव्वं ।

उवएसो-

घयचम्मकिणंताणं, सम्माणं चाऽवमाणणं ।
जाणित्ता 'भावसुद्धीए, जत्तं कुणेज्ज सव्वया' ॥

॥ परिणाममणुलक्खिअ सम्माणाऽवमाणणोवरिं वुड्ढाए कहा समत्ता ॥

- (जणमुहपरंपराओ) सद्धविधिए ॥



Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org



Jain Education International For Private & Personal Use Only www.jainelibrary.org